कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M १९९३ विषय

नाव. आपत्धर्म (शान्तिपर्वणि मोक्षधर्मे) mss.

~~लेखक~~/लिपीकार विष्णुपंत दशापुत्र

पृष्ठ ७१ काळ — पूर्ण/~~अपूर्ण~~

[illegible]

[illegible]

मोक्षधर्मेदंपुस्तकं

मोक्षधर्म०

१

सत्यप्रेत्य
तपः फलं ३

३ सतिसद्वस्तुनि विषयेत पः आलोचनं श्रवणमननजानि तैर्दिध्यासनात्मकं तस्य फलं साक्षात्कारः॥ सः अथोस्य मरणात्प्रागेव भवतिज्ञानं दृढकर्त मित्यर्थः॥

श्रीगणेशाय नमः॥ ॥नारायणं नमस्कृत्य नरं चैव नरोत्तमं॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥ ॥युधिष्ठि
र उवाच॥ ॥धर्माः पितामहेनोक्ता राजधर्माश्रिताः शुभाः॥ धर्ममाश्रमिणां श्रेष्ठं वक्तुमर्हसि सत्तम॥ ॥भीष्म उवा
च॥ ॥सर्वत्र विहितो धर्मः स्वर्ग्यः सत्यफलोदयः॥ बहुद्वारस्य धर्मस्य नेहास्ति विफला क्रिया॥ यस्मिन् यस्मिंश्च विषये
यो यो याति विनिश्चयं॥ स तमेवाभिजानाति नान्यं भरतसत्तम॥ यथा यथा च पर्येति लोकतंत्रं समारवत्॥ तथा तथा वि
रागोत्र जायते नात्र संशयः॥ एवं व्यवसिते लोके बहुदोषे युधिष्ठिर॥ आत्ममोक्षनिमित्तं वै यतेत मतिमान्नरः॥ ॥
युधिष्ठिर उवाच॥ ॥नष्टे धने वा दारे वा पुत्रे पितरि वा मृते॥ अहो दुःखमिति ध्यायन् शोकस्यापचितिं चरेत्॥ अत्राप्यु
×यया बुध्या नुदे शोकं तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥नष्टे धने वा दारे वा पुत्रे पितरि वा मृते॥ ×दाहरंतीम
मितिहासं पुरातनं॥ यथा सेनजितं विप्रः कश्चिदित्याब्रवीत्सुहृत्॥ पुत्रशोकाभिसंतप्तं राजानं शोकविक्लवं॥ वि
षण्णमनसं दृष्ट्वा विप्रो वचनमब्रवीत्॥ किं नु मुह्यसि मूढस्त्वं शोच्यः किमनुशोचसि॥ यदा त्वामपि शोचंतः शोच्या
यास्यंति तां गतिं॥ त्वं चैवाहं च ये चान्ये त्वामुपासंते पार्थिव॥ सर्वे तत्र गमिष्यामो यत एवागता वयं॥ सेनजिदुवाच॥
॥ ॥का बुद्धिः किं तपो विप्र कः समाधिस्तपोधन॥ किं ज्ञानं किं श्रुतं चैव यत्प्राप्य न विषीदसि॥ ब्राह्मण उवाच॥ ॥सर्व
भूतानि दुःखेन व्यतिषिक्तानि पश्यतः॥ उत्तमाधममध्यानि तेषु तेष्विह कर्मसु॥ आत्मापि चायं न मम सर्वा वा पृथि

वी मम॥ यथा मम तथान्येषामिति चिंत्यन्न मे व्यथा॥ एतां बुद्धिमहं प्राप्य न प्रहृष्ये न च व्यथे॥ यथा काष्ठं च काष्ठं च स
मेयातां महोदधौ॥ समेत्य च व्यपेयातां तद्वद्भूतसमागमः॥ एवं पुत्राश्च पौत्राश्च ज्ञातयो बांधवास्तथा॥ तेषां स्नेहो न
कर्तव्यो विप्रयोगो ध्रुवो हि तैः॥ अदर्शनादापतितः पुनश्चादर्शनं गतः॥ न त्वासौ वेद न त्वं तं कः सन् किमनुशोचसि
॥सुखांतप्रभवं दुःखं दुःखांतं प्रभवं सुखं॥ सुखात्संजायते दुःखं दुःखमेवं पुनः पुनः॥ सुखस्यानंतरं दुःखं दुःखस्यानंत
नं सुखं॥ सुखदुःखे मनुष्याणां चक्रवत्परिवर्ततः॥ सुखात्त्वं दुःखमापन्नः पुनरापत्स्यसे सुखं॥ नित्यं लभते दुःखं न नित्यं
लभते सुखं॥ शरीरमेवायतनं सुखस्य दुःखस्य चाप्यायतनं शरीरं॥ यद्यच्छरीरेण करोति कर्म तेनैव देही समुपा
श्नुते ततः॥ जीवितं च शरीरं च जात्यैव सह जायते॥ उभे सह विवर्धेते उभे सह विनश्यतः॥ स्नेहपाशैर्बहुविधैराश्लि
ष्टविषया जनाः॥ अकृतार्थाश्च सीदंति जले सैकतसेतुवत्॥ संचिंतनोत्यशुभं कर्म कलत्रापेक्षया नरः॥ एकः
क्लेशमवाप्नोति परत्रेह च मानवः॥ पुत्रदारकुटुंबेषु प्रसक्ताः सर्वमानवाः॥ शोकपंकार्णवे मग्ना जीर्णा वि
नगजा इव॥ पुत्रनाशे वित्तनाशे ज्ञातिसंबंधिनामपि॥ प्राप्यते सुमहद्दुःखं दवाग्निप्रतिमं विभो॥ दैवायत्तमि
दं सर्वं सुखदुःखे भवाभवौ॥ असुहृच्च सुहृच्चापि सशत्रुर्मित्रवानपि॥ सप्रज्ञः प्रज्ञया हीनो दैवेन लभते सुखं॥ ना
लं सुखाय सुहृदो नालं दुःखाय शत्रवः॥ न च प्रज्ञालमर्थानां न सुखानामलं धनं॥ न बुद्धिर्धनलाभाय न जा

न

ड्यमसमृद्धये ।। लोकपर्यायवृत्तांतं प्राज्ञो जानाति तेन नः ।। बुद्धिमंतं च शूरं च मूढं भीरुं जडं कविं ।। दुर्बलं बलवंतं च भा
गिनं भजते सुखं ।। धेनुर्वत्सस्य गोपस्य स्वामिनं स्तस्करस्य वा ।। पयः पिबति यस्तस्या धेनुस्तस्यैव निश्चयः ।। ये च
मूढतमा लोके ये च बुद्धेः परं गताः ।। ते नराः सुखमेधंते क्लिश्यत्यंतरितो जनः ।। अंतेषु रेमिरे धीरा न ते मध्येषु रेमि
रे ।। अंतप्राप्तिं सुखं प्राहुर्दुःखमंतरमंतयोः ।। ये च बुद्धिसुखं प्राप्ता द्वंद्वातीता निमत्सराः ।। तान्नैवार्था न चानर्था व्यथयं
ति कदाचन ।। अथ ये बुद्धिमप्राप्य व्यतिक्रांताश्च मूढतां ।। ते तिवेलं प्रहृष्यंति संतापमुपयांति च ।। नित्यं प्रमुदिता
मूढा दिवि देवगणा इव ।। अवलेपेन महता परिवृद्धा विचेतसः ।। सुखं दुःखांतमालस्यं दुःखं दाक्ष्यं सुखोदयं ।। भूतिस्स्वे
वं श्रिया सार्धं दक्षे वसति नालसे ।। सुखं वा यदि वा दुःखं प्रियं वा यदि वा प्रियं ।। प्राप्तं प्राप्तमुपासीत हृदयेनापराजि
तः ।। शोकस्थानसहस्राणि भयस्थानशतानि च ।। दिवसे दिवसे मूढमाविशंति न पंडितं ।। बुद्धिमंतं कृतप्रज्ञं शु
श्रूषुमनसूयकं ।। शांतं जितेंद्रियं चापि शोको न स्पृशते नरं ।। एतां बुद्धिं समास्थाय गुप्तचित्तश्चरेद्बुधः ।। उदया
स्तमयज्ञो हि न शोकेप्तुमर्हति ।। यन्निमित्तं भवेच्छोकस्त्रासो वा दुःखमेव वा ।। आयासो वा यतो मूलस्तेकां
गमपितं त्यजेत् ।। किंचिदेव ममत्वेन यदा भवति कल्पितं ।। तदेव परितापार्थं सर्वं संपद्यते तथा ।। यद्यत्यज

ति कामानां तत्सुखस्याभिपूर्यते ।। कामानुसारी पुरुषः कामाननुविनश्यति ।। यच्च कामसुखं लोके यच्च दिव्य
महत्सुखं ।। तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलां ।। पूर्वदेहे कृतं कर्म शुभं वा यदि वाशुभं ।। प्राज्ञं मूढं त
था शूरं भजते यादृशं कृतं ।। एवमेव किलैतानि प्रियाण्येवाप्रियाणि च ।। जीवेषु परिवर्तंते दुःखानि सुखा
नि च ।। एतां बुद्धिं समास्थाय नानुसीदेद्गुणान्वितः ।। सर्वान्कामान्जुगुप्सेत कोपं कुर्वीत पृष्ठतः ।। वृत्त ए
ष हृदि प्रौढो मृत्युरेष मनो भवत् ।। क्रोधो नाम शरीरस्थो देहिनां प्रोच्यते बुधैः ।। यदा संहरते कामा
न्कूर्मोंगानीव सर्वशः ।। तदात्मज्योतिरात्मा यमात्मन्येव प्रपश्यति ।। किंचिदेव ममत्वेन यदा भवति क
ल्पितं ।। तदेव परितापार्थं सर्वं संपद्यते तदा ।। न बिभेति यदा चायं यदा चास्मान्न बिभ्यति ।। यदा नेच्छति
न द्वेष्टि ब्रह्म संपद्यते तदा ।। उभे सत्यानृते त्यक्त्वा शोकानंदौ भयाभये ।। प्रियाप्रिये परित्यज्य प्रशांता
त्मा भविष्यसि ।। यदा न कुरुते धीरः सर्वभूतेषु पापकं ।। कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ।। या दु
स्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यति ।। योसौ प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखं ।। अत्र पिंगलया
गीता गाथाः श्रूयंति पार्थिव ।। यथासौ कृच्छ्रकालेपि लेभे धर्मं सनातनं ।। संकेते पिंगला वेश्या कां

तेनासीच्छिन्नाकृता॥ अथकृछ्रगताशांसा बुद्धिसास्थापयत्तदा॥ ॥पिंगलाउवाच॥ ॥उन्मत्ताहंम
नुन्मंतंकांतमन्ववसंचिरं॥ अंतिकेमरणंसंतंनेनमध्यगमंपुरा॥ एकस्थूणंनवद्वारमपिधास्या
म्यगारकं॥ काहिकांतमिहायांतमयंकांतेतिमंस्यते॥ अकामाकामरूपेण धूर्त्तानरकरूपिणः॥ नपु
नर्वंचयिष्यामि प्रतिबुद्धास्मिजागृमि॥ अनर्थोहि भवेदर्थो दैवात्पूर्वकृतेनवा॥ संबुद्धाहंनिराका
रानाहमद्याजितेंद्रिया॥ सुखंनिराशःस्वपितिनेराश्यंपरमंसुखं॥ आशामनाशांकृत्वासुखंस्व
पितिपिंगला॥ भीष्मउवाच॥ ॥एतैश्चान्यैश्चविप्रस्यहेतुमद्भिःसुभाषितैः॥ पर्यवस्थापितोराजासेनजि
न्मुमुदेसुखी॥ ॥इतिशांतौमोक्षधर्मे॥ ॥अतिक्रामतिकालेस्मिन्सर्वभूतक्षयावहे॥ किंश्रे
यःप्रतिपद्येततन्मेब्रूहिपितामह॥ ॥भीष्मउवाच॥ ॥अत्राप्युदाहरंतीममितिहासंपुरातनं॥ पि
तुःपुत्रेणसंवादंतन्निबोधयुधिष्ठिर॥ द्विजातेःकस्यचित्पार्थस्वाध्यायनिरतस्यवै॥ बभूवपुत्रोमेधा
वीमेधावीनामनामतः॥ सोब्रवीत्पितरंपुत्रःस्वाध्यायकरणेरतं॥ मोक्षधर्मार्थकुशलोलोकतंत्रविच
क्षणः॥ ॥पुत्रउवाच॥ ॥धीरःकिंस्वित्तातकुर्यात्प्रजानन्क्षिप्रंह्यायुर्भ्रश्यतेमानवानां॥ पितस्त ३

दाचक्ष्वयथार्थयोगंममानुपूर्व्यायेनधर्मंचरेयं॥ ॥पितोवाच॥ ॥वेदानधीत्यब्रह्मचर्येणपुत्रपुत्रानिच्छेत्पाव
नार्थंपितॄणां॥ अग्नीनाधायविधिवच्चेष्टयज्ञोवनंप्रविश्याथमुनिर्बुभूषेत्॥ ॥पुत्रउवाच॥ ॥एवमभ्याहते
लोकेसमंतात्परिवारिते॥ अमोघाःकापतंतीह किंनुभाषयसीवमां॥ ॥पुत्रउवाच॥ ॥मृत्युनाभ्याहतोलो
कोजरयाजययापरिवारितः॥ अमोघारात्रयश्चापिनित्यमायांतियांतिच॥ यदाहमेतज्जानामिनमृत्युस्ति
ष्ठतीतिह॥ सोहंकथंप्रतीक्षिष्येज्ञानेनापिहितश्चरन्॥ रात्र्यांरात्र्यांव्यतीतायामायुरल्पतरंयदा॥ तदेव
वंध्यंदिवसमितिविद्याद्विचक्षणः॥ गाधोदकेमत्स्यइवसुखंविंदेतकस्तदा॥ अनवाप्तेषुकामेषुमृत्युर
भ्येतिमानवं॥ पुष्पाणीवविचिन्वंतमन्यत्रगतमानसं॥ वृकीवोरणमासाद्यमृत्युरादायगच्छति॥ अ
द्यैवकुरुयच्छ्रेयोमात्वाकालोयमागतं॥ अकृतेष्वेवकार्येषुमृत्युर्वैसंप्रकर्षति॥ श्वःकार्यमद्यकुर्वीतम
ध्याह्नेचापराह्णिकं॥ नहिप्रतीक्षतेमृत्युःकृतंवास्यनवाकृतं॥ कोहिजानातिकस्याद्यमृत्युकालोभ
विष्यति॥ युवैवधर्मशीलःस्यादनित्यंखलुजीवितं॥ कृतेधर्मेभवेत्कीर्त्तिरिहप्रेत्यचवैसुखं॥ मोहेन
हिसमाविष्टःपुत्रदारार्थमुद्यतः॥ कृत्वाकार्यमकार्यंवापुष्टिमेषांप्रयच्छति॥ तंपुत्रपशुसंपन्नंव्या

सक्तमनसंचरं ॥ सुप्तंव्याघ्रो मृगमिव मृत्युरादाय गछति ॥ इदं कृतमिदं कार्यमिदमन्यत्कृताकृतं ॥ एवमी
हासुखासक्तं कृतांतः कुरुते वशे ॥ कृतानां फलमप्राप्तं कर्मणां कर्मसंज्ञितं ॥ क्षेत्रापणगृहासक्तं मृ
त्युरादाय गछति ॥ दुर्बलं बलवंतं च शूरं भीरुं जडं कविं ॥ अप्राप्तं सर्वकामार्थान्मृत्युरादाय गछति
मृत्युर्जराच व्याधिदुःखं चानेककारणं ॥ अनुसक्तं यदा देहे किं स्वस्थ इव तिष्ठसि ॥ जातमेवांतकोंताय जरा
चान्वेति देहिनं ॥ अनुसक्ता द्वयेनैते भावाः स्थावरजंगमाः ॥ मृत्योर्वा गृहमेतद्वै या ग्रामे वसतो रतिः ॥
देवानामेष वै गोष्ठो यदरण्यमिति श्रुतिः ॥ निबंधिनी रज्जुरेषा या ग्रामे वसतो रतिः ॥ छित्वैनां सुकृतो
यांति नैनां छिंदंति दुष्कृतः ॥ यो हिंसयति प्राणान्मनोवाक्कायहेतुभिः ॥ जीवनार्थापनयनैः कर्मभि
र्न स बध्यते ॥ न मृत्युसेनामायांतीं जातु कश्चित्प्रबाधते ॥ ऋते सत्यमसत्याद्यासत्ये ह्यमृतमाश्रितं ॥
तस्मात्सत्यव्रताचारः सत्ययोगपरायणः ॥ सत्यागमः सदा दांतः सत्येनैवांतकं जयेत् ॥ अमृतं चैव
मृत्युश्च द्वयं देहे प्रतिष्ठितं ॥ मृत्युरापद्यते मोहात्सत्येनापद्यतेऽमृतं ॥ सोहं ह्यहिंस्रः सत्यार्थी का
मक्रोधबहिष्कृतः ॥ समदुःखसुखः क्षेमी मृत्युं हास्याम्यमर्त्यवत् ॥ शांतियज्ञपरो दांतो ब्रह्मय

ज्ञे स्थितो मुनिः ॥ वाङ्मनःकर्मयज्ञश्च भविष्याम्युदगायने ॥ पशुयज्ञैः कथं हिंस्रैर्मादृशो यष्टुमर्हति ॥ अंतवद्भिरिव प्रा
ज्ञः क्षत्रयज्ञैः पिशाचवत् ॥ यस्य वाङ्मनसी स्यातां सम्यक्प्रणिहिते सदा ॥ तपस्त्यागश्च योगश्च स वै सर्वमवाप्नु
यात् ॥ नास्ति विद्यासमो बंधुर्नास्ति सत्यसमं तपः ॥ नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखं ॥ आत्मन्येवात्मना जात आ
त्मनिष्ठोऽप्रजोऽपि वा ॥ आत्मन्येव भविष्यामि न मां तारयति प्रजा ॥ नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्य
ता च ॥ शीले स्थितिर्दंडनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः ॥ किं ते धनैर्बांधवैर्वापि किं ते किं ते दारैर्ब्राह्मणा यो
मरिष्यसि ॥ आत्मानमन्विच्छ गुहां प्रविष्टं पितामहस्ते क्व गतः पिता च ॥ ॥ भीष्म उवाच ॥ ॥ पुत्रस्यैतद्वचः श्रुत्वा यथाका
र्षीत्पितामह ॥ तथा त्वमपि वर्तस्व सत्यधर्मपरायणः ॥ ॥ शांतिपर्वणि मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ धनिनो
वा धना ये च वर्त्तयंति स्वतंत्रिणः ॥ सुखदुःखागमस्तेषां कः कथं वा पितामह ॥ ॥ भीष्म उवाच ॥ ॥ अत्राप्युदाहरंतीममि
तिहासं पुरातनं ॥ शम्याकेन हि मुक्तेन गीतं शांतिगतेन च ॥ अब्रवीन्मां पुरा कश्चिद्ब्राह्मणस्त्यागमाश्रितः ॥ क्लिश्य
मानः कुदारेण कुचैलेन बुभुक्षया ॥ उत्पन्नमिह लोके वै जन्मप्रभृति मानवं ॥ विविधान्युपवर्त्तंते दुःखानि च सुखानि च ॥
तयोरेकतरो मार्गो यदेनमुपसंनयेत् ॥ न सुखं प्राप्य संहृष्येन्नासुखं प्राप्य संज्वरेत् ॥ न वै चरसि यच्छ्रेय आत्मनो वा य
५ दिच्छसि ॥ अकामात्मापि हि सदा धुरमुद्यम्य चैव ह ॥ अकिंचनः परिपतन्सुखमास्वादयिष्यसि ॥ अकिंचनः सुखं शे

ते समुत्तिष्ठति चैव ह ।। अकिंचन्यं सुखं लोके पूथ्यं शिवमनामयं ।। अनमित्रपथो ह्येष दुर्लभः सुलभो मतः ।। अकिंचनस्य
शुद्धस्य उपपन्नस्य सर्वतः ।। अवेक्ष्यमाणस्त्रींल्लोकान्न तुल्यमिह लक्षये ।। आकिंचन्यं च राज्यं च तुलया समतोलय
त् ।। अत्यरिच्यत दारिद्र्यं राज्यादपि गुणाधिकं ।। आकिंचन्ये च राज्ये च विशेषः सुमहानयं ।। नित्योद्विग्नो धनवान्मृ हि
त्योरास्यगतो यथा ।। नैवास्याग्निर्न चादित्यो न मृत्युर्न च दस्यवः ।। प्रभवंति धनत्यागाद्विमुक्तस्य निराशिषः ।। तं वै सदा का
मचरमनुपस्तीर्णशायिनं ।। बाहूपधानं शाम्यंतं प्रशंसंति दिवौकसः ।। धनवान्क्रोधलोभाभ्यामाविष्टो नष्टचेत
नः ।। तिर्यगीक्षः शुष्कमुखः पापको भ्रुकुटीमुखः ।। निर्दशन्नधरोष्ठं च क्रुद्धो दारुणभाषितः ।। कस्तमिच्छेत्परिद्रष्टुं
दातुमिच्छति चेन्महीं ।। श्रियाह्यभीक्ष्णं संवासो मोहयत्यविचक्षणं ।। सा तस्य चित्तं हरति शारदाभ्रमिवानिलः ।।
अथैनं रूपमानं च धनमानं च विंदति ।। अभिजातोस्मि सिद्धोस्मि नास्मि केवलमानुषः ।। इत्येभिः कारणैस्तस्य
त्रिभिश्चित्तं प्रमाद्यति ।। संप्रसक्तमना भोगान्विसृज्य पितृसंचितान् ।। परिक्षीणः परस्वानामादानं साधु मन्यते ।।
तमतिक्रांतमर्यादमाददानं ततस्ततः ।। प्रतिषेधंति राजानो लुब्धा मृगमिवेषुभिः ।। एवमेतानि दुःखानि तानि ता
नीह मानवं ।। विविधान्युपपद्यंते गात्रसंस्पर्शजान्यपि ।। पतेषां परमदुःखानां बुध्या भैषज्यमाचरेत् ।। लोकध
र्ममविज्ञाय ध्रुवाणामध्रुवैः सह ।। नात्यक्त्वा सुखमाप्नोति नात्यक्त्वा विंदते परं ।। नात्यक्त्वा चाभयः शेते त्यक्त्वा स

र्वं सुखी भवेत् ।। इत्येतद्धास्तिनपुरे ब्राह्मणेनोपवर्णितं ।। शाम्याकेन पुरा मह्यं तस्मात्त्यागः परो मतः ।। ।। इति शांतो मो
क्षधर्मे ।। ।। युधिष्ठिर उवाच ।। ।। ईहमानः समारंभान्यदि नासादयेद्धनं ।। धनतृष्णाभिभूतश्च किं कुर्वन्सुखमा
प्नुयात् ।। ।। भीष्म उवाच ।। ।। सर्वसाम्यमनायासः सत्यवाक्यं च भारत ।। निर्वेदश्चविधित्सा च यस्य स्यात्स सुखी
नरः ।। एतान्येव पदान्याहुः पंच वृद्धाः प्रशांतये ।। एष स्वर्गश्च धर्मश्च सुखं चानुत्तमं मतं ।। अत्राप्युदाहरंतीममितिहासं
पुरातनं ।। निर्वेदं मंकिना गीतं तन्निबोध युधिष्ठिर ।। ईहमानो धनं मंकिर्भग्नेहश्च पुनः पुनः ।। केनचिद्धनशेषे
ण क्रीतवान्दम्यगोयुगं ।। असंबद्धौ तु तौ दम्यौ दमनायाभिनिःसृतौ ।। आसीनमुष्ट्रं मध्येन सहसैवाभ्यधावतां ।। त
योः संप्राप्तयोरुष्ट्रः स्कंधदेशममर्षणः ।। उत्थायोत्क्षिप्य तौ दम्यौ प्रससार महाजवः ।। ह्रियमाणौ तु तौ दम्यौ तेनोष्ट्रे
ण प्रमाथिना ।। म्रियमाणौ तु संप्रेक्ष्य मंकिस्तत्राब्रवीदिदं ।। न चैवाविहितं शक्यं दक्षेणापीहितं धनं ।। युक्तेन श्रद्ध
या सम्यगीहां समनुतिष्ठता ।। कृतस्य पूर्वं चानर्थैर्युक्तस्याप्यनुतिष्ठतः ।। इमं पश्यत संगत्या इमं दैवमुपस्थितं
।। उद्यम्योद्यम्य मे दम्यौ विषमेणेव गच्छतः ।। उत्क्षिप्य काकतालीयमुत्पथेनैव धावतः ।। मणी वोष्ट्रस्य लंबेते प्रियौ
वत्सतरौ मम ।। शुद्धं हि दैवमेवेदं हठे नैवास्ति पौरुषं ।। यदि वाप्युपपद्येत पौरुषं नाम कर्हिचित् ।। अन्विष्यमाणं
तदपि दैवमेवानुतिष्ठति ।। तस्मान्निर्वेद एवेह गंतव्यं सुखमिच्छता ।। सुखं स्वपिति निर्विण्णो निराशश्चार्थसा

मोक्षधर्म०

६

धने॥ अहो सम्यक्शुकेनोक्तः सर्वतः परिमुच्यता॥ प्रतिष्ठता महारण्यं जनकस्य निवेशने॥ यः कामानाप्नुयात्सर्वा
न्यश्चैतान्केवलांस्त्यजेत्॥ प्रापणात्सर्वकामानां परित्यागो विशिष्यते॥ नांतं सर्वविधित्सानां गतःपूर्वोस्ति
कश्चन॥ शरीरे जीविते चैव तृष्णा मंदस्य वर्द्धते॥ निवर्त्तस्व विधित्साभ्यः शाम्य निर्विद्य कामुक॥ असकृच्चा
सि निकृतो न च निर्विद्यसे तन॥ यदि नाहं विनश्यस्ते यद्येवं रमसे मया॥ मा मां योजय लोभेन वृथा त्वं वित्तकामु
क॥ अहो नु मम बालिश्यं योहं क्रीडनकस्तव॥ किं नैवं जातु पुरुषः परेषां प्रेष्यतामियात्॥ न पूर्वे न परे जातु कामा
नामंतमाप्नुयात्॥ त्यक्त्वा सर्वसमारंभान्प्रतिबुद्धोस्मि जागरमि॥ नूनं ते हृदयं काम वज्रसारमयं दृढं॥ यदनर्थश
ताविष्टं शतधा न विदीर्यते॥ जानामि काम त्वां चैव यच्च किंचित्प्रियं तव॥ तवाहं प्रियमन्विच्छन्नात्मन्युपलभे सुखं
॥ काम जानामि ते मूलं संकल्पात्किल जायसे॥ न त्वां संकल्पयिष्यामि समूलो न भविष्यसि॥ ईहा धनस्य न सु
खा लब्ध्वा चिंता च भूयसी॥ लब्धनाशो यथा मृत्युर्लब्धं भवति वा न वा॥ परित्यागे न लभते ततो दुःखतरं नु किं॥
न च तुष्यति लब्धेन भूय एव च मार्गति॥ अनुतर्षुल एवार्थः स्वादु गांगमिवोदकं॥ मद्विलापनमेतत्तु प्रतिबुद्धो
स्मि संत्यजे॥ य इमं मामकं देहं भूतग्रामः समाश्रितः॥ स यात्वितो यथाकामं वसतां वा यथासुखं॥ न युष्मास्विह मे
प्रीतिः कामलोभानुसारिषु॥ तस्मादुत्सृज्य कामान्वै सत्वमेवाश्रयाम्यहं॥ सर्वभूतान्यहं देहे पश्यन्मनसि चात्मनः॥

६

योगे बुद्धिं श्रुते सत्वं मनो ब्रह्मणि धारयन्॥ विहरिष्याम्यनासक्तः सुखी लोकान्निरामयं॥ यथा मां त्वं पुनर्नैवं दुःखेषु
प्रणिधास्यसि॥ त्वया हि मे प्रणुन्नस्य गतिरन्या न विद्यते॥ तृष्णाशोकश्रमाणां हि त्वं काम प्रभवः सदा॥ धननाशे
ऽधिकं दुःखं मन्ये सर्वमहत्तरं॥ ज्ञातयो ह्यवमन्यंते मित्राणि च धनच्युतं॥ अवज्ञानसहस्रैस्तु दोषाः कष्टतराधने॥ धने
सुखकला या तु सापि दुःखैर्विधीयते॥ धनमस्येति पुरुषं पुरा निघ्नंति दस्यवः॥ क्लिश्यंति विविधैर्दंडैर्नित्यमुद्वेजयंति
च॥ मंदलोलुपता दुःखमिति बुद्धं चिरान्मया॥ यद्यदालंबसे काम तत्तदेवानुरुध्यसे॥ अतत्वज्ञोसि बालश्च दुस्तोषोऽ
पूरणोनलः॥ नैव त्वं वेत्थ सुलभं नैव त्वं वेत्थ दुर्लभं॥ पाताल इव दुःपूरो मां दुःखैर्योक्तुमिच्छसि॥ नाहमद्य समावेष्टुं
शक्यः काम पुनस्त्वया॥ निर्वेदमहमासाद्य द्रव्यनाशाद्यदृच्छया॥ निर्वृतिं परमां प्राप्य नाद्य कामान्विचिंतये॥ अति
क्लेशं सहामीह नाहं बुद्ध्याम्यबुद्धिमान्॥ निकृतो धननाशेन शये सर्वांगविज्वरः॥ परित्यजति काम त्वां हित्वा स
र्वमनोगतीः॥ न त्वं मया पुनः काम वत्स्यसे न च रंस्यसे॥ क्षमिष्ये क्षममाणानां न हिंसिष्ये विहिंसितः॥ द्वेष्यमुक्तः
प्रियं वक्ष्याम्यनादृत्य तदप्रियं॥ तृप्तः स्वस्थेंद्रियो नित्यं यथालब्धेन वर्त्तयन्॥ न सकामं करिष्यामि त्वामहं शत्रुमा
त्मनः॥ निर्वेदं निर्वृतिं तृप्तिं शांतिं सत्यं शमं क्षमां॥ सर्वभूतदयां चैव विद्धि मां समुपागतं॥ तस्मात्कामश्च लोभश्च तृ
ष्णा कार्पण्यमेव च॥ त्यजंतु मां प्रतिष्ठंतं सत्वस्थो ह्यस्मि सांप्रतं॥ प्रहाय कामं लोभं च सुखं प्राप्तोस्मि सांप्रतं॥ नाद्य

लोभवशं प्राप्तो दुःखं प्राप्स्याम्यचेतनात्मिवाश॥ यद्यत्त्यजति कामानां तत्सुखस्याभिपूर्यते॥ कामस्य वशमापन्नो दुःख
मेव प्रपद्यते॥ कामानुबंधं नुदते यत्किंचित्पुरुषो रजः॥ कामक्रोधोद्भवं दुःखमह्रीररतिरेव च॥ एष ब्रह्मप्रविष्टो
हं ग्रीष्मे शीतमिव ह्रदं॥ शाम्याम्मि परिनिर्वाम्मि सुखमासे तिकेवलं॥ यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं॥
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलां॥ आत्मना सप्तमं कामं हत्वा शत्रुमिवोत्तमं॥ प्राप्यावध्यं ब्रह्मपुरं राजे
व स्यामहं सुखी॥ एतां बुद्धिं समास्थाय मंकिर्निर्वेदमागतः॥ सर्वान्कामान्परित्यज्य प्राप्य ब्रह्म महत्सुखं॥
दम्यताशकृते मंकिरमृतत्वं किलागमत्॥ आच्छिनत्काममूलं हि तेन प्राप्य महत्सुखं॥ ॥भीष्म उवाच॥ ॥
अत्राप्युदाहरंतीममितिहासं पुरातनं॥ गीतं विदेहराजेन जनकेन प्रशाम्यता॥ अनंतं बत मे वित्तं यस्य मे ना
स्ति किंचन॥ मिथिलायां प्रदग्धायां न मे किंचन दह्यति॥ अत्रैवोदाहरंतीमं बोध्यस्य पदसंचयं॥ निर्वे
दं प्रति विन्यस्तं तन्निबोध युधिष्ठिर॥ बोध्यं शांतमृषिं राजा नहुषः पर्यपृच्छत॥ निर्वेदाच्छांतिमापन्नं शास्त्र
प्रज्ञानतर्पितं॥ उपदेशं महाप्राज्ञ शमस्योपदिशस्व मे॥ कां बुद्धिं समनुध्याय शांतश्चरसि निर्वृतः॥ ॥बो
ध्य उवाच॥ ॥उपदेशेन वर्तामि नानुशास्मीह कंचन॥ लक्षणं तस्य वक्ष्येहं तत्स्वयं परिमृश्यतां॥ पिंगला कु

ररः सर्पः सारंगान्वेषणं वने॥ इषुकारः कुमारी च षडेते गुरवो मम॥ ॥शांतौ मोक्षधर्मे॥ ॥बोध्य उवाच॥ ॥
आशा बलवती कष्टा नैराश्यं परमं सुखं॥ आशां निराशां कृत्वा तु सुखं स्वपिति पिंगला॥ सामिषं कुररं दृष्ट्वा
वध्यमानं निरामिषैः॥ आमिषस्य परित्यागात्कुररः सुखमेधते॥ गृहारंभो हि दुःखाय न सुखाय कदाचन
सर्पः परकृतं वेश्म प्रविश्य सुखमेधते॥ सुखं जीवंति मुनयो भैक्ष्यवृत्तिं समाश्रिताः॥ अद्रोहेणैव भूतानां सा
रंगा इव पक्षिणः॥ इषुकारो नरः कश्चिदिषावासक्तमानसः॥ समीपेनापि गच्छंतं राजानं नावबुद्धवान्॥
बहूनां कलहो नित्यं द्वयोः संकथनं ध्रुवं॥ एकाकी विचरिष्यामि कुमारीशंखको यथा॥ ॥युधिष्ठिर उवाच
केन वृत्तेन वृत्तज्ञ वीतशोकश्चरेन्महीं॥ किं च कुर्वन्नरो लोके प्राप्नोति गतिमुत्तमां॥ ॥भीष्म उवाच॥ ॥अ
त्राप्युदाहरंतीममितिहासं पुरातनं॥ प्रल्हादस्य च संवादं मुनेराजगरस्य च॥ चरंतं ब्राह्मणं कंचित्कल्यचि
त्तमनामयं॥ पप्रच्छ राजा प्रल्हादो बुद्धिमान्बुद्धिसंमतं॥ ॥प्रल्हाद उवाच॥ ॥स्वस्थः शक्तो मृदुर्दांतो
निर्विधित्सोनसूयकः॥ सुवाक्प्रगल्भो मेधावी प्राज्ञश्चरसि बालवत्॥ नैव प्रार्थयसे लाभं नालाभेष्वनुशो
चति॥ नित्यतृप्त इव ब्रह्मन्न किंचिदवमन्यते॥ स्रोतसा ह्रियमाणासु प्रजासु विमना इव॥ धर्मकामार्थ
कार्येषु कूटस्थ इव लक्ष्यसे॥ नानुतिष्ठसि धर्मार्थौ न कामे चापि वर्तसे॥ इंद्रियार्थाननादृत्य मुक्तश्चर

सिस्माक्षिवत्॥ कानु प्रज्ञा श्रुतं वा किं वृत्तिर्वा कानु ते मुने॥ क्षिप्रमाचक्ष्व मे ब्रह्मन् श्रेयो यदिह मन्यसे॥ अनुयु
क्तः स मेधावी लोकधर्मविधानवित्॥ उवाच श्लक्ष्णया वाचा प्रह्लादमनपार्थया॥ पश्य प्रह्लाद भूतानामु
त्पत्तिमनिमित्ततः॥ ह्रासं वृद्धिं विनाशं च न प्रहृष्ये न च व्यथे॥ स्वभावादेव संदृश्या वर्त्तमाना प्रवृत्तयः॥ स्व
भावनिरताः सर्वाः परितप्ये न केन चित्॥ पश्य प्रह्लाद संयोगान्विप्रयोगपरायणान्॥ संचयांश्च विना
शांतान्न क्वचिद्विदधे मनः॥ अंतवंति च भूतानि गुणयुक्तानि पश्यतः॥ उत्पत्तिनिधनज्ञस्य किं कार्यमवशिष्य
ते॥ जलजानामपि ह्यंतं पर्यायेणोपलक्षये॥ महतामपि कायानां सूक्ष्माणां च महोदधौ॥ जंगमस्थाव
राणां च भूतानामसुराधिप॥ पार्थिवानामपि व्यक्तं मृत्युं पश्यामि सर्वशः॥ अंतरिक्षचराणां च दानवो
त्तम पक्षिणां॥ उत्तिष्ठते यथाकालं मृत्युर्बलवतामपि॥ दिवि संचरमाणानि ह्रस्वानि च महांति च॥ ज्यो
तींष्यपि यथाकालं पतमानानि लक्षये॥ इति भूतानि संपश्यन्ननुषक्तानि मृत्युना॥ सर्वं सामान्य
तो विद्वान्कृतकृत्यः सुखं स्वपे॥ सुमहांतमपि ग्रासं ग्रसे लब्धं यदृच्छया॥ शये पुनरभुंजानो दिवसानि
बहून्यपि॥ आशयत्यपि मामन्नं पुनर्बहुगुणं बहु॥ पुनरल्पं पुनः स्तोकं पुनर्नैवोपपद्यते॥ कणान्

कदाचित्खादामि पिण्याकमपि च ग्रसे॥ भक्षये शालिमांसानि भक्ष्यांश्चोच्चावचान्पुनः॥ शये कदाचित्प
र्यंके भूमावपि पुनः शये॥ प्रासादे चापि मे शय्या कदाचिदुपपद्यते॥ धारयामि च चीराणि शाणक्षौमाजि
नानि च॥ महार्हाणि च वासांसि धारयाम्यहमेकदा॥ न संनिपतितं धर्म्यमुपभोगं यदृच्छया॥ प्रत्याचक्षे न
चाप्येनमनुरुध्ये सुदुर्लभं॥ अचलमनिधनं शिवं विशोकं शुचिमतुलं विदुषां मते प्रविष्टं॥ अनभिमत
मसेवितं विमूढैर्व्रतमिदमाजगरं शुचिश्चरामि॥ अचलितमतिरच्युतः स्वधर्मात्परिमितसंसरणः परा
वरज्ञः॥ विगतभयकषायलोभमोहो व्रतमिदमाजगरं शुचिश्चरामि॥ अनियतफलभक्ष्यभोज्यपेयं
विधिपरिणामविभक्तदेशकालं॥ हृदयमसेवितं कदर्यैर्व्रतमिदमाजगरं शुचिश्चरामि॥ इदमिदमि
ति तृष्णयाभिभूतं जनमनवाप्तधनं विषीदमानं॥ निपुणमनुनिशाम्य तत्त्वबुद्ध्या व्रतमिदमाजगरं शुचि
श्चरामि॥ बहुविधमनुदृश्य चार्थहेतोः कृपणमिहार्यमनार्यमाश्रयंतं॥ उपशमरुचिरात्मवान्प्रशां
तो व्रत०॥ सुखमसुखमलाभमर्थलाभं रतिमरतिं मरणं च जीवितं च॥ विधिनियममवेक्ष्य तत्त्वतोहं व्रत०॥
अपगतभयरागमोहदर्पो धृतिमतिबुद्धिसमन्वितः प्रशांतः॥ उपगतफलभोगिनो निशाम्य व्रतमि०॥

अनियतशयनाशनः प्रकृत्या दमनियमव्रतसत्यशौचयुक्तः ॥ अपगतफलसंचयः प्रहृष्टो व्रत० ॥ अनभिगतसुखार्थ
मीहनार्थैरुपशमबुद्धिरवेक्ष्य चात्मसंस्थः ॥ त्वरितमनियतं मनो नियंतुं व्रत० ॥ न हृदयमवरुध्य वाङ्मनो वा प्रियसु
खदुर्लभतामनित्यतां च ॥ तदुभयमुपलक्षयन्निवाहं व्रत० ॥ बहुकथितमिदं हि बुद्धिःकविभिरपि प्रथयद्भिरात्म
कीर्तिं ॥ इदमिदमिति तत्र तत्र तत्त्व परमतैर्गहनं प्रतर्कयद्भिः ॥ तदिदमनुनिशाम्य विप्रयातं पृथगभिपन्नमिहाबु
धैर्मनुष्यैः ॥ अनवसितमनंतदोषपारं नृषु विचरामि विनीतदोषतृष्णः ॥ ॥भीष्म उवाच ॥ ॥अजगरचरितव्रतं म
हात्मा य इह नरोनुचरेद्विनीतरागः ॥ अपगतभयलोभमोहमन्युः स खलु सुखी विचरेदिमं विहारं ॥ ॥शौतै
मोधर्मे ॥ ॥युधिष्ठिरः ॥ ॥ बांधवाः कर्म वित्तं वा प्रज्ञा चेह पितामह ॥ नरस्य का प्रतिष्ठा स्यादेतत्पृष्टो वदस्व मे ॥भी०॥
प्रज्ञा प्रतिष्ठा भूतानां प्रज्ञा लाभः परो मतः ॥ प्रज्ञा निःश्रेयसी लोके प्रज्ञा स्वर्गो मतः सतां ॥ प्रज्ञया प्रापितार्थो हि बलि
रैश्वर्यसंक्षये ॥ प्रह्लादो नमुचिर्मंकिस्तस्याः किं विद्यते परं ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ इंद्रकाश्यप
संवादं तन्निबोध युधिष्ठिर ॥ वैश्यः कश्चिदृषिसुतं काश्यपं संशितव्रतं ॥ रथेन पातयामास श्रीमान्दृप्तस्तपस्विनं
॥ आर्तः स पतितस्त्यक्त्वात्मानमथाब्रवीत् ॥ मरिष्याम्यधनस्येह जीवितार्थो न विद्यते ॥ तथा मुमूर्षुमासीनमकूजंतम

क्षेद

चेतसं ॥ इंद्रः सृगालरूपेण बभाषे क्षुब्धमानसं ॥ मनुष्ययोनिमिच्छंति सर्वभूतानि सर्वशः ॥ मनुष्यत्वे च विप्रत्वं सर्व एवाभि
नंदति ॥ मनुष्यो ब्राह्मणश्चासि श्रोत्रियश्चासि काश्यप ॥ सुदुर्लभमवाप्यैतन्न दोषान्मर्तुमर्हसि ॥ सर्वे लाभाः साभि
माना इति सत्या पुनाः श्रुतिः ॥ संतोषणीयरूपोसि लोभाद्यदभिमन्यसे ॥ अहो सिद्धार्थता तेषां येषां संतीह पाणयः ॥
पाणिमद्भ्यः स्पृहास्माकं यथा तव धनस्य वै ॥ न पाणिलाभादधिको लाभः कश्च न विद्यते ॥ अपाणित्वाद्वयं ब्रह्मन्
कंटकं नोद्धरामहे ॥ जंतूनुच्चावचानंगे दशतो न कषंति वा ॥ अथ येषां पुनः पाणी देवदत्तौ दशांगुली ॥ उद्धरं
ति कृमीनंगाद्दशतो निकषंति च ॥ वर्षाहिमातपानां च परित्राणानि कुर्वते ॥ चैलमन्नं सुखं शय्यां निवातं चोपभुं
जते ॥ ये खल्वजिह्माः कृपणा अल्पप्राणा अपाणयः ॥ सहंते तानि दुःखानि दिष्ट्या त्वं न तथा मुने ॥ दिष्ट्या
त्वं न सृगालो वै न कृमिर्न च मूषकः ॥ न सर्पो न च मंडूको न चान्यः पापयोनिजः ॥ एतावतापि लाभेन तोष्टु
मर्हसि काश्यप ॥ किं पुनर्योसि सत्त्वानां सर्वेषां ब्राह्मणोत्तमः ॥ इमे मां कृमयो दंति तेषामुद्धरणाय वै ॥ ना
स्ति शक्तिरपाणित्वात्पश्यावस्थामिमां मम ॥ अकार्यमिति चैवेमं नात्मानं संत्यजाम्यहं ॥ नितः पापीयसीं यो
निं पतेयमपरामपि ॥ मध्ये वै पापयोनीनां शार्गाली यामहं गतः ॥ पापीयस्यो बहुतरा इतोन्याः पापयो
नयः ॥ जात्यैवैके सुखितराः संत्यन्ये भृशदुःखिताः ॥ नैकांतं सुखमेवेह क्वचित्पश्यामि कस्यचित् ॥ म

नुष्या साध्यतां प्राप्य राज्यमिछंत्यनंतरं ॥ राज्याद्देवत्वमिछंति देवत्वादिंद्रतामपि ॥ भवेत्वं यद्यपि त्वाढ्यो न रा
जा न च दैवतं ॥ देवत्वं प्राप्य चेंद्रत्वं नैव तुष्येस्तथा सति ॥ न तृप्तिः प्रियलाभेस्ति तृष्णा नाद्भिः प्रशाम्यति ॥
संप्रज्वलति सा भूयः समिद्भिरिव पावकः ॥ अस्त्येव त्वयि शोकोपि हर्षश्चापि तथा त्वयि ॥ सुखदुःखे तथा चो
भे तत्र का परिवेदना ॥ परिछिद्यैव कामानां सर्वेषां चैव कर्मणां ॥ मूलं बुद्धींद्रियग्रामे शकुंतानिव पंजरे ॥
न खल्वप्यरसज्ञस्य कामः क्वचन जायते ॥ संस्पर्शाद्दर्शनाद्वापि श्रवणाद्वापि जायते ॥ न त्वं स्मरसि वारुण्या
ल्लाट्वकानां च पक्षिणां ॥ ताभ्यां चाप्यधिको भक्षो न कश्चिद्विद्यते क्वचित् ॥ यानि चान्यानि भूतेषु भक्ष्यजाता
नि कश्यप ॥ येषामभुक्तपूर्वाणि तेषामस्मृतिरेव च ॥ अप्राशनमसंस्पर्शमसंदर्शनमेव च ॥ पुरुषस्यै
ष नियमो मन्ये श्रेयो न संशयः ॥ पाणिमंतो बलवंतो धनवंतो न संशयः ॥ मनुष्या मानुषैरेव दासत्वमुप
पादिताः ॥ वधबंधपरिक्लेशैः क्लिश्यंते च पुनः पुनः ॥ ते खल्वपि रमंते च मोदंते च हसंति च ॥ अपरे बाहु
बलिनः कृतविद्या मनस्विनः ॥ जुगुप्सितां सुकृपणां पापवृत्तिमुपासते ॥ उत्सहंते च तां वृत्तिं मन्यामप्यु
पसेवितं ॥ स्वकर्मतु नियतं भवितव्यं तु तत्तथा ॥ न पुल्कसो न चांडाल आत्मानं त्यक्तुमिछति ॥ तया तुष्टः

स्वया योन्या यां यां पश्य स्वयादृशीं ॥ दृष्ट्वा कुणीन्पक्षहतान्मनुष्यानामयाविनः ॥ सुसंपूर्णः स्वया योन्या लब्ध
लाभोसि काश्यप ॥ यदि ब्राह्मण देहस्ते निरातंको निरामयः ॥ अंगानि च समग्राणि न च लोकेषु धिक्कृतः ॥
न केनचित्प्रवादेन सत्येनैवापहारिणा ॥ धर्मायोत्तिष्ठ विप्रर्षे नात्मानं त्यक्तुमर्हसि ॥ यदि ब्रह्मन् शृणोष्ये
तच्छ्रद्दधासि च मे वचः ॥ वेदोक्तस्यैव धर्मस्य फलं मुख्यमवाप्स्यसि ॥ स्वाध्यायमग्निसंस्कारमप्रमत्तोनुपा
लय ॥ सत्यं दमं च दानं च स्पर्द्धिष्ठा मा च केनचित् ॥ ये केचन स्वध्ययनाः प्राप्ता यजनयाजनाः ॥ कथं ते जा
तु शोचेयुर्ध्यायेयुर्वाप्यशोभनं ॥ इछंतस्ते विहाराय सुखं महदवाप्नुयुः ॥ उत जाताः सुनक्षत्रे तिथौ सु
सुमुहूर्त्तजाः ॥ यज्ञदानप्रजेहायां यजंते शक्तिपूर्वकं ॥ नक्षत्रेष्वासुरेष्वन्ये दुस्तिथौ दुर्मुहूर्त्तजाः ॥
संपतंत्यासुरीं योनिं यज्ञप्रसववर्जितां ॥ अहमासं पंडितको हैतुको वेदनिंदकः ॥ आन्विक्षिकीं तर्कवि
द्यामनुरक्तो निरर्थकां ॥ हेतुवादान्प्रवदिता वक्ता संसत्सु हेतुमत् ॥ आक्रोष्टा चाभिवक्ता च ब्रह्मवाक्ये
षु वै द्विजान् ॥ नास्तिकः सर्वशंकी च मूर्खः पंडितमानिकः ॥ तस्येयं फलनिर्वृत्तिः शृगालत्वं मम द्विज
॥ अपि जातु तथा तत्स्यादहोरात्रशतैरपि ॥ यदहं मानुषीं योनिं शृगालः प्राप्नुयां पुनः ॥ संतुष्टश्च

मोक्षधर्म०

११

प्रमतश्च यज्ञदानतपोरतः॥ ज्ञेयं ज्ञाता स्ववेयं वै वर्ज्यं वर्जयिता तथा॥ ततः समुनिरुत्थाय काश्यपस्तमुवाच
ह॥ अहो बतासि कुशलो बुद्धिमांश्चेति विस्मितः॥ समवेक्षत तं विप्रो ज्ञानदीर्घेण चक्षुषा॥ ददर्श चैनं देवा
नां देवमिंद्रं शचीपतिं॥ ततः संपूजयामास काश्यपो हरिवाहनं॥ अनुज्ञातस्तु तेनाथ प्रविवेशस्वमाल
यं॥ ॥शांतौ मोक्षधर्मे शृगालकाश्यपसंवादः॥ ॥युधिष्ठिरः॥ ॥यद्यस्ति दत्तमिष्टं वा तपस्तप्तं तथैव
च॥ गुरूणां चापि शुश्रूषां तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥आत्मनानर्थयुक्तेन पापेन विशते
मनः॥ स्वकर्म कलुषं कृत्वा कृच्छ्रे लोके विधीयते॥ दुर्भिक्षादेव दुर्भिक्षं क्लेशात्क्लेशं भयात्भयं॥ मृतेभ्यः
प्रमृतं यांति दरिद्राः पापकर्मिणः॥ उत्सवादुत्सवं यांति स्वर्गात्स्वर्गं सुखात्सुखं॥ श्रद्दधानाश्च दांता
श्चधनाढ्यशुभकारिणः॥ व्यालकुंजरदुर्गेषु सर्पचोरभयेषु च॥ हस्तावापेन गच्छंति नास्तिकाः किमतः
परं॥ प्रियदेवातिथेयाश्च वदान्याप्रियसाधवः॥ क्षेम्यमात्मवतो मार्गमास्थिता हस्तदक्षिणं॥ पुला
का इव धान्येषु पूतिका इव पक्षिषु॥ तद्विधास्ते मनुष्याणां येषां धर्मो न कारणं॥ सुशीघ्रमपि धा
वंतं विधानमनुधावति॥ शेते सह शयानेन येन येन यथा कृतं॥ उपतिष्ठति तिष्ठंतं गच्छंतमनुगच्छ ११

ति॥ करोति कुर्वतः कर्म छायेवानुविधीयते॥ येन येन यथा यद्यत्पुरा कर्मसमीहितं॥ तत्तदेव नरो भुंक्ते नित्यं वि
हितमात्मना॥ स्वकर्मफलनिक्षेपं विधानपरिरक्षितं॥ भूतग्राममिमं कालः समंतात्सन्निकर्षति॥ अचो
द्यमानानि यथा पुष्पाणि च फलानि च॥ स्वकालं नातिवर्तंते तथा कर्म पुराकृतं॥ समानश्चावमानश्च
लाभालाभौ क्षयोदयौ॥ प्रवृत्ता विनिवर्तंते विधानांते पुनः पुनः॥ आत्मना विहितं दुःखमात्मना विहितं सु
खं॥ गर्भशय्यामुपादाय भुज्यते पौर्वदैहिकं॥ बालो युवा च वृद्धश्च यत्करोति शुभाशुभं॥ तस्यां तस्यामव
स्थायां तत्फलं प्रतिपद्यते॥ यथा धेनुसहस्रेषु वत्सो विंदति मातरं॥ तथा पूर्वकृतं कर्म कर्तारमनुग
च्छति॥ समुन्नमग्रतो वस्त्रं पश्चाच्छुध्यति वारिणा॥ उपवासैः प्रतप्तानां दीर्घं सुखमनंतकं॥ दीर्घकाले
न तपसा सेवितेन तपोवने॥ धर्मनिर्धूतपापानां संपद्यंते मनोरथाः॥ शकुंताइवाकाशे मत्स्यानामिव चो नामि
दके॥ पदं यथा न दृश्येत तथा ज्ञानविदां गतिः॥ अलमन्यैरुपालंभैः कीर्तितैश्च व्यतिक्रमैः॥ पेशलं
क्ष चानुरूपं च कर्तव्यं हितमात्मनः॥ ॥शांतौ मोक्षधर्मे॥ ॥युधिष्ठिरः॥ ॥कुतः सृष्टमिदं विश्वं जग
त्स्थावरजंगमं॥ प्रलये च कमभ्येति तन्मे ब्रूहि पितामह॥ ससागरः सगगनः सशैलः सबलाह

कः॥ सभूमिः साग्निपवनो लोकोयं केन निर्मितः॥ कथं सृष्टानि भूतानि कथं वर्णविभक्तयः॥ शौचाँचंक शौ
थं तेषां धर्माधर्मविधिः कथं॥ कीदृशो जीवतां जीवः क्व वा गच्छंति ये मृताः॥ अस्माल्लोकादमुं लोकं सर्वं शंसतु
नो भवान्॥ ॥भीष्म उवाच॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं॥ भृगुणाभिहितं शास्त्रे भरद्वाजा
य पृच्छते॥ कैलासशिखरे रम्ये दृष्ट्वा दीप्यमानं महौजसं॥ भृगुं ब्रह्मर्षिमासीनं भरद्वाजोन्वपृच्छत॥
ससागरः सगगनः सशैलः सबलाहकः॥ सभूमिः साग्निपवनो लोकोयं केन निर्मितः॥ कथं सृष्टानि भूता
नि कथं वर्णविभक्तयः॥ शौचाशौचं कथं तेषां धर्माधर्मविधिः कथं॥ कीदृशो गच्छतां जीवः क्व वा गच्छंति ये
मृताः॥ परलोकमिमं चापि सर्वं शंसितुमर्हसि॥ एवं स भगवान्पृष्टो भरद्वाजेन संशयं॥ ब्रह्मर्षिर्ब्र
ह्मसंकाशः सर्वं तस्मै ततोब्रवीत्॥ ॥भृगुरुवाच॥ ॥नारायणास्याभिधानस्य कूटस्थस्याक्षरात्म
नः॥ अव्यक्तस्याप्रमेयस्य प्रकृतो परतस्य च॥ एवंभूतः स वै देवः पुरुषं चासृजद्द्विधा॥ मानसो ना
म यः पूर्वो विश्रुतो वै महर्षिभिः॥ अनादिनिधनो देवस्तथाभेद्योऽजरामरः॥ अव्यक्त इति विख्या
तः शाश्वतोथाक्षयो व्ययः॥ यतः सृष्टानि भूतानि जायंते च म्रियंति च॥ सोसृजत्प्रथमं देवो महांतं ना

मनामतः॥ आकाश इति विख्यातः सर्वभूतधरः प्रभुः॥ आकाशादभवद्वारि सलिलादग्निमारुतौ॥ अग्निमा
रुतसंयोगात्ततः समभवन्मही॥ ततस्तेजोमयं दिव्यं पद्मं सृष्टं स्वयंभुवा॥ तस्मात्पद्मात्समभवद्ब्रह्मा वेदम
यो निधिः॥ अहंकार इति ख्यातः सर्वभूतात्मभूतकृत्॥ ब्रह्मा वै समहातेजा य एते पंचधातवः॥ शैलास्तस्यास्थिसं
ज्ञास्तु मेदो मांसं च मेदिनी॥ समुद्रास्तस्य रुधिरमाकाशमुदरं तथा॥ पवनश्चैव निश्वासस्तेजोग्निर्निम्नगाः शिराः॥
अग्नीषोमौ तु चंद्रार्कौ नयने तस्य विश्रुते॥ नभश्चोर्ध्वं शिरस्तस्य क्षितिः पादौ भुजा दिशः॥ दुर्विज्ञेयो ह्यचिंत्यात्मा सि
द्धैरपि न संशयः॥ स एव भगवान्विष्णुरनंत इति विश्रुतः॥ सर्वभूतात्मभूतस्थो दुर्विज्ञेयो कृतात्मभिः॥ अहंका
रस्य यः स्रष्टा सर्वभूतभवाय वै॥ यतः समभवद्विश्वं पृष्टोहं यदिह त्वया॥ ॥भरद्वाज उवाच॥ ॥गगनस्य दि
शां चैव भूतलस्यानिलस्य च॥ कान्यत्र परिमाणानि संशयं छिंधि तत्वतः॥ ॥भृगुरुवाच॥ ॥अनंतमेतदाकाशं
सिद्धदेवतसेवितं॥ रम्यं नानाश्रयं कीर्णं यस्यांतो नाधिगम्यते॥ ऊर्ध्वंगतेरधस्थात्तु चंद्रादित्यौ न दृश्यतः॥ तत्र देवा
स्वयं दीप्ता भास्कराग्निवर्चसः॥ ते चाप्यनंतं पश्यंति नभसः प्रथितौजसः॥ दुर्गमत्वादनंतत्वादिति मे विद्धि मानद॥ उ
परिष्टोपरिष्टात्तु प्रज्वलद्भिः स्वयंप्रभैः॥ निरुद्धमेतदाकाशमप्रमेयं सुरैरपि॥ पृथिव्यंते समुद्रास्तु समुद्रांते त
मः स्मृतः॥ तमसोंते जलं प्राहुः जलस्यांते ग्निरेव च॥ रसातलांते सलिलं जलांते पन्नगाधिपः॥ तदंते पुनराकाश

मोक्षधर्म०

१३

नाकाशांते पुनर्ज्जलं ॥ एवमंतं भगवतः प्रमाणं सलिलस्य च ॥ अग्निमारुततोयेभ्यो दुर्ज्ञेयं दैवतैरपि ॥ अग्निमारुततो
यानां वर्णाः क्षितितलस्य च ॥ आकाशसदृशा ह्येते भिद्यंते तत्वदर्शनात् ॥ पठंति चैव मुनयः शास्त्रेषु विविधेषु च ॥ त्रैलो
क्ये सागरे चैव प्रमाणं विहितं यथा ॥ अदृश्याय त्वगम्याय कः प्रमाणमुदाहरेत् ॥ सिद्धानां देवतानां च यदा परिमिता ग
तिः ॥ तदा गौणमनंतस्य नामानंतेति विश्रुतं ॥ नामधेयानुरूपस्य मानसस्य महात्मनः ॥ यदा च यद्दिव्यं पद्रूपं ह्रस
ते वर्द्धते पुनः ॥ कोन्यस्तद्वेदितुं शक्तो योपि स्यात्तद्विधोपरः ॥ ततः पुष्करतः सृष्टः सर्वज्ञो मूर्तिमान्प्रभुः ॥ ब्रह्मा धर्म
मयः पूर्वः प्रजापतिरनुत्तमः ॥ ॥भरद्वाज उवाच ॥ ॥पुष्कराद्यदि संभूतो ज्येष्ठं भवति पुष्करं ॥ ब्रह्माणं पूर्वजं चाह
भवान्संदेह एव मे ॥ ॥भृगुः ॥ ॥मानसस्येह या मूर्तिर्ब्रह्मत्वं समुपागता ॥ तस्यासनविधानार्थं पृथिवी पद्ममुच्यते ॥
कर्णिका तस्य पद्मस्य मेरुर्गगनमूर्छितः ॥ तस्य मध्ये स्थितो लोकान्सृजते जगतः प्रभुः ॥ ॥शांतौ मोक्षधर्मे भृगुभारद्वाज
द्वाजसंवादः ॥ ॥भारद्वाजः ॥ ॥प्रजाविसर्गं विविधं कथं स सृजते प्रभुः ॥ मेरुमध्ये स्थितो ब्रह्मा तद्ब्रूहि द्विजसत्तम ॥ ॥
भृगुः ॥ ॥प्रजाविसर्गं विविधं मानसो मनसासृजत् ॥ संरक्षणार्थं भूतानां सृष्टं प्रथमतो जलं ॥ यत्प्राणाः सर्वभूतानां व
र्द्धंते येन च प्रजाः ॥ परित्यक्ताश्च नश्यंति तेनेदं सर्वमावृतं ॥ पृथिवी पर्वता मेघा मूर्तिमंतश्च ये परे ॥ सर्वं तद्वारुणं ज्ञेयमा
पस्तस्तभिरे पुनः ॥ ॥भरद्वाजः ॥ ॥कथं सलिलमुत्पन्नं कथं चैवाग्निमारुतौ ॥ कथं वा मेदिनी सृष्टेत्यत्र मे संशयो म

१३

हान् ॥ ॥भृगुः ॥ ॥कल्पकल्पे पुरा ब्रह्मन्ब्रह्मर्षीणां समागमे ॥ लोकसंभवसंदेहः समुत्पन्नो महात्मनां ॥ ते तिष्ठन्
ध्यानमालंब्य ध्यानमास्थाय निश्चलाः ॥ त्यक्ताहाराः स्पर्द्धमाना दिव्यं वर्षशतं द्विजाः ॥ तेषां ब्रह्ममयी वाणी सर्वेषां श्रो
त्रमागमत् ॥ दिव्या सरस्वती तत्र संबभूव नभस्तलात् ॥ पुरा स्तिमितमाकाशमनंतमचलोपमं ॥ नष्टचंद्रार्कपवनं प्र
सुप्तमिव संबभौ ॥ ततः सलिलमुत्पन्नं तमसीवापरं तमः ॥ तस्माच्च सलिलोत्पीडादुदतिष्ठत मारुतः ॥ यथा भाजनमा
च्छिद्रं निःशब्दमिव लक्ष्यते ॥ तच्चांभसा पूर्यमाणं सशब्दं कुरुतेऽनिलः ॥ यथा सलिलसंरुद्धे नभसोंते निरंतरे ॥ भित्वार्ण
वमलं वायुः समुत्पतति घोषवान् ॥ स एष चरते वायुरर्णवोत्पीडसंभवः ॥ आकाशस्थानमासाद्य प्रशांतिं नाधिगच्छति ॥ त
स्मिन्वाय्वंबुसंघर्षे दीप्ततेजा महाबलः ॥ प्रादुरभूदूर्ध्वशिखः कृत्वा निस्तिमिरं ततः ॥ अग्निः पवनसंयुक्तः खं समाक्षि
पते जलं ॥ सोग्निर्मारुतसंयोगाद्घनत्वमुपपद्यते ॥ तस्याकाशं निपततः स्नेहस्तिष्ठति योऽपरः ॥ स संघातत्वमापन्नो भू
मित्वमुपगच्छति ॥ रसानां सर्वगंधानां स्नेहानां प्राणिनां तथा ॥ भूमिर्योनिरिह ज्ञेया यस्यां सर्वं प्रसूयते ॥ ॥शांतौ मोक्ष
धर्मे ॥ ॥भरद्वाजः ॥ ॥य एते धातवः पंच ब्रह्मा यानसृजत्पुरा ॥ आवृता यैरिमे लोका महाभूताभिसंज्ञितैः ॥ यदासृज
त्सहस्राणि भूतानां स महामतिः ॥ पंचानामपि भूतत्वं कथं समुपपद्यते ॥ ॥भृगुः ॥ ॥अमितानां महाशब्दो यांति भूता
नि संभवं ॥ अतस्तेषां महाभूतशब्दोयमुपपद्यते ॥ चेष्टा वायुः खमाकाशमूष्माग्निः सलिलं द्रवः ॥ पृथिवी चात्र संघा

तः शरीरं पांचभौतिकं॥ इत्येतैः पंचभिर्भूतैर्युक्तं स्थावरजंगमाः॥ स्थावराणां न दृश्यंते शरीरे पंच धातवः॥ अनुष्मणामचे
ष्टानां घनानां चैव तत्वतः॥ वृक्षाणां नोपलभ्यंते शरीरे पंच धातवः॥ न शृण्वंति न पश्यंति न गंधरसवेदिनः॥ न च स्पर्शं
विजानंति ते कथं पांचभौतिकाः॥ अद्रवत्वादनग्नित्वादभूमित्वादवायुतः॥ आकाशस्याप्रमेयत्वाद्वृक्षाणां नास्ति भौति
कं॥ ॥भृगुः॥ ॥घनानामपि वृक्षाणामाकाशोस्ति न संशयः॥ तेषां पुष्पफलव्यक्तिनित्यं समुपपद्यते॥ ऊष्मतो म्ला
यते पर्णं त्वक् पुष्पं फलमेव च॥ म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते॥ वाय्वग्न्यशनिनिर्घोषैः फलं पुष्पं विशी
र्यते॥ श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वंति पादपाः॥ वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति॥ न ह्यदृष्टेस्तु मार्गोस्ति त
स्मात्पश्यंति पादपाः॥ पुण्यापुण्यैस्तथा गंधैर्धूपैश्च विविधैरपि॥ अरोगाः पुष्पिताः संति तस्माज्जिघ्रंति पादपाः
॥ पादैः सलिलपानं च व्याधीनां चापि दर्शनात्॥ व्याधिप्रतिक्रियात्वाच्च विद्यते रसनं द्रुमे॥ वक्त्रेणोत्पलनालेन य
थोर्ध्वं जलमाददेत्॥ तथा पवनसंयुक्तः पादैः पिबति पादपः॥ सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात्॥
जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते॥ तेन तज्जलमादत्तं जरयत्यग्निमारुतौ॥ आहारपरिणामाच्च स्नेहो
वृद्धिश्च जायते॥ जंगमानां च सर्वेषां शरीरे पंच धातवः॥ प्रत्येकशः प्रभिद्यंते यैः शरीरं विचेष्टते॥ त्वक् च मांसं तथा
स्थीनि मज्जा स्नायुश्च पंचमं॥ इत्येतदिह संघातं शरीरे पृथिवीमयं॥ तेजो ह्यग्निस्तथा क्रोधश्चक्षुरूष्मा त

थैव च॥ अग्निर्जरयते यच्च पंचाग्नेयाः शरीरिणः॥ श्रोत्रं घ्राणं तथास्यं च हृदयं कोष्ठमेव च॥ आकाशात्प्राणिनामे
ते शरीरे पंच धातवः॥ श्लेष्मा पित्तमथ स्वेदो वसा शोणितमेव च॥ इत्यापः पंचधा देहे भवंति प्राणिनां सदा॥ प्रा
णात्प्रीणयते प्राणं व्यानाद्व्यायच्छते तथा॥ गच्छत्यपानोधश्चैव समानो हृद्यवस्थितः॥ उदानादुच्छ्वसिति च प्रति
भेदाच्च भाषते॥ इत्येते वायवः पंच चेष्टयंतीह देहिनं॥ भूमेर्गंधगुणान्वेत्ति रसं चाद्भ्यः शरीरवान्॥ ज्योतिषा चक्षु
षा रूपं स्पर्शं वेत्ति च वायुना॥ गंधः स्पर्शो रसो रूपं शब्दश्चात्र गुणाः स्मृताः॥ तस्य गंधस्य वक्ष्यामि विस्तराभिहि
तान्गुणान्॥ इष्टश्चानिष्टगंधश्च मधुरः कटुरेव च॥ निर्हारी संहतः स्निग्धो रूक्षो विशद एव च॥ एवं नवविधो
ज्ञेयः पार्थिवो गंधविस्तरः॥ ज्योतिः पश्यति चक्षुर्भ्यां स्पर्शं वेत्ति च वायुना॥ शब्दः स्पर्शश्च रूपं च रसश्चापि गुणाः
स्मृताः॥ रसज्ञानं तु वक्ष्यामि तन्मे निगदतः शृणु॥ रसो बहुविधः प्रोक्तः ऋषिभिः प्रथितात्मभिः॥ मधुरो लवणः
स्तिक्तः कषायो म्लः कटुस्तथा॥ एष षड्विधविस्तारो रसो वारिमयः स्मृतः॥ शब्दः स्पर्शश्च रूपं च त्रिगुणं ज्यो
तिरुच्यते॥ ज्योतिः पश्यति रूपाणि रूपं च बहुधा स्मृतं॥ ह्रस्वो दीर्घस्तथा स्थूलश्चतुरस्रोणुवृत्तवान्॥ शुक्लः
कृष्णस्तथा रक्तो नीलः पीतारुणस्तथा॥ कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदुदारुणः॥ एवं षोडशविस्तारो
ज्योतीरूपगुणः स्मृतः॥ तत्रैकगुणमाकाशं शब्द इत्येव तत्स्मृतं॥ तस्य शब्दस्य वक्ष्यामि विस्तरं विविधात्मकं॥

षड्जऋषभगांधारमध्यमोधैवतस्तथा ।। पंचमश्चापि विज्ञेयस्तथा चापि निषादवान् ।। एष सप्तविधः प्रोक्तो गुण
आकाशसंभवः ।। ऐश्वर्येण तु सर्वत्र स्थितोपि पटहादिषु ।। मृदंगभेरीशंखानां स्तनयित्नोरथस्य च ।। एवं बहु
विधाकारः शब्दआकाशसंभवः ।। वायव्यस्तु गुणस्पर्शः स्पर्शस्तु बहुधास्मृत ।। उष्णः शीत सुखंवादुःखः स्निग्धो
विषद एव च ।। तथा खरो मृदुः श्लक्ष्णो लघु गुरुतरोपि च ।। शब्दस्पर्शौ तु विज्ञेयौ द्विगुणो वायुरित्युत ।। एवमे
कादशविधो वायव्यो गुण उच्यते ।। आकाशजं शब्दमाहुरेभिर्वायुगुणैः सह ।। अव्याहतश्चेतयते न वेत्ति विष
यं मागतैः ।। आप्यैते च ते नित्यं धातवस्तेस्तु धातुभिः ।। आपोग्निर्मारुतश्चैव नित्यं जाग्रति देहिषु ।। मूलमेते शरीर
स्य व्याप्य प्राणानिह स्थिताः ।। ।।शांतौ मोक्षधर्मे ।। ।।भरद्वाजः ।। ।।पार्थिवं धातुमासाद्य शारीरोग्निः कथं प्र पृथिवी बाल्पा
देहं चेष्टयते= वेत् ।। अवकाशविशेषेण कथं वर्त्तयतेनिलः ।। ।।भृगुः ।। ।।वायोर्गतिमहं ब्रह्मन् कथयिष्यामि तेनघ ।। प्राणि तूपांचशोतिकं
नामनलो देहान्यथा चेष्टयते बली ।। श्रितो मूर्द्धानमग्निस्तु शरीरं परिपालयन् ।। प्राणो मूर्द्धनि चाग्नौ च दे हं २
वर्त्तमानो विचेष्टते ।। स जंतुः सर्वभूतात्मा पुरुषः स सनातनः ।। मनोबुद्धिरहंकारो भूतानि विषयाश्च सः ।। एवं त्वि हं २
ह स सर्वत्र प्राणेन परिपाल्यते ।। कोष्टतस्तु समानेन स्वां स्वां गतिमुपाश्रितः ।। बस्तिमूलं गुदं चैव पावके समुपा
श्रितः ।। वहन्मूत्रं पुरीषं चाप्यपानः परिवर्त्तते ।। प्रयत्ने कर्मणि बले य एकस्त्रिषु वर्त्तते ।। उदान इति तं प्राहुरध्या

त्मविदुषो जनाः ।। संधिष्वपि च सर्वेषु सन्निविष्टस्तथानिलः ।। शरीरेषु मनुष्याणां व्यान इत्युपदिश्यते ।। धातुश्चाग्निस्तु
विततः समानेन समीरितः ।। रसान्धातूंश्च दोषांश्च वर्त्तयन्नवतिष्ठते ।। अपानप्राणयोर्मध्ये प्राणापानसमाहितः ।।
समन्वितस्त्वधिष्ठानं सम्यक्पचति पाचकः ।। आस्यं हि पायुपर्यंतमंते स्याद्गुणसंज्ञितः ।। स्रोतस्तस्मात्प्रजायंते स
र्वस्रोतांसि देहिनां ।। प्राणानां संनिपातात्संनिपातः प्रजायते ।। ऊष्मा चाग्निरिति ज्ञेयो योन्नं पचति देहिनां ।। अ
ग्निवेगवहः प्राणो गुदांते प्रतिहन्यते ।। स ऊर्ध्वमागम्य पुनः समुत्क्षिपति पावकं ।। पक्वाशयस्त्वधो नाभ्यामूर्ध्वमामा
शयः स्थितः ।। नाभिमध्ये शरीरस्य सर्वे प्राणाश्च संस्थिताः ।। प्रस्थिता हृदयात्सर्वे तिर्यगूर्ध्वमधस्तथा ।। वहंत्यन्न
रसान्नाड्यो दश प्राणप्रचोदिताः ।। एष मार्गोथ योगानां येन गच्छंति तत्पदं ।। जितक्लमासना धीरा मूर्ध्न्यात्मानमाव
धत ।। एवं सर्वेषु विहितः प्राणापानेषु देहिनां ।। तस्मिन्समिध्यनित्यमग्निः स्थाल्यमिवाहितः ।। ।।शांतौ मोक्षधर्मे ।। ।।
भरद्वाजः ।। ।। यदि प्राणायते वायुर्वायुरेव विचेष्टते ।। श्वसित्याभाषते चैव तस्माज्जीवो निरर्थकः ।। यदूष्मभाव आ
ग्नेयो वह्निना पच्यते यदि ।। अग्निर्जरयते चैव तस्माज्जीवो निरर्थकः ।। जंतोः प्रमीयमाणस्य जीवो नैवोपलभ्यते ।।
वायुरेव जहात्येनमूष्मभावश्च नश्यति ।। यदि वायुमयो जीवः संश्लेषो यदि वायुनः ।। वायुमंडलवद्दृश्येद्गच्छेत्सह मरु
द्गणैः ।। संश्लेषो यदि वातेन यदि तस्मात्प्रणश्यति ।। महार्णवविमुक्तत्वादन्यत्सलिलभाजनं ।। कूपे वा सलिलं

दग्धास्वदीपं वा हुताशने ॥ क्षिप्तं प्रविश्य नश्येत यथा नश्यत्यसौ तथा ॥ पंचधारणके ह्यस्मिन्शरीरे जीवितं कुतः ॥ तेषामन्यतमाभावाच्चतुर्णां नास्ति संशयः ॥ नश्यंत्यापो ह्यनाधानाद्वायुर्निछ्वासनिग्रहात् ॥ नश्यते कोष्ठभेदात्स्वमग्निर्नश्यत्यभोजनात् ॥ व्याधिव्रतपरिक्लेशैर्मेदिनी चैव शीर्यते ॥ पीडितेन्यतरे ह्येषां संघातो याति पंचधा ॥ तस्मिन्पंचत्वमापन्ने जीवः किमनुधावति ॥ किं वेदयति वा जीवः किं शृणोति ब्रवीति च ॥ एषा गौः परलोकस्य तारयिष्यति मामिति ॥ यो दत्वा म्रियते जंतुः सा गौः कं तारयिष्यति ॥ गौश्च प्रतिग्रहीता च दाता चैव समं यदा ॥ इहैव विलयं यांति कुतस्तेषां समागमः ॥ विहगैरुपयुक्तं च शैलाग्रात्पतितस्य च ॥ अग्निना चोपयुक्तं च कुतः संजीवनं पुनः ॥ छिन्नस्य यदि वृक्षस्य न मूलं प्रतिरोहति ॥ बीजान्यस्य प्रवर्त्तंते मृतः क्व पुनरेष्यति ॥ बीजमात्रं पुरा सृष्टं यदेतत्परिवर्त्तते ॥ मृता मृताः प्रणश्यंति बीजाद्बीजं प्रवर्त्तते ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ भृगुरुवाच ॥ ॥ न प्रणाशोस्ति जीवस्य दत्तस्य च कृतस्य च ॥ याति देहांतरं प्राणी शरीरं तु विशीर्यते ॥ न शरीराश्रितो जीवस्तस्मिन्नष्टे प्रणश्यति ॥ समिधामिव दग्धानां यथाग्निर्दृश्यते तथा ॥ ॥ भरद्वाजः ॥ ॥ अग्नेर्यथा तथा तस्य यदि नाशो न विद्यते ॥ इंधनस्योपयोगांते स चाग्निर्नोपलभ्यते ॥ आकाशानुगतत्वाद्धि दुर्ग्राह्यो हि निराश्रयः ॥ तथा शरीरसंयोगे जीवो ह्याकाशवत्स्थितः ॥ नश्यतीत्येव जानामि शांतमग्निमनिंधनं ॥ गतिर्यस्य प्रमाणं वा संस्थानं वा न विद्य

ते ॥ भृगुः ॥ ॥ समिधामुपयोगांते यथाग्निर्नोपलभ्यते ॥ आकाशानुगतत्वाद्धि दुर्ग्राह्यो हि निराश्रयः ॥ तथा शरीरसंत्यागे जीवो ह्याकाशवत्स्थितः ॥ न गृह्यते सुसूक्ष्मत्वाद्यथा ज्योतिर्न संशयः ॥ प्राणान्धारयते ह्यग्निः स जीव उपधार्यतां ॥ वायुसंधारणो ह्यग्निर्नश्यत्युच्छ्वासनिग्रहात् ॥ तस्मिन्नष्टे शरीराग्नौ ततो देहमचेतनं ॥ पतितं याति भूमित्वमयनं तस्य हि क्षितिः ॥ जंगमानां हि सर्वेषां स्थावराणां तथैव च ॥ आकाशं पवनोभ्येति ज्योतिस्तमनुगच्छति ॥ तेषां त्रयाणामेकत्वाद्द्वयं भूमौ प्रतिष्ठितं ॥ यत्र खं तत्र पवनस्तत्राग्निर्यत्र मारुतः ॥ अमूर्त्तयस्ते विज्ञेया मूर्तिमंतः शरीरिणां ॥ ॥ भरद्वाजः ॥ ॥ यद्यग्निमारुतौ भूमिः खमापश्च शरीरिषु ॥ जीवः किंलक्षणस्तत्रेत्येतदाचक्ष्व मेनघ ॥ पंचात्मके पंचरतौ पंचविज्ञानचेतने ॥ शरीरे प्राणिनां जीवं वेत्तुमिच्छामि यादृशं ॥ मांसशोणितसंघाते मेदःस्नाय्वस्थिसंचये ॥ भिद्यमाने शरीरे तु जीवो नैवोपलभ्यते ॥ यदा जीवं शरीरं तु पंचभूतसमन्वितं ॥ शारीरे मानसे दुःखे कस्तां वेदयते रुजं ॥ शृणोति कथितं जीवः कर्णाभ्यां न शृणोति तत् ॥ महर्षे मनसि व्यग्रे तस्माज्जीवो निरर्थकः ॥ सर्वं पश्यति यद्दृश्यं मनोयुक्तेन चेतसा ॥ मनसि व्याकुले चक्षुः पश्यन्नपि न पश्यति ॥ न पश्यति न चाघ्राति न शृणोति न भाषते ॥ न च स्पर्शरसौ वेत्ति निद्रावशगतः पुनः ॥ हृष्यते क्रुध्यते कोत्र शोचत्युद्विजते च कः ॥ इच्छति ध्यायति द्वेष्टि वाचमीरयते च कः ॥ ॥ भृगुः ॥ ॥ न पंचसाधारणमत्र किंचिच्छरीरमेको वहतेंतरात्मा ॥ स वेत्ति

मोक्षधर्म०

९८

गंधाश्च रसान् श्रुतीश्च स्पर्शं च रूपं च गुणाश्च येन्ये॥ पंचात्मके पंचगुणप्रदर्शी स सर्वगात्रानुगतोंतरात्मा॥ स वेत्ति दुः
खानि सुखानि चात्र तद्विप्रयोगेन च वेत्ति देही॥ यदा न रूपं न स्पर्शो नोष्मभावश्च पावके॥ तदा शांते शरीराग्नौ देह
त्यागेन नश्यति॥ आपोमयमिदं विश्वं आपो मूर्तिः शरीरिणां॥ तत्रात्मा मानसो ब्रह्मा सर्वभूतेषु लोककृत्॥ आत्म
क्षेत्रज्ञ इत्युक्तः संयुक्तः प्राकृतैर्गुणैः॥ तैरेव तु विनिर्मुक्तः परमात्मेत्युदाहृतः॥ आत्मानं तं विजानाति सर्वलोकविधा
यकं॥ तस्मिन्यः संश्रितो देहो ह्यब्बिंदुरिव पुष्करे॥ क्षेत्रज्ञं तं विजानीहि नित्यं लोकहितात्मकं॥ तमोरजश्च सत्वं
च विद्धि जीवगुणानिमान्॥ सचेतनं जीवगुणं वदंति स चेष्टते चेष्टयते च सर्वं॥ ततः परं क्षेत्रविदां वदंति प्राव
र्तयद्यो भुवनानि सप्त॥ न जीवनाशोस्ति हि जीवभेदे मिथ्यैतदाहुर्मृत इत्यबुद्धाः॥ जीवस्तु देहांतरितः प्रयाति
दशार्द्धता तस्य शरीरभेदः॥ एवं सर्वेषु भूतेषु गूढश्चरति संवृतः॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शि
भिः॥ तं पूर्वापररात्रेषु युंजानः सततं बुधः॥ लघ्वाहारो विशुद्धात्मा पश्यत्यात्मानमात्मना॥ चित्तस्य हि प्रसादेन
हित्वा कर्म शुभाशुभं॥ प्रसन्नात्मात्मनि स्थित्वा सुखमानंत्यमश्नुते॥ मानसोग्निः शरीरेषु जीव इत्यभिधीयते॥ सृ
ष्टिः प्रजापतेरेषा भूताध्यात्मविनिश्चयः॥ ॥ इति मोक्षधर्मे॥ ॥ भृगुः॥ ॥ असृजद्ब्राह्मणानेव पूर्वं ब्रह्मा प्रजा
पतिः॥ आत्मतेजोभिनिर्वृत्तान् भास्कराग्निसमप्रभान्॥ ततः सत्यं च धर्मं च तपो ब्रह्म च शाश्वतं॥ आचारं चैव शौचं

९८

च स्वर्गाय विदधे प्रभुः॥ देवदानवगंधर्वदैत्यासुरमहोरगाः॥ यक्षराक्षसनागाश्च पिशाचा मनुजास्तथा॥ ब्राह्मणाः क्ष
त्रिया वैश्याः शूद्राश्च द्विजसत्तम॥ ये चापि भूतसंघानां वर्णास्तांश्चापि निर्ममे॥ ब्राह्मणानां सितो वर्णः क्षत्रियाणां तु लो
हितः॥ वैश्यानां पीतको वर्णः शूद्राणामसितस्तथा॥ ॥ भरद्वाजः॥ ॥ चातुर्वर्ण्यस्य वर्णेन यदि वर्णो विभज्यते॥ सर्वे
षां खलु वर्णानां दृश्यते वर्णसंकरः॥ कामः क्रोधो भयं लोभः शोकश्चिंता क्षुधा श्रमः॥ सर्वेषां नः प्रभवति कस्माद्वर्णो
विभज्यते॥ स्वेदमूत्रपुरीषाणि श्लेष्मा पित्तं सशोणितं॥ तनुः क्षरति सर्वेषां कस्माद्वर्णो विभज्यते॥ जंगमानामसं
संख्येयाः स्थावराणां च जातयः॥ तेषां विविधवर्णानां कुतो वर्णविनिश्चयः॥ ॥ भृगुः॥ ॥ न विशेषोस्ति वर्णानां सर्वं
ब्राह्ममिदं जगत्॥ ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतः॥ कामभोगक्रियास्तीक्ष्णाः क्रोधनाः प्रियसाहसाः॥
त्यक्तस्वधर्मा रक्तांगास्ते द्विजाः क्षत्रतां गताः॥ गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः॥ स्वधर्मान्नानुतिष्ठं
ति ते द्विजा वैश्यतां गताः॥ हिंसानृतप्रिया लुब्धाः सर्वकर्मोपजीविनः॥ कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां
गताः॥ इत्येतैः कर्मभिर्व्यस्ता द्विजा वर्णांतरं गताः॥ धर्मो यज्ञक्रिया तेषां नित्यं न प्रतिषिध्यते॥ इत्येते चतुरो वर्णाः
येषां ब्राह्मी सरस्वती॥ विहिता ब्रह्मणा पूर्वं लोभात्वज्ञानतां गताः॥ ब्राह्मणा ब्रह्मतंत्रस्थास्तपस्तेषां न नश्यति॥
ब्रह्म धारयतां नित्यं व्रतानि नियमांस्तथा॥ ब्रह्म चैव परं सृष्टं ये न जानंति ते द्विजाः॥ तेषां बहुविधास्त्वन्यास्तत्र

मोक्षधर्मे०

१८

तत्र विज्ञातयः ॥ पिशाचा राक्षसाः प्रेता विविधा म्लेच्छजातयः ॥ प्रनष्टज्ञानविज्ञानाः स्वच्छंदाचारचेष्टिताः ॥ प्रजा
ब्राह्मसंस्कानाः स्वकर्मकृतनिश्चयाः ॥ ऋषिभिः स्वेन तपसा सृज्यंते चापरे परे ॥ आदावेव समुद्भूताः ब्रह्म
मूलाः ह्ययाव्ययाः ॥ सास्त्रष्टिर्मानसी नाम धर्मतंत्रपरायणाः ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ भरद्वाजः ॥ ॥ ब्राह्मणः
केन भवति क्षत्रियो वा द्विजोत्तम ॥ वैश्यः शूद्रश्च विप्रर्षे तद्ब्रूहि वदतां वर ॥ ॥ भृगुः ॥ ॥ जातकर्मादिभिर्यस्तु
संस्कारैः संस्कृतः शुचिः ॥ वेदाध्ययनसंपन्नः षट्सु कर्मस्ववस्थितः ॥ शौचाचारस्थितः सम्यक् विघसाशी
गुरुप्रियः ॥ नित्यव्रती ब्रह्मपरः स वै ब्राह्मण उच्यते ॥ सत्यं दानमथाद्रोह आनृशंस्यं त्रपा घृणा ॥ तपश्च दृश्य
ते यत्र स ब्राह्मण इति स्मृतिः ॥ क्षत्रजं सेवते कर्म वेदाध्ययनसंगतः ॥ दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते ॥
वित्तार्जनपरश्चैव कृष्यादानरतिः शुचिः ॥ वेदाध्ययनसंपन्नः स वैश्य इति संज्ञितः ॥ सर्वभक्षरतिर्नित्यं
सर्वकर्मकरोऽशुचिः ॥ त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥ शूद्रे चैतद्भवेल्लक्ष्यं द्विजे तच्च न विद्यते ॥ न वै
शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥ सर्वोपायैस्तु लोभस्य क्रोधस्य च विनिग्रहः ॥ एतत्पवित्रं ज्ञानानां तथा चैवा
त्मसंयमः ॥ वार्यौ सर्वात्मना तौ च श्रेयोघातार्थमुच्छ्रितौ ॥ नित्यं क्रोधाच्छ्रियं रक्षेत्तपो रक्षेच्च मत्सरात् ॥ विद्या

१८

च६ चिं६

मानापमानाभ्यामात्मानं तु प्रमादतः ॥ यस्य सर्वे समारंभा निराशीर्बंधमो द्विजः ॥ त्यागे यस्य हुतं सर्वं स
त्यागी स च बुद्धिमान् ॥ अहिंस्रः सर्वभूतानां मैत्रायणगतश्चरेत् ॥ परिग्रहान्परित्यज्य भवेद्बुध्या जितेंद्रि
यः ॥ अशोकं स्थानमातिष्ठेदिह चामुत्र चाभयं ॥ तपोनित्येन दांतेन मुनिना संयतात्मना ॥ अजितं जे
तुकामेन भाव्यं संगेष्वसंगिना ॥ इंद्रियैर्गृह्यते यद्यत्तत्तद्व्यक्तमिति स्थितिः ॥ अव्यक्तमिति विज्ञेयं लिंगग्रा
ह्यमतींद्रियं ॥ अविस्रंभे न गंतव्यं विस्रंभे धारयेन्मनः ॥ मनः प्राणे निगृह्णीयात्प्राणं ब्रह्मणि धारये
त् ॥ निर्वेदादेव निर्वाणं नैकिंचिद्विचिंतयेत् ॥ सुखं वै ब्राह्मणो ब्रह्म निर्वेदेनाधिगच्छति ॥ शौचेन सततं युक्तः
सदाचारसमन्वितः ॥ सानुक्रोशश्च भूतेषु तद्द्विजातिषु लक्षणं ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ भृगुः ॥ ॥
सत्यं ब्रह्म तपः सत्यं सत्यं विसृजते प्रजाः ॥ सत्येन धार्यते लोकः स्वर्गं सत्येन गच्छति ॥ अनृतं तमसो रू
पं तमसा नीयते ह्यधः ॥ तमोग्रस्ता न पश्यंति प्रकाशं तमसावृताः ॥ स्वर्गः प्रकाश इत्याहुर्नरकं तम एव
च ॥ सत्यानृतं तदुभयं प्राप्यते जगतीचरैः ॥ तत्राप्येवं विधा लोके वृत्तिः सत्यानृते भवेत् ॥ धर्माधर्मौ प्र
काशश्च तमो दुःखं सुखं तथा ॥ तत्र यत्सत्यं स धर्मो यो धर्मः स प्रकाशो यः प्रकाशस्तत्सुखमिति ॥ तत्र य

= अविस्रंभे सत्ताति
नानि मिने सति
न गंतव्यं नम्रा
पं ।अतः विप्रो
मे गुरुपेद्यान्वे
५

च

मोक्षधर्म

१९

नृतंसोधर्मोयोधर्मस्तत्तमोयत्तमस्तद्दुःखमिति।। ।।अत्रोच्यते।। ।।शारीरैःमानसैर्दुःखैःसुखैश्चाप्यसुखोद
यैः।।लोकसृष्टिंप्रपश्यंतोनमुह्यंति विचक्षणाः।।तत्रदुःखविमोक्षार्थंप्रयतेत विचक्षणाः।।मुह्यंति नित्यं
भूतानामिहलोकेपरत्रच।।राहुग्रस्तस्यसोमस्ययथाज्योत्स्नानभासते।।तथातमोभिभूतानांभूतानांनश्य
तेसुखं।।तत्खलुद्विविधंसुखमुच्यते।।शारीरंमानसंच।।इहखल्वमुष्मिंश्चलोकेवस्तुप्रवृत्तयःसुखा =दृष्टादृष्टफलाः
र्थमभिधीयते।।नह्यतःपरंत्रिवर्गफलाद्विशिष्टतरमस्ति।।सएषकाम्योगुणविशेषोधर्मार्थगुणार अभिधीयंते
म्भस्तद्धेतुरस्योत्पत्तिः।।सुखप्रयोजनार्थआरंभः।। ।।भरद्वाजः।। ।।यदेतद्भवताभिहितंसुखानांपर
स्थितिरि मास्त्रियइति।।नतदुपगृह्णीमोनह्येषामृषीणांमहतिस्थितानामप्राप्यएषकाम्योगुणविशेषोन
ति चैवमभिलषंतिच।।तपसिश्रूयतेत्रिलोककृद्ब्रह्मास्त्वेकाकीतिष्ठतिब्रह्मचारीनकामसुखेष्वात्मान प्र४
श्च मवदधाति।।अपिचभगवान्विश्वेश्वरउमापतिःकाममभिवर्तमानमनंगत्वेनशममनयत्।।तस्माद्ब्रू
मोनतुमहात्मभिरयंप्रतिगृहीतोनत्वेषतावद्विशिष्टोगुणविशेषइति।।नैतद्भगवतःप्रत्येमिभवतातू
क्तंसुखानांपरमास्त्रियइति।।लोकप्रवादोहिद्विविधःफलोदयः।।सुकृतात्सुखमवाप्यतेदुष्कृताद्दुः

१९

खमिति।। ।।भृगुः।। ।।अत्रोच्यते।।अनृतात्खलुतमःप्रादुर्भूतंततस्तमोग्रस्ताअधर्ममेवानुवर्तंते।।नध
र्मं।।क्रोधलोभमोहहिंसानृतादिभिरवच्छन्नाः।।नखल्वस्मिन्लोकेनामुत्रसुखमाप्नुवंति।।विविधव्या
धिरुजोपतापैरवकीर्यंते।।वधबंधनपरिक्लेशादिभिश्च।।क्षुत्पिपासाश्रमकृतैरुपतापैरुपतप्यंते।।वर्षवातातपत्यु
ति ष्णौशीतकृतैश्चप्रतिभयैःशारीरैःदुःखैरुपतप्यंते।।बंधुधनविनाशविप्रयोगकृतैश्चमानसैःशोकैरभिभूयंते
जरामृत्युकृतैश्चान्यैरिति।।यस्त्वेतैःशारीरैर्मानसैर्दुःखैर्नसंस्पृश्यतेनसुखंवेदयति।।नचैतेदोषाःस्व
र्गेप्रादुर्भवंति।।तत्रखलुभवंति।।सुसुखःपवनःस्वर्गेगंधश्चसुरभिस्तथा।।क्षुत्पिपासाश्रमोनास्तिनजरा
नचपापकं।।नित्यमेवसुखंस्वर्गेसुखंदुःखमिहोभयं।।नरकेदुःखमेवाहुःसुखंतत्परमंपदं।।पृथिवीसर्व
भूतानांजनित्रीतद्विधाःस्त्रियः।।पुमान्प्रजापतिस्तत्रशुक्रंतेजोमयंविदुः।।इत्येतल्लोकनिर्वाणंब्रह्म
णाविहितंपुरा।।प्रजाःसमनुवर्तंतेस्वैःस्वैःकर्मभिरावृताः।। ।।भृगौमोक्षधर्मे।। ।।भरद्वाजः।। ।।दान
स्यकिंफलंप्राहुर्धर्मस्यचरितस्यच।।तपसश्चसुतप्तस्यस्वाध्यायस्यहुतस्यच।। ।।भृगुः।। ।।हुतेनशा
म्यतेपापंस्वाध्यायेशांतिरुत्तमा।।दानेनभोगानित्याहुस्तपसास्वर्गमाप्नुयात्।।दानंतुद्विविधंप्रा

मोक्षधर्म० हुः पवचनार्थमिहैव च॥ सद्भ्याय द्दीयते दानं तत्सर्वं पतिष्ठते॥ असद्भ्यो दीयते यत्तु तद्दानमिह भुज्यते॥ या
२० दृशं दीयते दानं तादृशं फलमश्नुते॥ ॥भरद्वाजः॥ ॥किंकस्य धर्माचरणं किं वा धर्मस्य लक्षणं॥ ध
र्मः कतिविधो वापि तद्भवान् वक्तुमर्हसि॥ ॥भृगुः॥ ॥स्वधर्माचरणे युक्ता ये भवंति मनीषिणः॥ तेषां
स्वर्गफलावाप्तिर्योन्यथा स विमुह्यते॥ ॥भरद्वाजः॥ ॥यदेतच्चातुराश्रम्यं ब्रह्मर्षिविहितं पुरा॥ तेषां
स्वे स्वे सदाचारास्तान्मे वक्तुमिहार्हसि॥ ॥भृगुः॥ ॥पूर्वमेव भगवता ब्रह्मणा लोकहितमनुतिष्ठता ग
धर्मसंरक्षणार्थमाश्रमाश्चत्वारोभिनिर्दिष्टाः॥ तत्र गुरुकुलवासमेव प्रथममाश्रममेव मुदाहरं
ति॥ सम्यगत्र शौचसंस्कारनियमव्रतनियतात्मा॥ उभे संध्ये भास्कराग्निदैवतान्युपस्थाय विहा
य तंद्रालस्ये गुरोरभिवादनवेदाभ्यासश्रवणपवित्रीकृतांतरात्मा त्रिषवणमुपस्पृश्य ब्रह्म
चर्याग्निपरिचरणगुरुशुश्रूषानित्यभिक्षाभैक्षादिसर्वनिवेदितांतरात्मा गुरुवचननिर्देशानुष्ठा
नाप्रतिकूलो गुरुप्रसादलब्धस्वाध्यायतत्परः स्यात्॥ भवति चात्र श्लोकः॥ ॥गुरुं यस्तु समाराध्य
द्विज वेदमवाप्नुयात्॥ तस्य स्वर्गफलावाप्तिः सिध्यते चास्य मानसमिति॥ गार्हस्थ्यं खलु द्वितीय २०

माश्रमं वदंति॥ तस्य समुदाचारलक्षणं सर्वमनुव्याख्यास्यामः॥ समावृत्तानां सदाचाराणां सहधर्मचर्यफलार्थिनां गृ
हाश्रमो विधीयते॥ धर्मार्थकामावाप्तिर्ह्यत्र त्रिवर्गसाधनमवेक्ष्यागर्हितेन कर्मणा॥ धनान्यादाय स्वाध्यायप्रकर्षोपलब्धेन
वा ब्रह्मर्षिनिर्मितेन वा॥ अद्रिसारगतेन वा हव्यकव्यनियमाभ्यासदैवतप्रसादोपलब्धेन वा धनेन गृहस्थो गार्हस्थ्यं
वर्तयेत्॥ तद्धि सर्वाश्रमाणां मूलमुदाहरंति॥ गुरुकुलवासिनः परिव्राजका ये चान्ये संकल्पितव्रतनियमधर्मानु
ष्ठायिनः॥ तेषामप्यत एव भिक्षाबलिसंविभागाः प्रवर्तंते॥ वानप्रस्थानां च द्रव्योपस्कार इति प्रायशः खल्वेते साध ख
वः साधुपथ्योदनाः स्वाध्यायप्रसंगिनः तीर्थाभिगमनदेशदर्शनार्थं पृथिवीं पर्यटंति॥ तेषां प्रत्युपस्थानाभिगम
नम्यानसूयावाक्प्रदानसुखः शक्त्यासनशयनाभ्यवहारसत्क्रिया चेति॥ भवति चात्र श्लोकः॥ अतिर्यस्य स थि
ग्नाशो गृहात्प्रतिनिवर्त्तते॥ स दत्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति॥ अपि चात्र यज्ञक्रियाभिर्देवताः प्रीयंते॥ नि
वापेन पितरो विद्याभ्यासश्रवणधारणेन ऋषयः॥ अपत्योत्पादनेन प्रजापतिरिति॥ श्लोकौ चात्र भवतः॥ सर्व त्स
ल्याः सर्वभूतेभ्यो वाच्याः श्रोत्रसुखा गिरः॥ परिवादोपघातश्च पारुष्यं चात्र गर्हितं॥ अवज्ञानमहंकारो दंभश्चैव
विगर्हितः॥ अहिंसा सत्यमक्रोधः सर्वाश्रमगतं तपः॥ अपि चात्र माल्याभरणवस्त्राभ्यंगनित्योपभोगनृत्यगीतवा
दित्रश्रुतिसुखनयनाभिरामदर्शनानां प्राप्तिर्भक्ष्यभोज्यलेह्यपेयचोष्याणामभ्यवहार्याणां विविधानामुपभो

गस्त्वविहारसंतोष्यकामसुखावाप्तिरिति॥ श्लोकौ चात्र भवतः॥ त्रिवर्गगुणनिर्वृत्तिर्यस्य नित्यं गृहाश्रमे॥ ससुखान्य
नु भूयेह शिष्टानां गतिमाप्नुयात्॥ उंछवृत्तिर्गृहस्थो यःस्वधर्माचरणे रतः॥ त्यक्तकामसुखारंभःस्वर्गस्तस्य न दुर्ल
भः॥ ॥शांतौ मोक्षधर्मे॥ ॥भृगुः॥ ॥वानप्रस्थाःखल्वपि धर्ममनुसरंतः॥ पुण्यानि तीर्थानि॥ नदीप्रस्रवणादी
नि सुविविक्तेष्वरण्येषु मृगमहिषवराहशार्दूलवनगजाकीर्णेषु तपस्यंतोऽनुसंचरंति त्यक्तग्राम्यवस्त्राभ्यवहारोपभो
गाः वन्यौषधिफलमूलपर्णपरिमितविचित्रनियताहाराः स्थानासनिनो भूमिपाषाणसिकताशर्करावालुका
भस्मशायिनः काशकुशचर्मवल्कलसंवृतांगाः केशश्मश्रुनखरोमधारिणो नियतकालोपस्पर्शनाः॥ अस्कं
दितकालबलिहोमानुष्ठायिनः समित्कुशकुसुमोपहारसंमार्जनलब्धविश्रामाः शीतोष्णवर्षपवनविष्टंभवि
भिन्नसर्वत्वचो विविधनियमयोगचर्यानुष्ठानविहितपरिशुष्कमांसशोणितत्वगस्थिभूता धृतिपराः स
त्वयोगाच्छरीरण्युद्वहंते॥ श्लोकश्चात्र भवति॥ यस्त्वेतां नियतश्चर्यां ब्रह्मर्षिविहितां चरेत्॥ स दहेदग्निवद्दोषान्
जयेल्लोकांश्च दुर्जयान्॥ परिव्राजकानां पुनराचारः॥ तद्यथा॥ विमुच्याग्निं धनं कलत्रपरिबर्हं संगेष्वात्मनः स्नेहपा
शानवधूय परिव्रजंति॥ समलोष्टाश्मकांचनास्त्रिवर्गप्रवृत्तेष्वसक्तबुद्धयः॥ अरिमित्रोदासीनानां तुल्यदर्शनाः॥
च स्थावरजरायुजांडजस्वेदजोद्भिजानां भूतानां वाङ्मनःकर्मभिरनभिद्रोहिणोऽनिकेताः पर्वतपुलिनवृक्षमूलदे

वतायतनान्यनुचरंति वासार्थमुपेयुर्नगरं ग्रामं वा नगरे पंचरात्रिका ग्रामे चैकरात्रिकाः प्रविश्य च प्राणधारणार्थं॥ द्विजा
तीनां भवनानि॥ असंकीर्णकर्मणामुपतिष्ठेयुः॥ पात्रपतिताया चितभैक्ष्याः कामक्रोधलोभदर्पमोहकार्पण्यदंभ
परिवादाभिमानहिंसानिवृत्ता इति॥ भवंति चात्र श्लोकाः॥ अभयं सर्वभूतेभ्यो दत्वा यश्चरते मुनिः॥ न तस्य सर्वभू
तेभ्यो भयमुत्पद्यते क्वचित्॥ कृत्वाग्निहोत्रं स्वशरीरसंस्थं शारीरमग्निं स्वमुखे जुहोति॥ विप्रस्तु भैक्ष्योपगतैर्हविर्भिश्चि प
ताग्निना स व्रजते हि लोकान्॥ मोक्षाश्रमं यश्चरते यथोक्तं शुचिःसुसंकल्पितयुक्तबुद्धिः॥ अनिंधनं ज्योतिरिव प्रशां
तं स ब्रह्मलोकं श्रयते द्विजातिरिति॥ ॥भरद्वाजः॥ ॥अस्माल्लोकात्परो लोकः श्रूयते नोपलभ्यते॥ तमहं ज्ञातुमि
च्छामि तद्भवान्वक्तुमर्हसि॥ ॥भृगुः॥ ॥उत्तरे हिमवत्पार्श्वे पुण्ये सर्वगुणान्विते॥ पुण्यः क्षेम्यश्च काम्यश्च स परो
लोक उच्यते॥ तत्र ह्यपापकर्माणः शुचयोऽत्यंतनिर्मलाः॥ लोभमोहपरित्यक्ता मानवा निरुपद्रवाः॥ स स्वर्गसदृशो दे ह
शस्तत्र ह्युक्ताः शुभा गुणाः॥ काले मृत्युः प्रभवति स्पृशंति व्याधयो न च॥ न लोभः परदारेषु स्वदारनिरतो जनाः॥ ना
न्योन्यं वध्यते तत्र द्रव्येषु च न विस्मयः॥ परोक्षधर्मो नैवास्ति संदेहो नापि जायते॥ कृतस्य तु फलं तत्र प्रत्यक्षमुप
लभ्यते॥ यानासनाशनोपेताः प्रासादभवनाश्रयाः॥ सर्वकामैर्वृताः केचिद्धेमाभरणभूषिताः॥ प्राणधारणमात्रं तु
केषांचिदुपपद्यते॥ श्रमेण महता केचित्कुर्वंति प्राणधारणं॥ इह धर्मपराः केचित्केचिन्नैकृतिका नराः॥ सुखिता

दुःखिता केचिन्निर्धना धनिनो परे ॥ इहाश्रमो भयं मोहः क्षुधा तीव्रा च जायते ॥ लोभश्चार्थकृतो नॄणां येन मुह्यंति
पंडिताः ॥ इह वार्ता बहुविधा धर्माधर्मस्य कर्मणः ॥ यस्तद्वेदोभयं प्राज्ञः पाप्मना न स लिप्यते ॥ सोपाधिं निकृतिं स्तेयं प
रिवादोभ्यसूयिता ॥ परोपघातो हिंसा च पैशुन्यमनृतं तथा ॥ एतान्नासेवते यस्तु तपस्तस्य प्रहीयते ॥ यस्त्वेतान्नाचरे
द्विद्वांस्तपस्तस्य विवर्द्धते ॥ इह चिंता बहुविधा धर्माधर्मस्य कर्मणः ॥ कर्मभूमिरियं लोके इह कृत्वा शुभाशुभं ॥
शुभैः शुभमवाप्नोति तथाऽशुभमतोन्यथा ॥ इह प्रजापतिः पूर्वं देवाः सर्षिगणास्तथा ॥ इष्टेष्टतपसः पूता ब्रह्मलोक
मुपाश्रिताः ॥ उत्तरः पृथिवीभागः सर्वपुण्यतमः शुभः ॥ इहस्थास्तत्र जायंते ये वै पुण्यकृतो जनाः ॥ यदि सत्कारमि
यांति तिर्यग्योनिषु वा परे ॥ क्षीणायुषस्तथा चान्ये नश्यंति पृथिवीतले ॥ अन्योन्यभक्षणासक्ता लोभमोहस्स
मन्विताः ॥ इहैव परिवर्तंते न ते यांत्युत्तरां दिशं ॥ ये गुरूंश्च पर्युपासंते नियता ब्रह्मचारिणः ॥ पंथानं सर्वलोकानां
विजानंति मनीषिणः ॥ इत्युक्तोयं मया धर्मः संक्षिप्तो ब्रह्मनिर्मितः ॥ धर्माधर्मौ हि लोकस्य यो वै वेत्ति स बुद्धि
मान् ॥ ॥श्रीभृउवाच॥ ॥ इत्युक्तो भृगुणा राजन् भारद्वाजः प्रतापवान् ॥ भृगुं परमधर्मात्मा विस्मितः प्रत्यपूज
यत् ॥ एष ते प्रसवो राजन् जगतः संप्रकीर्तितः ॥ निखिलेन महाप्राज्ञ किं भूयः श्रोतुमिच्छसि ॥ ॥ शांतौ मो
क्षधर्मे भृगुभारद्वाजसंवादः समाप्तः ॥ ॥युधिष्ठिर उवाच ॥ ॥आचारस्य विधिं तात प्रोच्यमानं त्वया २२

मिच्छा

त्वयानघ ॥ श्रोतुंमि धर्मज्ञ सर्वज्ञो ह्यसि मे मतः ॥ ॥श्रीभृउवाच॥ ॥ दुराचारा दुर्विचेष्टा दुष्प्रज्ञाः प्रियसाहसाः ॥ अ
संत इति विख्याताः संतश्चाचारलक्षणाः ॥ पुरीषं यदि वा मूत्रं ये न कुर्वंति मानवाः ॥ राजमार्गे गवां मध्ये धान्यम
ध्ये शिवालये ॥ अग्न्यागारे नदीतीरे येन कुर्वंति ते शुभाः ॥ शौचमावश्यकं कृत्वा देवतानां च तर्पणं ॥ धर्ममाहुर्मनु
ष्याणामुपस्पृश्य नदीं तरेत् ॥ सूर्यं सदोपतिष्ठेत न च सूर्योदये स्वपेत् ॥ सायं प्रातर्जपेत्संध्यां तिष्ठन्पूर्वां तथेतरां ॥

पाणिपादौ मुखं चेति पंच

॥पंचार्द्रो भोजनं भुंज्यात् प्राङ्मुखो मौनमास्थितः ॥ न निंद्यादन्नभक्ष्यांश्च स्वाद्वस्वादु च भक्षयेत् ॥ नार्द्रपाणिः समु
त्तिष्ठेन्नार्द्रपादः स्वपेन्निशि ॥ देवर्षिर्नारदः प्राह एतदाचारलक्षणं ॥ शोचिष्ठं ग्राममनड्वाहं देवगोष्ठं चतुष्पथं ॥

=अग्निशाला

ब्राह्मणं धार्मिकं चैव नित्यं कुर्यात्प्रदक्षिणं ॥ अतिथीनां च सर्वेषां प्रेष्याणां स्वजनस्य च ॥ सामान्यं भोजनं भृत्यैः पुरु
षस्य प्रशस्यते ॥ सायं प्रातर्मनुष्याणामशनं देवनिर्मितं ॥ नांतरा भोजनं दृष्टमुपवासी तथा भवेत् ॥ होमकाले यथा
जुह्वन्नृतुकाले तथा व्रजन् ॥ अनन्यस्त्रीजनः प्राज्ञो ब्रह्मचारी तथा भवेत् ॥ अमृतं ब्राह्मणोच्छिष्टं जनन्या हृदयं कृ
तं ॥ तज्जनाः पर्युपासंते सत्यं संतः समासते ॥ लोष्टमर्दी तृणच्छेदी नखखादी तु यो नरः ॥ नित्योच्छिष्टः संकुसुको नेहायु
र्विंदते सतत् ॥ यजुषा संस्कृतं मांसं निर्वृत्तो मांसभक्षणात् ॥ न भक्षयेद्वृथा मांसं पृष्ठमांसं च वर्जयेत् ॥ स्वदेशे प
रदेशे वाप्यतिथिं नोपवासयेत् ॥ काम्यं कर्मफलं लब्ध्वा गुरूणामुपपादयेत् ॥ गुरुभ्य आसनं देयं कर्तव्यं चाभि

=मातुर्हृदय
मिव हितंकृ
तं धात्री

३३

प्रशस्तं= वालंगो पृष्ठं=

कृतोदने=

वादनं ॥ गुरून्नभ्यर्च्य युज्यंते आयुषा यशसा श्रिया ॥ नेक्षेतादित्यमुद्यंतं न च नग्नां परस्त्रियं ॥ मैथुनं सततं धर्म्यं गुह्ये चैव
समाचरेत् ॥ तीर्थानां हृदयं तीर्थं शुचीनां हृदयं शुचि ॥ सर्वमार्यकृतं चौक्ष्यं वालसंस्पर्शनादि च ॥ दर्शने दर्शने नि
त्यं सुखप्रश्नमुदाहरेत् ॥ सायं प्रातश्च विप्राणां शिष्टमभिवादनं ॥ देवागारे गवां मध्ये ब्राह्मणानां क्रियापथे ॥ स्वाध्याये
भोजने चैव दक्षिणं पाणिमुद्धरेत् ॥ सायं प्रातश्च विप्राणां पूजनं च यथाविधि ॥ पण्यानां शोभते पण्यं कृषीणां बाध्यते
कृषिः ॥ बहुकारं च सस्यानां वाह्ये वाहे गवां तथा ॥ संपन्नं भोजये न्नित्यं पानीये तर्पणं तथा ॥ सुशृतं पायसं ब्रूयाद्
वा गवां कृशरं तथा ॥ श्मश्रुकर्मणि संप्राप्ते क्षुते स्नाने च भोजने ॥ व्याधितानां च सर्वेषामायुष्यमभिनंदनं ॥ प्रत्यादित्यं न
मेहेत न पश्येदात्मनः शकृत् ॥ सह स्त्रियाथ शयनं सह भोज्यं च वर्जयेत् ॥ त्वंकारं नामधेयं च ज्येष्ठानां परिवर्जये
त् ॥ अवराणां समानानामुभयेषां न दुष्यति ॥ हृदयं पापवृत्तीनां पापमाख्याति वैकृतं ॥ ज्ञानं पूर्वं विनश्यंति गूहमा
ना महाजने ॥ ज्ञानपूर्वं कृतं पापं छादयंत्यबहुश्रुताः ॥ नैनं मनुष्याः पश्यंति पश्यंत्येनं दिवौकसः ॥ पापेनापिहितं
पापं पापमेवानुवर्त्तते ॥ धर्मेणापिहितो धर्मो धर्ममेवानुवर्त्तते ॥ पापं कृतं न स्मरतीह मूढो विवर्त्तमानस्य तदेति
कर्त्तुः ॥ राहुर्यथा चंद्रमुपैति चापि तथाबुधं पापमुपैति कर्म ॥ आशया संचितं द्रव्यं दुःखेनैवोपभुज्यते ॥ तद्बुधा न
प्रशंसंति मरणं न प्रतीक्षते ॥ मानसं सर्वभूतानां धर्ममाहुर्मनीषिणः ॥ तस्मात्सर्वेषु भूतेषु मनसा शिवमाच

रेत् ॥ एक एव चरेद्धर्मं नास्ति धर्मसहायता ॥ केवलं विधिमासाद्य सहायः किं करिष्यति ॥ धर्मो योनिर्मुष्यां देवानाममृतं
दिवि ॥ प्रेत्यभावे सुखं धर्माच्छश्वत्तैरुपभुज्यते ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिरः ॥ ॥ अध्यात्मं नाम यदिदं पुरुषस्ये
ह चिंत्यते ॥ यदध्यात्मं यथा वैतत् तन्मे ब्रूहि पितामह ॥ कुतः सृष्टमिदं विश्वं ब्रह्मन्स्थावरजंगमं ॥ प्रलये च कमभ्येति
तन्मे वक्तुमिहार्हसि ॥ ॥ भीष्म उवाच ॥ ॥ अध्यात्ममिति मां पार्थ यदेतदनुपृच्छसि ॥ तद्व्याख्यास्यामि ते तात श्रेयस्करत
मं सुखं ॥ सृष्टिप्रलयसंयुक्तमाचार्यैः परिदर्शितं ॥ यज्ज्ञात्वा पुरुषो लोके प्रीतिं सौख्यं च विंदति ॥ फललाभश्च तस्य स्या
सर्वभूतहितं च तत् ॥ पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं ॥ महाभूतानि भूतानां सर्वेषां प्रभवाप्ययो ॥ यतः सृ
ष्टानि तत्रैव तानि यांति पुनः पुनः ॥ महाभूतानि भूतेभ्यः सागरस्योर्मयो यथा ॥ प्रसार्य च यथांगानि कूर्मः संहरते पुनः ॥
तद्वद्भूतानि भूतात्मा सृष्टानि ग्रसते पुनः ॥ महाभूतानि पंचैव सर्वभूतेषु भूतकृत् ॥ अकरोत्तेषु वैषम्यं तत्तु जीवो न
पश्यति ॥ शब्दः श्रोत्रं तथा खानि त्रयमाकाशयोनिजं ॥ वायोः स्पर्शस्तथा चेष्टा त्वक्चैवं त्रितयं स्मृतं ॥ रूपं चक्षुस्तथा पाक
स्त्रिविधं तेज उच्यते ॥ रसः क्लेदश्च जिह्वा च त्रयो जलगुणाः स्मृताः ॥ घ्रेयं घ्राणं शरीरं च एते भूमिगुणास्त्रयः ॥ महाभूता
नि पंचैव षष्ठं च मन उच्यते ॥ इंद्रियाणि मनश्चैव विज्ञानान्यस्य भारत ॥ सप्तमी बुद्धिरित्याहुः क्षेत्रज्ञः पुनरष्टमः ॥ चक्षु
चालोकनायैव संशयः कुरुते मनः ॥ बुद्धिरध्यवसानाय क्षेत्रज्ञः साक्षिवत् स्थितः ॥ ऊर्ध्वं पादतलाभ्यां यदर्वाक् चो

नुष्या

र्ध्वं च पश्यति ॥ एतेन सर्वमेवेदं विध्यभिव्याप्तमंतरं ॥ पुरुषेसिंद्रियाणीह वेदितव्यानि कृत्स्नशः ॥ तमो रजश्च सत्वं च तेपि भावा
स्तदाश्रिताः ॥ एतां बुध्वा नरो बुध्या भूतानामागतिं गतिं ॥ समवेक्ष्य शनैश्चैव लभते शममुत्तमं ॥ गुणान्नेनीयते बुद्धिर्बुद्धि
रेवेंद्रियाण्यपि ॥ मनःषष्ठानि सर्वाणि बुध्यभावे कुतो गुणाः ॥ इति तन्मयमेवैतत्सर्वं स्थावरजंगमं ॥ प्रलीयते चोद्भवति
तस्मान्निर्दिश्यते तथा ॥ येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते ॥ जिघ्रति घ्राणमित्याहू रसं जानाति जिह्वया ॥ त्व
चा स्पर्शयते स्पर्शं बुद्धिर्विक्रियतेऽसकृत् ॥ येन प्रार्थयते किंचित्तदा भवति तन्मनः ॥ अधिष्ठानानि बुद्धेर्हि पृथग
र्थानि पंचधा ॥ इंद्रियाणीति तान्याहुस्तान्यदृष्टोऽधितिष्ठति ॥ पुरुषे तिष्ठती बुद्धिस्त्रिषु भावेषु वर्तते ॥ कदाचिल्लभते
प्रीतिं कदाचिदनुशोचति ॥ न सुखेन न दुःखेन कदाचिदनुवर्तते ॥ एवं नराणां मनसि त्रिषु भावेष्ववस्थिता ॥ सेयं भा
वात्मिका भावास्त्रीनेतानतिवर्त्तते ॥ सरितां सागरो भर्त्ता महावेलामिवोर्मिवान् ॥ अतिभावगता बुद्धिर्भावे मनसि प्रव
र्त्तते ॥ प्रवर्तमानं तु रजस्तद्भावमनुवर्त्तते ॥ इंद्रियाणि च सर्वाणि प्रवर्तयति सा यदा ॥ प्रीतिः सत्वं रजः शोकस्तमो मो
हस्तु ते त्रयः ॥ ये ये च भावा लोकेस्मिन्सर्वेष्वेतेषु वै त्रिषु ॥ इति बुद्धिगतिः सर्वाः व्याख्याता तव भारत ॥ ये ये च भावा लोकेस्मि
न्सर्वेष्वेतेषु वै त्रिषु ॥ इति बुद्धिगतिः सर्वा व्याख्याता तव भारत ॥ इंद्रियाणि च सर्वाणि विजेतव्यानि धीमता ॥ सत्वं रजस्त
मश्चैव प्राणिनां संश्रिताः सदा ॥ त्रिविधा वेदना चैव सर्वसत्वेषु दृश्यते ॥ सात्विकी राजसी चैव तामसी चेति भारत ॥

सुखस्पर्शः सत्वगुणो दुःखस्पर्शो रजोगुणः ॥ तमोगुणेन संयुक्तौ भवतोव्यवहारिकौ ॥ तत्र यत्प्रीतिसंयुक्तं काये मन
सि वा भवेत् ॥ वर्त्तते सात्विको भाव इत्यवेक्षेत तत्तथा ॥ अथ यद्दुःखसंयुक्तमप्रीतिकरमात्मनः ॥ प्रवृत्तं रज इत्येव त
न्न संरभ्य चिंतयेत् ॥ अथ यन्मोहसंयुक्तमव्यक्तविषयं भवेत् ॥ अतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ प्रहर्षः प्री
तिरानंदः सुखं संशांतचित्तता ॥ कथंचिदभिवर्त्तंत इत्येते सात्विका गुणाः ॥ अतुष्टिः परितापश्च शोको लोभस्तथा
क्षमा ॥ लिंगानि रजसस्तानि दृश्यंते हेत्वहेतुतः ॥ अवमानस्तथा मोहः प्रमादः स्वप्नतंद्रिता ॥ कथंचिदभिवर्तंते वि
विधास्तामसा गुणाः ॥ दूरगं बहुधागामि प्रार्थनासंशयात्मकं ॥ मनः सुनियतं यस्य स सुखी प्रेत्य चेह च ॥ सत्वक्षे
त्रज्ञयोरेतदंतरं पश्य सूक्ष्मयोः ॥ सृजते तु गुणानेक एको न सृजते गुणान् ॥ मशकोदुंबरौ वापि संप्रयुक्तौ
न्य यथा सदा ॥ अन्योंमेतौ स्यातां च संप्रयोगस्तथा तयोः ॥ पृथग्भूतौ प्रकृत्या तौ संप्रयुक्तौ च सर्वदा ॥ यथा मत्स्यो
जलं चैव संप्रयुक्तौ तथैव तौ ॥ न गुणा विदुरात्मानं स गुणान्वेत्ति सर्वशः ॥ परिद्रष्टा गुणानां तु संस्रष्टा मन्यते तथा
॥ इंद्रियैस्तु प्रदीपार्थं कुरुते बुद्धिसप्तमैः ॥ निर्विचेष्टैरजानद्भिः परमात्मा प्रदीपवत् ॥ सृजते हि गुणान्सत्वं क्षे
त्रज्ञः परिपश्यति ॥ संयोगस्तयोरेषः सत्वक्षेत्रज्ञयोर्ध्रुवः ॥ आश्रयो नास्ति सत्वस्य क्षेत्रज्ञस्य च कश्चन ॥ स

तंमनः संसृजते न गुणान्नैव कदाचन ॥२ इंद्रीस्तेषां सुमनसा यदा सम्यङ्नियच्छति ॥ तदा प्रकाशतेस्यात्मा घटे दी
पो ज्वलन्निव ॥ त्यक्त्वा यः प्राकृतं कर्म नित्यमात्मरतिर्मुनिः ॥ सर्वभूतात्मभूतस्स्यात्स गच्छेदुत्तमां गतिं ॥ यथा वा
रिचरः पक्षी सलिले न न लिप्यते ॥ एवमेव कृतप्रज्ञो भूतेषु परिवर्तते ॥ एवं स्वभावमेवैतत्स्वबुध्या विहरेन्नरः ॥ अ
शोचन्नप्रहृष्यंश्च समो विगतमत्सरः ॥ स्वभावयुक्त्या युक्तश्च नित्यं संसृजते गुणान् ॥ ऊर्णनाभिर्यथा सूत्रं विज्ञेयास्तं
तुवद्गुणाः ॥ प्रध्वस्ता न निवर्तंते निवृत्तिर्नोपलभ्यते ॥ प्रत्यक्षेण परोक्षं तदनुमानेन सिध्यति ॥ एवमेकेन व्यवस्यंति
निवृत्तिरिति चापरे ॥ उभयं संप्रधार्यैतद्व्यवस्येत यथामति ॥ इतीमं हृदयग्रंथिं बुद्धिभेदमयं दृढं ॥ विमुच्य सुख
मासीत न शोचेच्छिन्नसंशयः ॥ मलिनाः प्राप्नुयुः शुद्धिं तोयपूर्णां नदीं नराः ॥ अवगाह्य सुविद्वांसो विद्धि ज्ञानमिदं त
था ॥ महानद्यां हि पारज्ञस्तप्यते न तरन्यथा ॥ न तु तप्यति तत्त्वज्ञः फले ज्ञाते तरत्युत ॥ एवं ये विदुरध्यात्मं कैवल्यं ज्ञा
नमुत्तमं ॥ एवं बुध्वा नरः सर्वं भूतानामागतिं गतिं ॥ अवेक्ष्य च शनैर्बुध्या लभते शमनं ततः ॥ त्रिवर्गो यस्य विदितः
प्रेक्ष्य यश्च विमुंचति ॥ अन्विष्य मनसा युक्तस्तत्त्वदर्शी निरुत्सुकः ॥ न चात्मा शक्यते द्रष्टुमिंद्रियेषु विभागशः ॥ त
त्र तत्र विसृष्टेषु दुर्वीर्येष्वकृतात्मभिः ॥ एतद्बुध्वा भवेद्बुद्धः किमन्यद्बुद्धलक्षणं ॥ विज्ञाय तद्धि मन्यंते कृतकृत्या २५

मनीषिणः ॥ न भवति विदुषां ततो भयं यदविदुषां सुमहद्भयं भवेत् ॥ न हि गतिरधिकास्ति कस्यचित्सति हि गुणे प्रवदंत्य
तुल्यतां ॥ यः करोत्यनभिसंधिपूर्वकं तच्च निर्णुदयति यत्पुरा कृतं ॥ नाप्रियं तदुभयं कुतः प्रियं तस्य तज्जनयतीह कुर्वतः ॥ लोक
मातुरमसूयते जनस्तस्य तज्जनयतीह सर्वतः ॥ लोकमातुरजनान्विराविणस्तत्तदेव बहु पश्य शोचतः ॥ तत्र पश्य कुश
लान शोचते ये विदुस्तदुभयं पदं सतां ॥ ॥ शांतौ मोक्षधर्मेऽध्यात्मनिरूपणं ॥ ॥ भीष्म उवाच ॥ ॥ हंत वक्ष्यामि ते पार्थ ध्या
नयोगं चतुर्विधं ॥ यं ज्ञात्वा शाश्वतीं सिद्धिं गच्छंतीह महर्षयः ॥ यथा स्वनुष्ठितं ध्यानं तथा कुर्वंति योगिनः ॥ महर्षयो ज्ञान
तृप्ता निर्वाणगतमानसाः ॥ नावर्तंते पुनः पार्थ मुक्ताः संसारदोषतः ॥ जन्मदोषपरिक्षीणाः स्वभावे पर्यवस्थिताः ॥ नि
र्द्वंद्वा नित्यसत्वस्था विमुक्ता नियमाश्रिताः ॥ असंगीन्यविवादीनि मनःशांतिकराणि च ॥ तत्र ध्याने न संश्लिष्टमेका
ग्रं धारयेन्मनः ॥ पिंडीकृत्येंद्रियग्रामं समासीनः काष्ठवन्मुनिः ॥ शब्दं न विंदेच्छ्रोत्रेण त्वचा स्पर्शं न विंदयेत् ॥ रूपं न चक्षु
षा विंद्याज्जिह्वया न रसांस्तथा ॥ घ्रेयाण्यपि च सर्वाणि जह्याद्ध्यानेन योगवित् ॥ पंचवर्गप्रमाथीनि नेच्छेच्चैतानि वीर्यवा
न् ॥ ततो मनसि संगृह्य पंचवर्गं विचक्षणः ॥ समादध्यान्मनो भ्रांतमिंद्रियैः सह पंचभिः ॥ विसंचारि निरालंबं पंचद्वारं
चलाचलं ॥ पूर्वे ध्यानपथे धीरः समादध्यान्मनोंतरा ॥ इंद्रियाणि मनश्चैव यदा पिंडीकरोत्ययं ॥ एष ध्यानपथः पू
र्वो मया समनुवर्णितः ॥ तस्य तत्पूर्वकं रुद्धमात्मनः षष्ठमांतरं ॥ स्फुरिष्यति समुद्भ्रांता विद्युदंबुधरे यथा ॥ जलबिंदु

र्यथाहिलोलः पर्णस्थः सर्वतश्चलः ॥ एवमेवास्य चित्तं भवति ध्यानवर्त्मनि ॥ समाहितं क्षणं किंचिध्यानवर्त्मनि तिष्ठति
पुनर्वायुपथे भ्रांतं मनो भवति वायुवत् ॥ अनिर्वेदो गतक्लेशो गततंद्रीरमत्सरः ॥ समादध्यात्पुनश्चेतो ध्यातेन ध्यानयो
गवित् ॥ विचारश्च वितर्कश्च विवेकश्चोपजायते ॥ मुनेः समादधानस्य प्रथमं ध्यानमादितः ॥ मनसा क्लिश्यमानस्तु
समाधानं च कारयेत् ॥ न निर्वेदं मुनिर्गच्छेत्कुर्यादेवात्मनो हितं ॥ पांसुभस्मकरीषाणां यथा वै राशयश्चिताः ॥ सह
सा वारिणा सिक्ता नयांति परिभावनां ॥ किंचित्स्निग्धं यथा वत्स्याच्छुष्कचूर्णमभावितं ॥ क्रमशस्तु शनैर्गच्छे
त्सर्वं तत्परिभावनं ॥ एवमेवेंद्रियग्रामं शनैः संपरिभावयेत् ॥ संहरेत्क्रमशश्चैव स सम्यक्प्रशमिष्यति ॥ स्व
यमेवं मनश्चैव पंचवर्गं च भारत ॥ पूर्वं ध्यानपथं प्राप्य नित्ययोगेन शाम्यति ॥ न तत्पुरुषकारेण न च दैवेन
केनचित् ॥ सुखमेष्यति तत्तस्य यदेवं संयतात्मनः ॥ सुखेन तेन संयुक्तो रंस्यते ध्यानकर्मणि ॥ गच्छंति योगिनो ह्ये
वं निर्वाणं तं निरामयं ॥ ॥ इति श्रीशांतौ मोक्षधर्मे अध्यात्मं समाप्तं ॥ ॥ युधिष्ठिर उवाच ॥ ॥ चातुराश्रम्यमुक्तं ते रा
जधर्मास्तथैव च ॥ नानाश्रयाश्च बहव इतिहासाः पृथग्विधाः ॥ श्रुतास्त्वत्तः कथाश्चैव धर्मयुक्ता महामते ॥ संदे
होस्ति तु कश्चिन्मे तद्भवान्वक्तुमर्हति ॥ जापकानां फलावाप्तिं श्रोतुमिच्छामि भारत ॥ किं फलं जपतामुक्तं क्व वा
तिष्ठंति जापकाः ॥ जप्यस्य च विधिं कृत्स्नं वक्तुमर्हसि मेऽनघ ॥ जापका इति किं चैतत्सांख्ययोगक्रियाविधिः ॥

किं यज्ञविधिरेवैष किमेतज्जप्यमुच्यते ॥ एतन्मे सर्वमाचक्ष्व सर्वज्ञो ह्यसि मे मतः ॥ ॥ भीष्म उवाच ॥ ॥ अत्राप्युदाह
रंतीममितिहासं पुरातनं ॥ यमस्य यत्पुरा वृत्तं कालस्य ब्रह्मणस्य च ॥ संन्यास एव वेदांते वर्तते जपनं प्रति ॥ वे
दवादाश्च निर्वृत्ताः शांता ब्रह्मण्यवस्थिताः ॥ सांख्ययोगौ तु यावुक्तौ मुनिभिर्ब्रह्मदर्शिभिः ॥ मार्गौ तावुदभावेतौ सं
श्रितौ न संश्रितौ ॥ यथा संश्रूयते राजन्कारणं चात्र वक्ष्यति ॥ मनः समाधिरत्रापि तथेंद्रियजयः स्मृताः ॥ सत्यमग्नि
परीवारो विविक्तानां च सेवनं ॥ ध्यानं तपो दमः क्षांतिरनसूया मिताशनं ॥ विषयप्रतिसंहारो मितजल्पस्तथा
शमः ॥ एष प्रवर्तको धर्मो निवर्तकमथो शृणु ॥ यथा निवर्तते कर्म जपतो ब्रह्मचारिणः ॥ एतत्सर्वमशेषेण
यथोक्तं परिवर्जयेत् ॥ द्विविधं मार्गमासाद्य व्यक्ताव्यक्तमनामयं ॥ क्लेशोच्चयनिषण्णः सन्कुशहस्तः कुशैः शि
खी ॥ कुशैः परिवृतस्तस्मिन्मध्ये छन्नः कुशैस्तथा ॥ विषयेभ्यो न नमस्कुर्याद्विषयान्न च भावयेत् ॥ साम्यमुत्पा
द्य मनसा मनस्येव मनो दधत् ॥ तद्धिया ध्यायति ब्रह्म जपन्वै संहितां हितं ॥ संन्यस्यत्यथ वा तां वै समाधौ
पर्यवस्थितः ॥ ध्यानमुत्पादयत्यत्र संहिताबलसंश्रयात् ॥ शुद्धात्मा तपसा दांतो निवृत्तद्वेषकामवान् ॥ अरागो
मोहो निर्द्वंद्वो न शोचति न सज्यते ॥ न कर्ता कारणानां च न कार्याणामिति स्थितिः ॥ न चाहंकारयोगेन मनः प्रस्था
पयेत्क्वचित् ॥ न चार्थग्रहणे युक्तो नावमानी न चाक्रियः ॥ ध्यानक्रियापरो युक्तो ध्यानवान्ध्याननिश्चयः ॥ ध्याने

समाधिमुपासाद्य तदंतिकमात् ।। सवै तस्यामवस्थायां सर्वत्यागकृतस्सुखी ।। निरिछस्त्यजति प्राणान्ब्राह्मीं संविशते तनुं ।। अथवा नेछते तत्र ब्रह्मकायनिषेवणं ।। उत्क्रामति च मार्गस्थो नैव क्वचन जायते ।। आत्मबुध्या समास्थाय शांतीभूतो निरामयः ।। अमृतं विरजः शुद्धमात्मानं प्रतिपद्यते ।। ।। शांतौ मोक्षधर्मे ।। ।। युधिष्ठिर उवाच ।। ।। गतीनामुत्तमा प्राप्तिः कथिता जापकेष्विह ।। एकैवैषा गतिस्तेषामुतयांत्यपरामपि ।। ।। भीष्म उवाच ।। ।। शृणुष्वावहितो राजन् जापकानां गतिं विभो ।। यथा गछंति निरयाननेकान्पुरुषर्षभ ।। यथोक्तं पूर्वं पूर्वं यो नानुतिष्ठति जापकः ।। एकदेशक्रियश्चात्र निरयं स गच्छति ।। अवमानेन कुरुते न प्रीयति न हृष्यति ।। ईदृशो जापको याति निरयं नात्र संशयः ।। अहंकारकृतश्चैव सर्वे निरयगामिनः ।। परावमानी पुरुषो भविता निरयोपगः ।। अविध्यापूर्वकं जाप्यं कुरुते यश्च मोहितः ।। यत्रास्य रागः पतति तत्र तत्रोपपद्यते ।। अथैश्वर्यप्रवृत्तेषु जापकस्तत्र रज्यते ।। स एव निरयस्तस्य नासौ तस्मात्समुच्यते ।। रागेण जापको जप्यं कुरुते तत्र मोहितः ।। यत्रास्य रागः पतति तत्र तत्रोपपद्यते ।। दुर्बुद्धिरकृतप्रज्ञश्चले मनसि तिष्ठति ।। चलामेव गतिं याति निरयं वा नियछति ।। अकृतप्रज्ञको बालो मोहं गछति जापकः ।। स मोहान्निरयं याति तत्र गत्वानुशोचति ।। दृढग्राही करोमीति जप्यं जपति मानवः ।। न संपूर्णो न संयुक्तो निरयं सोनुगछति ।। ।। युधिष्ठिरः ।। ।। अनिमित्तं परं यत्तदव्यक्तं ब्रह्मणि स्थितं ।। तद्भूतो जापकः क

स्मात्स शरीरमिहाविशेत् ।। भीष्म उवाच ।। दुष्प्रज्ञानेन निरया बहवः समुदाहृताः ।। प्रशस्तं जापकत्वं च दोषाश्चैते तदात्मकाः ।। ।। शांतौ मोक्षधर्मे जापकोपाख्याने ।। ।। युधिष्ठिरः ।। ।। कीदृशं निरयं याति जापको वर्णयस्व मे ।। कौतूहलं हि राजन्मे तद्भवान्वक्तुमर्हति ।। ।। भीष्म उवाच ।। ।। धर्मस्यांशप्रसूतोसि धर्मिष्ठोसि स्वभावतः ।। धर्ममूलाश्रयं वाक्यं शृणुष्वावहितोनघ ।। अमूनि यानि स्थानानि देवानां परमात्मनां ।। नानासंस्थानवर्णानि नानारूपफलानि च ।। दिव्यानि कामचारीणि विमानानि सभास्तथा ।। आक्रीडा विविधा राजन्पद्मिन्यश्चैव कांचनाः ।। चतुर्णां लोकपालानां शुक्रस्याथ बृहस्पतेः ।। मरुतां विश्वेदेवानां साध्यानामश्विनोरपि ।। रुद्रादित्यवसूनां च तथान्येषां दिवौकसां ।। एते वै निरयास्तात स्थानस्य परमात्मनः ।। अभयं चानिमित्तं च न च क्लेशसमावृतं ।। द्वाभ्यां मुक्तं त्रिभिर्मुक्तमष्टाभिस्त्रिभिरेव च ।। चतुर्लक्षणवर्जं च चतुःकारणवर्जितं ।। अप्रहर्षमनानंदमशोकं विगतक्लमं ।। कालः संपद्यते तत्र कालस्तत्र न वै प्रभुः ।। स कालस्य प्रभू राजन्स्वर्गस्यापि तथेश्वरः ।। आत्मा केवलतां प्राप्तस्तत्र गत्वा न शोचति ।। ईदृशं परमं स्थानं निरयास्ते च तादृशाः ।। एते ते निरयाः प्रोक्ताः सर्व एव यथातथं ।। तस्य स्थानवरस्येह सर्वे निरयसंज्ञिताः ।। ।। इति शांतौ मोक्षधर्मे ।। ।। युधिष्ठिरः ।। ।। कालमृत्युयमानां ते इक्ष्वाकोर्ब्राह्मणस्य च ।। विवादो व्याहृतः पूर्वं तद्भवान्वक्तुमर्हसि ।। ।। भीष्म उवाच ।। ।। अत्राप्युदाहरंतीममिति

हासं पुरातनं ॥ इक्ष्वाकोः सूर्यपुत्रस्य यद्वृत्तं ब्राह्मणस्य वा ॥ कालस्य मृत्योश्च तथा यद्वृत्तं तन्निबोध मे ॥ यथा स तेषां सं
वादो यस्मिन् स्थानेपि वाभवत् ॥ ब्राह्मणो जापकः कश्चिद्धर्मवृत्तो महायशाः ॥ षडंगविन्महाप्राज्ञः पैप्पलादिः स कौशि
कः ॥ तस्यापरोक्षं विज्ञानं षडंगेषु बभूव ह ॥ वेदेषु चैव निष्णातो हिमवत्पादसंश्रयः ॥ सोहं ब्राह्मं तपस्तेपे संहितां
संयतो जपन् ॥ तस्य वर्षसहस्रं तु नियमेन तथा गतं ॥ स देव्या दर्शितः साक्षात्प्रीतास्मीति तदा किल ॥ जप्यमावर्तयं
स्तूष्णीं न सतां किंचिदब्रवीत् ॥ तस्यानुकंपया देवी प्रीता समभवत्तदा ॥ वेदमाता ततस्तस्य तज्जप्यं समपूजयत् ॥
समाप्तजप्यस्तुत्वा च शिरसा पादयोस्तदा ॥ पपात देव्या धर्मात्मा वचनं चेदमब्रवीत् ॥ दिष्ट्या देवि प्रसंन्ना त्वं
दर्शनं चागता मम ॥ यदि वापि प्रसंनासि जप्ये मे रमतां मनः ॥ ॥ सावित्र्युवाच ॥ ॥ किं प्रार्थयसि विप्रर्षे किंच
ते करवाणि ते ॥ प्रब्रूहि जपतां श्रेष्ठ सर्वं तत्ते भविष्यति ॥ इत्युक्तः स तदा देव्या विप्रः प्रोवाच धर्मवित् ॥ जप्यं प्र
ति ममेछेयं वर्द्धत्विति पुनः पुनः ॥ मनसश्च समाधिर्मे वर्धेताहरहः शुभे ॥ तत्तथेति ततो देवी मधुरं प्रत्य
भाषत ॥ इदं चैवापरं प्राह देवी तत्प्रियकाम्यया ॥ निरयान्नैव यातात्वं यत्र याता द्विजर्षभाः ॥ यास्यसि ब्रह्मणः
स्थानमनिमित्तमनिंदितं ॥ साधये भविता चेतद्यत्त्वयाहमिहार्थिता ॥ नियतो जप चैकाग्र्यो धर्मस्त्वां स २८

मुपैष्यति ॥ कालो मृत्युर्यमश्चैव समायास्यंति तेंतिकं ॥ भविता च विवादोत्र तव तेषां च धर्मतः ॥ ॥ भीष्म उवाच ॥ ॥
एवमुक्त्वा भगवती जगाम भवनं स्वकं ॥ ब्राह्मणोपि जपन्नास्ते दिव्यं वर्षशतं तदा ॥ सदा दांतो जितक्रोधः सत्य
संधोनसूयकः ॥ समाप्ते नियमे तस्मिन्नथ विप्रस्य धीमतः ॥ साक्षात्प्रीतस्तदा धर्मो दर्शयामास तं द्विजं ॥ ॥ धर्म
उवाच ॥ ॥ द्विजाते पश्य मां धर्ममहं त्वां द्रष्टुमागतः ॥ जप्यस्यास्य फलं यत्तत्संप्राप्तं तच्च मे शृणु ॥ जिता लोकास्त्व
या सर्वे ये दिव्या ये च मानुषाः ॥ देवानां निलयान्साधो सर्वानुत्क्रम्य यास्यसि ॥ प्राणत्यागं कुरु मुने गछ लोकान्यथे
प्सितान् ॥ त्यक्त्वात्मनः शरीरं च ततो लोकानवाप्स्यसि ॥ ॥ ब्राह्मण उवाच ॥ ॥ किं नु लोकैर्हि मे धर्म गछ त्वं च य
थासुखं ॥ बहुदुःखसुखं देहं नोत्सृजेयमहं विभो ॥ ॥ धर्म उवाच ॥ ॥ अवश्यं भोः शरीरं ते संत्यक्तव्यं मुनिपुं
गव ॥ स्वर्गमारोह भो विप्र किं वा ते रोचतेनघ ॥ ॥ ब्राह्मणः ॥ ॥ न रोचये स्वर्गवासं विना देहमहं विभो ॥ ग
छ धर्म न मे श्रद्धा स्वर्गं गंतुं विनात्मना ॥ ॥ धर्म उवाच ॥ ॥ अलं देहे मनः कृत्वा त्यक्त्वा देहं सुखी भव ॥ गछ
लोकानरजसो यत्र गत्वा न शोचसि ॥ ॥ ब्राह्मण उवाच ॥ ॥ रमे जपन्महाभाग किं नु लोकैः सनातनैः ॥ सशा
रीरेण गंतव्यं मया स्वर्गं न वा विभो ॥ ॥ धर्म उवाच ॥ ॥ यदि त्वं नेछसे त्यक्तुं शरीरं पश्य वै द्विज ॥ एष कालस्त
था मृत्युर्यमश्च त्वामुपागतः ॥ ॥ भीष्म उवाच ॥ ॥ अथ वैवस्वतः कालो मृत्युश्च त्रितयं विभो ॥ ब्राह्मणं तं म

हाभागमुपगम्येदमब्रवीत्॥ ॥यमउवाच॥ ॥तपसोस्य सुतप्तस्य तथा सुचरितस्य च॥ फलप्राप्तिस्तव श्रेष्ठा य
मो हि त्वामुपब्रुवे॥ ॥कालउवाच॥ ॥यथावेदस्य जप्यस्य फलं प्राप्तमनुत्तमं॥ कालस्ते स्वर्गमारोढुं कालो हं त्वा
मुपागतः॥ ॥मृत्युरुवाच॥ ॥मृत्युं मां विद्धि धर्मज्ञ रूपिणं स्वयमागतं॥ कालेन नोदितो विप्र त्वामितो नेतुमुद्य वै॥ ॥
ब्राह्मण उवाच॥ ॥स्वागतं सूर्यपुत्राय कालाय च महात्मने॥ मृत्यवे चाथ धर्माय किं कार्यं करवाणि वः॥ ॥भीष्म
उवाच॥ ॥अर्घ्यं पाद्यं च दत्वा स तेभ्यस्तत्र समागमे॥ अब्रवीत्परमप्रीतः स्वशक्त्या किं करोमि वः॥ एतस्मि
न्नेव काले तु तीर्थयात्रामुपागतः॥ इक्ष्वाकुरगमत्तत्र समेता यत्र ते विभो॥ सर्वानैतु वै राजर्षिः संपूज्याथ प्रणम्य
च॥ कुशलप्रश्नमकरोत्सर्वेषां राजसत्तमः॥ तस्मै सोपासनं दत्वा पाद्यमर्घ्यं तथैव च॥ अब्रवीद्ब्राह्मणो वाक्यं
कृत्वा कुशलसंविदं॥ ॥ब्राह्मण उवाच॥ ॥स्वागतं ते महाराज ब्रूहि यद्यदिहेच्छसि॥ स्वशक्त्या किं करोमीह
तद्भवान्प्रब्रवीतु मे॥ ॥राजोवाच॥ ॥राजाहं ब्राह्मणस्त्वं सदा षट्कर्मसंस्थितः॥ ददामि वसु किंचित्ते प्रा
र्थितं तद्वदस्व मे॥ ॥ब्राह्मण उवाच॥ ॥द्विविधा ब्राह्मणा राजन्धर्मश्च द्विविधः स्मृतः॥ प्रवृत्ताश्च निवृत्ताश्चं वृत्तो नि
हं प्रतिग्रहात्॥ तेभ्यः प्रयच्छ दानानि ये प्रवृत्ता नराधिप॥ अहं न प्रतिगृह्णामि किमिष्टं किं ददामि ते॥ ब्रूहि त्वं नृ
पतिश्रेष्ठ तपसा साधयामि किं॥ ॥राजोवाच॥ ॥क्षत्रियो हं न जानामि देहीति वचनं क्वचित्॥ प्रयच्छ युद्ध

मित्येवं वादिनः स्मो द्विजोत्तम॥ ॥ब्राह्मण उवाच॥ ॥तुष्यसि त्वं स्वधर्मेण तथा तुष्टा वयं नृप॥ अन्योन्यस्योत्तरं नास्ति यदि
ष्टं तत्समाचर॥ ॥राजोवाच॥ ॥स्वशक्त्याहं ददानीति त्वया पूर्वमुदाहृतं॥ याचे त्वां दीयतां मह्यं जप्यस्यास्य फलं द्विजः॥ ॥
ब्राह्मण उवाच॥ ॥युद्धं मम सदा वाणी याचतीति विकत्थसे॥ न च युद्धं मया सार्द्धं याचसे पुनः॥ ॥राजोवाच॥ ॥वाग्वज्रा ब्रा किमर्थं
ह्मणा प्रोक्ताः क्षत्रिया बाहुजीविनः॥ वाग्युद्धं तदिदं तीव्रं मम विप्र त्वया सह॥ ब्राह्मण उवाच॥ ॥सैवाद्यापि प्रतिज्ञा मे स्वशक्त्या
किं प्रदीयतां॥ ब्रूहि दास्यामि राजेंद्र विभवे सति माचिरं॥ ॥राजोवाच॥ ॥यत्तद्वर्षशतं पूर्णं जप्यं वै जपता त्वया॥ फलं
प्राप्तं तत्प्रयच्छ मम मंदित्सुर्भवान्यदि॥ ॥ब्राह्मण उवाच॥ ॥[illegible] गृह्यतां तस्य फलं तज्जपितं मया॥ अर्द्धं त्वमविचा
रेण फलं तस्य समाप्नुहि॥ अथ वा सर्वमेवेह मामकं जापकं फलं॥ राजन्प्राप्नुहि कामं त्वं यदि सर्वमिहेच्छसि॥ ॥राजोवा
च॥ ॥कृतं सर्वेण भद्रं ते जप्यं यद्याचितं मया॥ स्वस्ति तेस्तु गमिष्यामि किं त्वेतस्य फलं वद॥ ॥ब्राह्मण उवाच॥ ॥फलप्रा
प्तिं न जानामि दत्तं यज्जपितं मया॥ अयं धर्मश्च कालश्च यमो मृत्युश्च साक्षिणः॥ ॥राजोवाच॥ ॥अज्ञातमस्य धर्मस्य फ
लं किं मे करिष्यति॥ फलं ब्रवीषि धर्मस्य न चेज्जप्यकृतस्य मां॥ प्राप्नुतु तत्फले विप्रो नाहमिच्छे ससंशयं॥ ॥ब्राह्मण उवाच॥ ॥
नाददे परवक्तव्यं दत्तं चास्य फलं मया॥ वाक्यं प्रमाणं राजर्षे ममाद्य तव चैव हि॥ नाभिसंधिर्मया जप्ये कृतपूर्वः कदाचन॥
जप्यस्य राजशार्दूल कथं वेत्स्याम्यहं फलं॥ ददस्वेति त्वया चोक्तं ददानीति तथा मया॥ न वाचं दूषयिष्यामि सत्यं रक्ष स्थिरो भव॥
अथैवं वदतो मेद्य वचनं न करिष्यसि॥ महानधर्मो भविता तव राजन्मृषाकृतः॥ न युक्तं तु मृषा वाणी त्वया वक्तुमरिंदम॥

तथा मयाप्यभ्यधिकं मिथ्या वक्तुं न शक्यते ।। संश्रुतं तु मया पूर्वं ददानीत्यविचारितं ।। तद्गृह्णीष्वाविचारेण यदि सत्ये स्थितो म
वान् ।। इहागम्य हि मां राजन् जाप्यं फलमयाचिथाः ।। तन्मे निसृष्टं गृह्णीष्व भव सत्ये स्थिरोपि च ।। नायं लोकोस्ति न परो न च पूर्वा
न्सतायेत् ।। कुत एव जनिष्यस्तु मृषावादपरायणः ।। न यज्ञफलदानानि नियमास्तारयंति हि ।। यथा सत्यं परे लोके तथेह
पुरुषर्षभ ।। तपांसि यानि चीर्णानि चरिष्यंति यत्तपः ।। शतैः शतसहस्रैश्च ते सत्यान्न विशिष्यते ।। सत्यमेकाक्षरं ब्रह्म सत्य
मेकाक्षरं तपः ।। सत्यमेकाक्षरो यज्ञः सत्यमेकाक्षरं श्रुतं ।। सत्यं वेदेषु जागर्ति फलं सत्ये परं स्मृतं ।। सत्याद्धर्मो दमश्चैव स
त्ये सर्वं प्रतिष्ठितं ।। सत्यं वेदास्तथांगानि सत्यं विद्यास्तथा विधिः ।। व्रतचर्या तथा सत्यमोंकारः सत्यमुच्यते ।। प्राणिनां जननं स
त्यं सत्यं संततिरेव च ।। सत्येन वायुरभ्येति सत्येन तपते रविः ।। सत्येन चाग्निर्दहति स्वर्गः सत्ये प्रतिष्ठितः ।। सत्यं यज्ञस्तपो
वेदाः स्तोभा मंत्राः सरस्वती ।। तुलामारोपितो धर्मः सत्यं चैवेति नः श्रुतं ।। समकक्षां तुलयतो यतः सत्यं ततोधिकं ।। यतो धर्मः
स्ततः सत्यं सर्वं सत्येन वर्द्धते ।। किमर्थमनृतं कर्म कर्तुं राजंस्त्वमिच्छसि ।। सत्ये कुरु स्थिरं भावं मा राजन्ननृतं कृथाः ।। कस्मा
त्वमनृतभावं देहीति कुरुषेऽशुभं ।। यदि जप्यफलं दत्तं मया नेशिष्यसे नृप ।। धर्मेभ्यः संपरिभ्रष्टो लोकाननुचरिष्यसि ।। संश्रु
त्य यो न दित्सेत याचित्वा यश्च नेच्छसि ।। उभावानृतिकावेतौ न मृषा कर्तुमर्हसि ।। राजोवाच ।। ।। योद्धव्यं रक्षितव्यं च क्षत्रधर्मः
किल द्विज ।। दातारः क्षत्रियाः प्रोक्ता गृह्णीयां भवतः कथं ।। ।। ब्राह्मण उवाच ।। ।। न छंदयामि ते राजन्नापि ते गृहमाव्रजं ।। इहा
गम्य तु याचित्वा न गृह्णीषे पुनः कथं ।। ।। धर्म उवाच ।। ।। अविवादोस्तु युवयोर्वित्तं मां धर्ममागतं ।। द्विजो दानफलैर्युक्तो

राजा सत्यफलेन च ।। ।। स्वर्ग उवाच ।। ।। स्वर्गं मां विद्धि राजेंद्र रूपिणं स्वयमागतं ।। अविवादोस्तु युवयोरुभौ तुल्यफलौ युवां
।। ।। राजोवाच ।। ।। कृतं स्वर्गेण मे कार्यं गच्छ स्वर्ग यथागतं ।। विप्रो यदीच्छते गृहीतुं चीर्णं गृह्णातु मे फलं ।। ।। ब्राह्मण उवाच ।। ।। बाल्ये
यदि स्यादज्ञानान्मया हस्तः प्रसारितः ।। निवृत्तिलक्षणं धर्ममुपासे संहितां जपन् ।। निवृत्तं मां चिराद्राजन् विप्रलोभय य
से कथं ।। स्वेन कार्यं करिष्यामि त्वत्तो नेच्छे फलं नृप ।। ततःस्वाध्यायशीलोहं निवृत्तश्च प्रतिग्रहात् ।। ।। राजोवाच ।। ।। यदि विप्र विसृ
ष्टं ते जप्यस्य फलमुत्तमं ।। आवयोर्यत्फलं किंचित्सहितं नौ तदस्त्विह ।। द्विजाः प्रतिग्रहे युक्ता दातारो राजवंशजाः ।। यदि
धर्मः श्रुतो विप्र सहैव फलमस्तु नौ ।। मा वा भूत्सह भोज्यं नौ मदीयं फलमाप्नुहि ।। प्रतीच्छ मत्कृतं धर्मं यदि ते मय्यनुग्रहः
।। भीष्म उवाच ।। ।। ततो विकृतवेषौ द्वौ पुरुषौ समुपस्थितौ ।। गृहीत्वान्योन्यमावेष्ट्य कुचेलावूचतुर्वचः ।। न मे धारयसी
त्येको धारयामीति चापरः ।। इहास्ति नौ विवादोयमयं राजानुशासकः ।। सत्यं ब्रवीम्यहमिदं न मे धारयते भवान् ।। अनृतं
वदसीह त्वमृणं ते धारयाम्यहं ।। तावुभौ भृशसंतप्तौ राजानमिदमूचतुः ।। परीक्ष्य त्वं यथा स्यावो नावामिह विगर्हितौ ।। ।।
विरूप उवाच ।। धारयामि नरव्याघ्र विकृतस्येह गोः फलं ।। ददतश्च न गृह्णाति विकृतो मे महीपते ।। ।। विकृत उवाच ।। ।। न मे
धारयति किंचिद्विरूपोयं नराधिप ।। मिथ्या ब्रवीत्ययं हित्वा सत्याभासेन नाधिप ।। ।। राजोवाच ।। ।। विरूप किं धारयते
भवानस्य ब्रवीतु मे ।। श्रुत्वा तथा करिष्येहमिति मे धीयते मनः ।। ।। विरूप उवाच ।। ।। शृणुष्वावहितो राजन्यथै

तद्धारयाम्यहं॥ विकृतस्त्वास्य राजर्षेर्निःक्लेशेन नराधिप॥ अनेन धर्मप्राप्त्यर्थं शुभा दत्ता पुरानघ॥ धेनुर्विप्राय राजर्षे त
पःस्वाध्यायशीलिने॥ तस्याश्चायं मया राजन् फलमभ्येत्य याचितः॥ विकृतेन च मे दत्तं विशुद्धेनांतरात्मना॥ ततो मे सुकृतं
कर्म कृतमात्मविशुद्धये॥ गावौ च कपिले क्रीत्वा वत्सले बहुदोहने॥ तत्रोंछवृत्तये राजन् मया समयवर्जिते॥ यथाविधि य
थाश्राद्धं तदस्याहं पुनः प्रभो॥ इहाद्य वै गृहीत्वा तु प्रयच्छे द्विगुणं फलं॥ एवंस्यात्पुरुषव्याघ्र कः शुद्धः कोऽत्र दोषवान्॥ ए
वं विवदमानौ स्वस्त्वामिहाभ्यागतौ नृप॥ कुरु धर्ममधर्मं वा विनये नौ समादध॥ यदि नेच्छसि मे दानं यथा दत्तमनेन वै॥
भवानत्र स्थिरो भूत्वा मार्गे स्थापयिता च नौ॥ राजोवाच॥ ॥ दीयमानं न गृह्णासि ऋणं कस्मात्त्वमद्य वै॥ यथैव तेऽभ्य
नुज्ञातं तथा गृह्णीष्व माचिरं॥ ॥विकृत उवाच॥ ॥धारयामीत्यनेनोक्तं ददानीति तथा मया॥ नायं मे धारयत्यद्य ग
च्छतो यत्र वांछितं॥ ॥राजोवाच॥ ॥ददतोऽस्य न गृह्णासि विषमं प्रतिभाति मे॥ दंड्यो हि त्वं मम मतो नास्त्यत्र खलु
संशयः॥ ॥विकृत उवाच॥ ॥मयास्य दत्तं राजर्षे गृह्णीयां तत्कथं पुनः॥ को ममात्रापराधो मे दंडमाज्ञापय प्रभो॥ ॥
विरूप उवाच॥ ॥दीयमानं यदि मया नेच्छिष्यसि कथंचन॥ नियंस्यति त्वां नृपतिरयं धर्मानुशासकः॥ ॥विकृतः॥ ॥
स्वं मया याचिते नेह दत्तं कथमिहाद्य तत्॥ गृह्णीयां गच्छतु भवानभ्यनुज्ञां ददामि ते॥ ॥ब्राह्मण उवाच॥ ॥श्रुतमेतत्त्वया
राजन्ननयोः कथितं द्वयोः॥ प्रतिज्ञातं मया यत्ते तद्गृहाणाविचारितं॥ ॥राजोवाच॥ ॥प्रकृतं तु महत्कार्यमनयोर्गह्वरं ३१

तथा॥ जापकस्य दृढीकारः कथमेतद्भविष्यति॥ यदि तावन्न गृह्णामि ब्राह्मणेनापवर्जितं॥ कथं न लिप्येयमहं दोषेण मह
ताद्य वै॥ तौ चोवाच स राजर्षिः कृतकार्यौ गमिष्यथ॥ नेदानीं मामिहासाद्य राजधर्मो भवेन्मृषा॥ स्वधर्मः परिपाल्यस्तु राज्ञा
मिति विनिश्चयः॥ विप्रधर्मश्च गहनो मामनात्मानमात्मवित्॥ ॥ब्राह्मण उवाच॥ ॥गृहाणाधारयेहं च याचितं संश्रुतं
मया॥ न चेद्ग्रहीष्यसे राजन् शपिष्ये त्वामसंशयं॥ ॥राजोवाच॥ ॥धिग्राजधर्मं यस्यायं कार्यस्येह विनिश्चयः॥ इत्यर्थं मे
गृहीतव्यं कथं तुल्यं भवेदिति॥ एष पाणिरपूर्वं मे निक्षेपार्थं प्रसारितः॥ यन्मे धारयसे विप्र तदिदानीं प्रदीयतां॥ ॥ब्राह्मण
उवाच॥ ॥संहितां जपता यावान् गुणः कश्चित्कृतो मया॥ तत्सर्वं प्रतिगृह्णीष्व यदि किंचिदिहास्ति मे॥ ॥राजोवाच॥ ॥
जलमेतन्निपतितं मम पाणौ द्विजोत्तम॥ सममस्तु सहैवास्तु प्रतिगृह्णातु वै भवान्॥ ॥विरूप उवाच॥ ॥कामक्रोधौ
विद्धि नौ त्वमावाभ्यां कारितो भवान्॥ सहेति च यदुक्तं ते समा लोकास्तवास्य च॥ नायं धारयते किंचिज्जिज्ञासा त्वत्कृते कृ
ता॥ कालो धर्मस्तथा मृत्युः कामक्रोधौ तथा युवां॥ सर्वमन्योन्यनिष्कर्षे निष्कृष्टं पश्यतस्तव॥ गच्छ लोकान् जितान् स्वेन क
र्मणा यत्र वांछसि॥ ॥भीष्म उवाच॥ ॥जापकानां फलावाप्तिर्मया ते संप्रदर्शिता॥ गतिः स्थानं च लोकेऽस्मिन् जापकेन यथा
जिता॥ प्रयाति संहिताध्यायी ब्रह्माणं परमेष्ठिनं॥ अथवाग्निं समायाति सूर्यमाविशतेऽपि वा॥ स तैजसेन भावेन यदि तत्र र
मत्युत॥ गुणांस्तेषां समाधत्ते रागेण प्रतिमोहितः॥ एवं सोमे तथा वायौ भूम्याकाशशरीरगः॥ सरागस्तत्र वसति गुणां
स्तेषां समाचरन्॥ अथ तत्र विरागी स सगच्छत्यथ संशयं॥ परममव्ययमिच्छंस्तमेवाविशते पुनः॥ अमृताच्चामृतं प्रा

स्तः शांतीभूतो निरात्मवान् ॥ ब्रह्मभूतः स निर्द्वंद्वः सुखी शांतो निरामयः ॥ ब्राह्मं ध्यानमनावर्तमेकमक्षरसंज्ञकं ॥ अदुःख
मजरं शांतं स्थानं तत्प्रतिपद्यते ॥ चतुर्भिर्लक्षणैर्हीनं तथा षड्भिः सषोडशैः ॥ पुरुषं समतिक्रम्य आकाशं प्रतिपद्यते ॥
अथ नेच्छति तत्रासौ सर्वं तदधितिष्ठति ॥ यत्र प्रार्थयते तत्र मनसा प्रतिपद्यते ॥ अथ वावेक्षते लोकान्सर्वान्निरय
संज्ञितान् ॥ निस्पृहः सर्वतो मुक्तस्तत्रैव रमते सुखं ॥ एवमेव महाराज जापकस्य गतिर्यथा ॥ तन्मे सर्वं समाख्यातं
किं भूयः श्रोतुमिच्छसि ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किमुत्तरं तदा तौ स्म चक्रतुस्तस्य भाषिते ॥ ब्राह्म
णो वाथ राज्ञो वा तन्मे ब्रूहि पितामह ॥ अथ वा तौ गतौ तत्र यदेतत्कीर्तितं त्वया ॥ संवादो वा तयोः कोऽभूत् किं वा तौ तत्र
चक्रतुः ॥ ॥ भीष्म उवाच ॥ ॥ तथेत्येवं प्रतिश्रुत्य धर्मं संपूज्य तत्र च ॥ यमं कालं च मृत्युं च स्वर्गं संपूज्य चार्हतः ॥
पूर्वं ये चापरे तत्र समेता ब्राह्मणर्षभाः ॥ सर्वांश्च संपूज्य शिरसा राजानं सोऽब्रवीद्द्विजः ॥ फलेनानेन संयुक्तो राजन्
गच्छ मुख्यतां ॥ भवता चाभ्यनुज्ञातो जपेयं भूय एव हि ॥ वरश्च मम पूर्वो हि दत्तो देव्या महाबल ॥ श्रद्धा ते जपतो
नित्यं भवत्विति विशांपते ॥ ॥ राजोवाच ॥ ॥ यद्येवं सफला सिद्धिः श्रद्धा च जपितुं तव ॥ गच्छ विप्र मया सार्द्धं जाप
कं फलमाप्नुहि ॥ ॥ ब्राह्मणः ॥ ॥ कृतः प्रयत्नः सुमहान्सर्वेषां संनिधाविह ॥ सह तुल्यफलौ चावां गच्छावो यत्र नौ गतिः ॥
व्यवसायं तयोस्तत्र विदित्वा त्रिदशेश्वरः ॥ सह देवैरुपययौ लोकपालैस्तथैव च ॥ साध्याश्च विश्वे मरुतो वाद्यानि सु

महांति च ॥ नद्यः शैलाः समुद्राश्च तीर्थानि विविधानि च ॥ तपांसि संयोगविधिर्वेदाः स्तोभाः सरस्वती ॥ नारदः पर्वत
श्चैव विश्वावसुर्हहाहुहू ॥ गंधर्वश्चित्रसेनश्च परिवारगुणैर्युतः ॥ नागाः सिद्धाश्च मुनयो देवदेवः प्रजापतिः ॥ विष्णुः
सहस्रशीर्षश्च देवोऽचिंत्यः समागमत् ॥ अवाद्यंतांतरिक्षे च भेर्यस्तूर्याणि वा विभो ॥ पुष्पवर्षाणि दिव्यानि तत्रैते
षां महात्मनां ॥ ननृतुश्चाप्सरःसंघास्तत्र तत्र समंततः ॥ अथ स्वर्गस्तथारूपी ब्राह्मणं वाक्यमब्रवीत् ॥ संसिद्धस्त्वं महा
भागस्त्वं च सिद्धस्तथा नृपः ॥ अथ तौ सहितौ राजन्नन्योन्येन विधानतः ॥ विषयप्रतिसंहारमुभावेव प्रचक्रतुः ॥ प्राणापा
नौ तथोदानं समानं व्यानमेव च ॥ एवं तौ मनसि स्थाप्य दधतुः प्राणयोर्मनः ॥ उपस्थितकृतौ तत्र नासिकाग्रमधो भ्रु
वौ ॥ भ्रुकुट्या चैव मनसा शनैर्धारयतस्तदा ॥ निश्चेष्टाभ्यां शरीराभ्यां स्थिरदृष्टी समाहितौ ॥ जितात्मानौ तथा धा
यमूर्द्ध्न्यात्मानमेव च ॥ तालुदेशमथोद्दाल्य ब्राह्मणस्य महात्मनः ॥ ज्योतिर्ज्वाला सुमहती जगाम त्रिदिवं तदा ॥
हाहाकारस्तदा दिक्षु सर्वेषां सुमहानभूत् ॥ तज्ज्योतिः स्तूयमानं स्म ब्रह्माणं प्राविशत्तदा ॥ ततः स्वागतमित्याह तत्तेजः
सपितामहः ॥ प्रादेशमात्रं पुरुषं प्रत्युद्गम्य विशांपते ॥ भूयश्चैवापरं प्राह वचनं मधुरं तदा ॥ जापकैस्तुल्यफलता
योगानां नात्र संशयः ॥ योगस्य तावदेतेभ्यः प्रत्यक्षं फलदर्शनं ॥ जापकानां विशिष्टं तु प्रत्युत्थानं समाहितं ॥ उष्यतां
मयि चेत्युक्त्वा चेतयत्सततं पुनः ॥ अथास्यं प्रविवेशास्य ब्राह्मणो विगतज्वरः ॥ राजाप्येतेन विधिना भगवंतं पिताम

हं॥ मथैवद्विजशार्दूल तथैव प्राविशत्तदा॥ स्वयंभुवमथो देवा अभिवाद्य ततोब्रुवन्॥ जापकानां विशिष्टं तु प्रत्युत्थानं समाहितं
उच्यतां मयि चेत्युक्तो चेतयस्ततत पुनः॥ अथास्यं प्रविवेशास्य ब्राह्मणो विगतज्वरः॥ राजापि तेन विधिना भगवंतं पितामहं॥ यथै
व विधिशार्दूल तथैव प्राविशत्तदा॥ स्वयंभुवमथो देवा अभिवाद्य ततोब्रुवन्॥ जापकानां विशिष्टांतु प्रत्युत्थानं समाहितं॥
जापकार्थमयं यत्नो यदर्थं वयमागताः॥ कृतपूजाविमौ तुल्यौ त्वया तुल्यफलाविमौ॥ योगजापकयोर्दृष्टं फलं सु
महदद्य वै॥ सर्वांल्लोकानतिक्रम्य गच्छेतां यत्र वांछितं॥ ॥ब्राह्मण उवाच॥ ॥महास्मृतिं पठेद्यस्तु तथैवानुस्मृ
तिं शुभां॥ तावप्येतेन विधिना गच्छेतां मत्सलोकतां॥ यश्च योगे भवेद्भक्तः सोपि नास्त्यत्र संशयः॥ विधिनानेन
देहांते मम लोकानवाप्नुयात्॥ साधये गम्यतां चेव यथास्थाना निसिद्धये॥ ॥भीष्म उवाच॥ ॥इत्युक्तो सात
स्य देवस्तत्रैवांतरधीयत॥ आमंत्र्य च ततो देवाः ययुः स्वं स्वं निकेतनं॥ ते च सर्वे महात्मानो धर्मं सत्कृत्य तत्र वै॥
पृष्ठतोनुययू राजन् सर्वे सुप्रीतचेतसः॥ एतत्फलं जापकानां गतिश्चैषा प्रकीर्तिता॥ यथाश्रुतं महाराज किं
भूयः श्रोतुमिच्छसि॥ ॥शांतौ मोक्षधर्मे जापकोपाख्यानं समाप्तं॥ ॥युधिष्ठिर उवाच॥ ॥किंफलं ज्ञानयो
गस्य वेदानां नियमस्य च॥ भूतात्मा च कथं ज्ञेयस्तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥अत्राप्युदाहरंतीम
मितिहासं पुरातनं॥ मनोः प्रजापतेर्वादं महर्षेश्च बृहस्पतेः॥ प्रजापतिं श्रेष्ठतमं प्रजानां देवर्षिसंघप्रव

रो महर्षिः॥ बृहस्पतिः प्रश्नमिमं पुराणं पप्रछ शिष्यो यगुरुं प्रणम्य यत्कारणं मंत्रविधिप्रयुक्तं ज्ञानं फलं यत्प्रवदं
ति विप्राः॥ यन्मे त्रशाद्वैरकृतप्रकाशं तदुच्यतां मे भगवान् यथावत्॥ यच्चार्थशास्त्रागममंत्रविद्भिर्यज्ञैरनेकैरथयो
प्रदानैः॥ फलं महद्भिर्यदुपास्यते चे किं तत्कथं वा भविता क्व वा तत्॥ मही महीजाः पवनोंतरिक्षं जलौकसश्चैव जलं
दिवं च॥ दिवौकसश्चापि यतः प्रसूतास्तदुच्यतां मे भगवान् पुराणं॥ ज्ञानं यतः प्रार्थयते नरो वै ततस्तदर्थी भवति प्रवृ
त्तिः॥ न चाप्यहं वेद परं पुराणे मिथ्याप्रवृत्तिं च कथं नु कुर्यात्॥ ऋक्सामसंघांश्च यजूंषि चापि छंदांसि नक्षत्रगति
निरुक्तं॥ अधीत्य च व्याकरणं सकल्पं शिक्षां च भूतप्रकृतिं न वेद्मि॥ स मे भगवाञ्शंसतु सर्वमेतत् सामान्यशब्दै
श्च विशेषणैश्च॥ स मे भगवाञ्शंसतु तावदेतात् ज्ञाने फलं कर्मणि वा यदस्ति॥ यथा च देहाच्च्यवते शरीरी पुनः शरी
रं च यथाप्युपैति॥ ॥मनुरुवाच॥ ॥यद्यत्प्रियं यस्य सुखं तदाहुस्तदेव दुःखं प्रवदंत्यनिष्टं॥ इष्टं च मे स्यादि
तरच्च न स्याहितेतत्कृते कर्मविधिः प्रवृत्तः॥ कामात्मकाः छंदसि कर्मयोगा एभिर्विमुक्तः परमश्नुवीत॥ नानाविधे
कर्मपथे सुखार्थी नरः प्रवृत्तो निरयं प्रयाति॥ ॥बृहस्पतिरुवाच॥ ॥इष्टं त्वनिष्टं च शुभाशुभे च साकांक्षीस्तप
श्छंदति कर्मभिश्च॥ एभिर्विमुक्तः परमाविवेश एतत् कृते कर्मविधिः प्रवृत्तः॥ आत्मादिभिः कर्मभिरिध्यमा
नो धर्मे प्रवृत्तो द्युतिमान् सुखार्थी॥ परं हि तत्कर्मपथादपेतं निराशिषं ब्रह्म परं त्ववेद्यं॥ प्रजाः सृष्टा मन

सा कर्मणा च द्वावेतौ सासृतौ लोकजुष्टौ ॥ दृष्टं कर्मशाश्वतं चांतकृश्च मनस्यागः कारणं नान्यदस्ति ॥ स्वेनात्मना चक्षु
रिव प्रणेता विशात्यये तमसा संस्तृतात्मा ॥ ज्ञानं तु विज्ञानगुणेन युक्तं कर्माशुभं पश्यति वर्जनीयं ॥ सर्पान्कुशाग्रा
णि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयंति ॥ अज्ञानतस्तत्र पतंति केचिज्ज्ञानं फलं पश्य यथा विशिष्टं ॥ कृत्स्न
स्तु मंत्रो विधिवत्प्रयुक्तो यज्ञा यथोक्तास्त्विह दक्षिणाश्च ॥ अन्नप्रदानं मनसः समाधिः पंचात्मकं कर्मफलं
वदंति ॥ गुणागुणं कर्म वदंति वेदास्तस्मान्मंत्रो मंत्रपूर्वं हि कर्म ॥ विधिर्विधेयं मनसोपपत्तिः फलस्य भोक्ता
तु तथा शरीरी ॥ शब्दाश्च रूपाणि रसाश्च पुण्याः स्पर्शाश्च गंधाश्च शुभास्तथैव ॥ नरोरहःस्थानगतः प्रभुः
स्यादेतत्फलं सिध्यति कर्मलोके ॥ यद्यच्छरीरेण करोति कर्म शरीरयुक्तः समुपाश्नुते तत् ॥ शरीरमेवाय
तनं सुखदुःखस्य चाप्यायतनं शरीरे ॥ वाचापि यत्कर्म यत्कर्म करोति किंचिद्वाचैव सर्वं समुपाश्नुते तत् ॥ मन
स्तु यत्कर्म करोति किंचिन्मनस्थ एवायमुपाश्नुते तत् ॥ यथा यथा कर्मगुणं फलार्थी करोत्ययं कर्मफले प्र
विष्टः ॥ तथा तथायं गुणसंप्रयुक्तः शुभाशुभं कर्मफलं भुनक्ति ॥ समत्स्यो यथास्रोत इवाभियाति तथा कृतं
पूर्वमुपैति कर्म ॥ शुभे त्वसौ तुष्यति दुष्कृते तु न तुष्यते वै परमः शरीरी ॥ यतो जगत्सर्वमिदं प्रसूतं ज्ञात्वा

त्मवंतो व्यधियंति यत्नात् ॥ यन्मंत्रशब्दैरकृतप्रकाशं तदुच्यमानं शृणु मे परं यत् ॥ सर्वैर्विमुक्तं विविधैश्च गं
धैरशब्दमस्पर्शमरूपवच्च ॥ अग्राह्यमव्यक्तमवर्णमेकं पंचप्रकारं ससृजे प्रजानां ॥ न स्त्री पुमान्वापि
नपुंसकं च न सन्न चासत्सदसच्च तन्न ॥ पश्यंति यद्ब्रह्मविदो मनुष्यास्तदक्षरं न क्षरतीति विद्धि ॥ ॥ शांतौ
मोक्षधर्मे ॥ ॥ मनुरुवाच ॥ ॥ अक्षरात्खं ततो वायुर्वायोर्ज्योतिस्ततो जलं ॥ जलात्प्रसूता जगती जग
त्यां जायते जगत् ॥ इमे शरीरैर्जलमेव गत्वा जलाच्च तेजः पवनोंतरिक्षं ॥ खाद्वै निवर्तंति नभाविनस्ते मोक्षं
च ते वै परमाप्नुवंति ॥ नोष्णं न शीतं मृदु नापि तीक्ष्णं नाम्लं कषायं मधुरं न तिक्तं ॥ न शब्दवन्नापि च गंधव
त्तन्न रूपवत्तत्परमस्वभावं ॥ स्पर्शं तनुर्वेद रसं च जिह्वा घ्राणं च गंधान्श्रवणे च शब्दान् ॥ रूपाणि चक्षु
र्न च तत्परं यद्गृह्णंत्यनध्यात्मविदो मनुष्याः ॥ निवर्तयित्वा रसनं रसेभ्यो घ्राणं च गंधाच्छ्रवणे च शब्दात् ॥
स्पर्शात्त्वचं रूपगुणात्तु चक्षुस्ततः परं पश्यति स्वं स्वभावं ॥ यतो गृहीत्वा हि करोति यच्च यस्मिंश्च तामा
रभते प्रवृत्तिं ॥ यस्मिंश्च यद्येन च यश्च कर्ता तत्कारणं तं समुपायमाहुः ॥ यश्चापि भूर्व्यापकसाधकं च य
न्मंत्रवत्स्थास्यति चापि लोके ॥ यः सर्वहेतुः परमार्थकारि तत्कारणं कार्यमतो यदन्यत् ॥ यथा हि कश्चि
त्सुकृतैर्मनुष्यः शुभाशुभं प्राप्नुतेथाविरोधात् ॥ एवं शरीरेषु शुभाशुभेषु स्वकर्मजैर्ज्ञानमिदं नि

बङ्कं ।। यथा प्रदीप्तः पनतः प्रदीपः प्रकाशमन्यस्य करोति दीप्यन् ।। यथेह पंचेंद्रियदीपवृक्षा ज्ञानप्रदीप्ताः परवंत
एव ।। यथा च राज्ञो बहवो ह्यमात्याः पृथक्प्रमाणं प्रवदंति युक्ताः ।। तद्वच्छरीरेषु भवंति पंच ज्ञानैकदेशाः परमः सदेशाः ।।
यथार्चिषोऽग्नेः पवनस्य वेगो मरीचयोऽर्कस्य नदीषु चापः ।। गच्छंति चायांति च संचरंतस्तद्वच्छरीराणि शरीरिणां तु ।। यथा हि क
श्चित्परशुं गृहीत्वा धूमं न पश्येज्ज्वलनं च योगात् ।। तद्वच्छरीरोदरपाणिपादं छित्वा न पश्यंति ततो यदन्यत् ।। तान्येव काष्ठानि य
था विमुच्य विमुं च पश्येज्ज्वलनं च योगात् ।। तद्वत्सुवर्हिः सममिंद्रियार्थैः बुधः परं पश्यति तं स्वभावं ।। यथात्मनोऽगं पतितं पृथि
व्यां स्वप्नांतरे पश्यति चात्मनोऽन्यत् ।। श्रोत्रादियुक्तः सुमना[illegible]बुद्धिर्लिंगात्तथा गच्छति लिंगमन्यत् ।। उत्पत्तिवृद्धिक्षयसंनिपातै
र्न युज्यतेऽसौ परमः शरीरी ।। अनेन लिंगेन तु लिंगमन्यद्गच्छत्यदृष्टः फलसन्नियोगात् ।। न चक्षुषा पश्यति रूपमात्मनो न चा
पि संस्पर्शमुपेति किंचित् ।। न चापि तैः साधयते तु कार्यं ते तं न पश्यंति स पश्यते तान् ।। यथा मनुष्यः परिमुच्य कायमदृश्यम
न्यद्विशते शरीरं ।। विसृज्य भूतेषु महत्सु देहं तदाश्रयं चैव बिभर्ति रूपं ।। खं वायुमग्निं सलिलं महीं च समंततोऽभ्याविशा
ते शरीरी ।। नानाश्रयाः कर्मसु वर्तमानाः श्रोत्रादयः शब्दगुणाश्रयंते ।। श्रोत्रं खतो घ्राणमथो पृथिव्यां तेजोमयं रूपमथो
विपाकः ।। जलाश्रयं तेज उक्तो रसश्च वाह्यात्मकाः स्पर्शकृतो गुणाश्च ।। महत्सु भूतेषु वदंति पंच पंचेंद्रियार्थाश्च तथेंद्रियेषु ।।
सर्वाणि चैतानि मनोगुणानि बुद्धेर्मनोन्वेति मनःस्वभावं ।। शुभाशुभं कर्मकृतं यदन्यत्तदेव प्रेत्याददते स्वदेहं ।। मनोनुवर्तं
ति प्रभावनापि जलौकसः स्रोत इवानुकूलं ।। चलं यथा दृष्टिपथं परैति सूक्ष्मं महाद्रूपमिवाभिभाति ।। स्वरूपमालोचप

ति च रूपं परं तथा बुद्धिपथं परैति ।। ।।शांतौ मोक्षधर्मे ।। ।।मनुरुवाच ।। ।। यदिंद्रियैस्तूपहितं पुरस्तात्प्राप्तान्गुणान्संस्मरते
ति चिराय ।। तेष्विंद्रियेषूपहतेषु पश्चात्स बुद्धिरूपः परमः स्वभावः ।। यथेंद्रियार्थान्युगपत्समंतान्नावेक्षते कृत्स्नमतुल्य
काल ।। तथा बलं संचरते स विद्वांस्तस्मात्स एकः परमः शरीरी ।। रजस्तमः सत्वमथो तृतीयं गच्छत्यसौ स्थानगुणा विरूपा
न् ।। तथेंद्रियाण्याविशते शरीरी हुताशनं वायुरिवेंधनस्थं ।। न चक्षुषा पश्यति रूपमात्मनो न पश्यति स्पर्शनमिंद्रियाणं
।। न श्रोत्रलिंगं श्रवणेन दर्शनं तथाकृतं पश्यति तद्विनश्यति ।। श्रोत्रादीनि न पश्यंति स्वं स्वमात्मानमात्मना ।। सर्वज्ञः सर्वदर्शी
च सर्वज्ञस्तानि पश्यति ।। यथा हिमवतः पार्श्वं पृष्ठं चंद्रमसो यथा ।। न दृष्टपूर्वं मनुजैर्न च तन्नास्ति भावना ।। तद्वद्भूतेषु भूता
त्मा सूक्ष्मो ज्ञानात्मवानसौ ।। अदृष्टपूर्वश्चक्षुर्भ्यां न चासौ नास्ति तावता ।। पश्यन्नपि यथा लक्ष्म जगत्सोमे न विंदति ।। एव
मस्ति नं चोसन्नं न च तत्वपरायणं ।। रूपवंतमरूपत्वादुदयास्तमये बुधाः ।। धिया समनुपश्यंति तद्गताः सवितुर्गतिं ।। तथा
बुद्धिप्रदीपेन दूरस्थं सुविपश्चितः ।। प्रत्यासन्ने विषीदंति ते यंत्ताना नाभिसंहितं ।। न हि खल्वनुपायेन कश्चिदर्थोऽभिसि
ध्यति ।। सूत्रजालैर्यथा मत्स्यान्बध्नंति जलजीविनः ।। मृगैर्मृगाणां ग्रहणं पक्षिणां पक्षिभिर्यथा ।। गजानां च गजैरेवं
ज्ञेयं ज्ञानेन गृह्यते ।। अहिरेव ह्यहेः पादान्पश्यतीति हि नः श्रुतं ।। तद्वन्मूर्तिषु मूर्तिस्थं ज्ञेयं ज्ञानेन पश्यति ।। नोत्सहं
ते यथा वेत्तुमिंद्रियैरिंद्रियाण्यपि ।। तथैवेह परा बुद्धिः परं बोध्यं न पश्यति ।। यथा चंद्रो ह्यमावास्यामलिंगत्वान्न दृश्य
ते ।। न च नाशोऽस्य भवति तथा विद्धि शरीरिणं ।। क्षीणकोशो ह्यमावास्यां चंद्रमा न प्रकाशते ।। तद्वन्मूर्तिविमुक्तोऽसौ शरी

रोनोपलभ्यते ।। यथाकोशांतरं प्राप्य चंद्रमा भ्राजते पुनः ।। तद्वल्लिंगांतरं प्राप्य शरीरी भ्राजते पुनः ।। जन्मवृद्धिक्षयश्चास्य
प्रत्यक्षेणोपलभ्यते ।। सा तु चांद्रमसी व्यक्तिर्न तु तस्य शरीरिणः ।। उत्पत्तिवृद्धिव्ययतो यथा स इति गृह्यते ।। चंद्र एवत्व
मावास्यां यथा भवति मूर्तिमान् ।। नाभिसर्पन्विमुंचद्वा शशिनं दृश्यते तमः ।। विसृजंश्चोपसर्पंश्च तद्वत्पश्य शरीरिणं ।।
यथा चंद्रार्कसंयुक्तं तमस्तदुपलभ्यते ।। तद्वच्छरीरसंयुक्तः शरीरीत्युपलभ्यते ।। यथा चंद्रार्कनिर्मुक्तः स राहुर्नोपल
भ्यते ।। तद्वच्छरीरनिर्मुक्तः शरीरी नोपलभ्यते ।। यथा चंद्रो ह्यमावास्यां नक्षत्रैर्युज्यते गतः ।। तद्वच्छरीरनिर्मुक्तः फलै
र्युज्यति कर्मणः ।। ।। शांतौ मोक्षधर्मे ।। ।। मनुरुवाच ।। ।। यथा व्यक्तमिदं शेते स्वप्ने चरति चेतनं ।। ज्ञानमिंद्रियसंयु
क्तं तद्वत्प्रेत्य भवाभवौ ।। यथांभसि प्रसंने तु रूपं पश्यति चक्षुषा ।। तद्वत्प्रसंनेंद्रियवाञ्ज्ञेयं ज्ञानेन पश्यति ।।
स एव लुलिते तस्मिन्यथा रूपं न पश्यति ।। तथेंद्रियाकुलीभावे ज्ञेयं ज्ञाने न पश्यति ।। अबुद्धिरज्ञानकृता अबु
द्ध्या दुष्यते मनः ।। दुष्टस्य मनसः पंच संप्रदुष्यंति मानसाः ।। अज्ञानतृप्तो विषयेष्ववगाढो न तृप्यति ।। अदृष्टवच्च भू
तात्मा विषयेभ्यो निवर्तते ।। तर्षच्छेदो न भवति पुरुषस्येह कल्मषात् ।। निवर्तते तदा तर्षः पापमंतगतं यदा ।। विषये
षु तु संसर्गाच्छाश्वतस्य तु संशयात् ।। मनसा चान्यथा कांक्षन्परं न प्रतिपद्यते ।। ज्ञानमुत्पद्यते पुंसां क्षया
त्पापस्य कर्मणः ।। यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि ।। प्रसृतैरिंद्रियैर्दुःखी तैरेव नियतः सुखी ।। तस्मा

दिंद्रियरूपेभ्यो यच्छेदात्मानमात्मना ।। इंद्रियेभ्यो मनः पूर्वं बुद्धिः परतरा ततः ।। बुद्धेः परतरं ज्ञानं ज्ञानात्परतरं महत् ।। अ
व्यक्तात्प्रसूतं ज्ञानं ततो बुद्धिस्ततो मनः ।। मनः श्रोत्रादिभिर्युक्तं शब्दादीन्साधु पश्यति ।। यस्तांस्त्यजति शब्दादीन्
सर्वांश्च व्यक्तयस्तथा ।। विमुंचत्प्राकृतान्ग्रामांस्तान्मुक्तोमृतमश्नुते ।। उद्यन्हि सविता यद्वत्सृजते रश्मिमंड
लं ।। स एवास्तमुपागच्छंस्तदेवात्मनि यच्छति ।। अंतरात्मा यथा देहमाविश्येंद्रियरश्मिभिः ।। प्राप्येंद्रियगुणान्पं
च सोस्तमावृत्य गच्छति ।। प्रणीतं कर्मणा मार्गं नीयमानः पुनः पुनः ।। प्राप्नोत्ययं कर्मफलं प्रवृद्धं धर्ममात्मवान् ।। वि
षया विनिवर्तंते निराहारस्य देहिनः ।। रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते ।। बुद्धिः कर्मगुणैर्हीना यदा मनसि
वर्तते ।। तदा संपद्यते ब्रह्म तत्रैव प्रलयं गतं ।। अस्पर्शनमशृण्वानमनास्वादमदर्शनं ।। अघ्राणमवितर्कं च सत्
त्वं प्रविशते परं ।। मनस्याकृतयो मग्ना मनस्त्वभिगतं मतिं ।। मतिस्त्वभिगता ज्ञाने ज्ञानं त्वभिगतं परं ।। इंद्रियै
र्मनसः सिद्धिर्न बुद्धिं बुध्यते मनः ।। न बुद्धिर्बुध्यतेऽव्यक्तं सूक्ष्मस्त्वेतानि पश्यति ।। ।। शांतौ मोक्षधर्मे ।। ।। म
नुरुवाच ।। ।। दुःखोपघाते शारीरे मानसे वाप्युपस्थिते ।। यस्मिन्न शक्यते कर्तुं यत्नस्तं नानुचिंतयेत् ।। भैषज्यमेत
द्दुःखस्य यदेतन्नानुचिंतयेत् ।। चिंत्यमानं हि चाभ्येति भूयश्चापि प्रवर्तते ।। प्रज्ञया मानसं दुःखं हन्याच्छारीरमौष
धैः ।। एतद्विज्ञानसामर्थ्यं न बालैः समतामियात् ।। अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयाः ।। आरोग्यं प्रियसं

वासो रक्ष्यतञ्च न पंडितः ॥ न ज्ञानपदिकं दुःखमेकः शोचितुमर्हसि ॥ अशोचन्प्रतिकुर्वीत यदि पश्येदुपक्रमं ॥ सुखाद्ब
हुतरं दुःखं जीविते नात्र संशयः ॥ स्निग्धस्य चेंद्रियार्थेषु मोहान्मरणमप्रियं ॥ परित्यजति यो दुःखं सुखं चाप्युभ
यं नरः ॥ अभ्येति ब्रह्म सोऽत्यंतं न ते शोचंति पंडिताः ॥ दुःखमर्थाहि युज्यंते पालने न च ते सुखं ॥ दुःखेन चाधिगम्यं
तेनाशमेषां न चिंतयेत् ॥ ज्ञानं ज्ञेयाभिनिर्वृत्तं विद्धि ज्ञानगुणो मनः ॥ प्रज्ञाकरणसंयुक्तं ततो बुद्धिः प्रवर्तते ॥ य
दा कर्मगुणोपेता बुद्धिर्मनसि वर्तते ॥ तदा प्रज्ञायते ब्रह्म ध्यानयोगसमाधिना ॥ सेयं गुणवती बुद्धिर्गुणेष्वे
वाभिवर्तते ॥ अपधादभि निःस्त्रवयगिरेः शृंगादिवोदकं ॥ यदा निर्गुणमाप्नोति ध्यानं मनसि पूर्वजं ॥ तदा प्रज्ञा
यते ब्रह्म निकषं निकषे यथा ॥ मनस्त्वपहृतं पूर्वमिंद्रियार्थनिदर्शकं ॥ न समक्षमगुणापेक्षि निर्गुणस्य निदर्शनं ॥
सर्वाण्येतानि संवार्य द्वाराणि मनसि स्थितः ॥ मनस्येकाग्रतां कृत्वा तत्परं प्रतिपद्यते ॥ यदा महांति भूतानि नि
वर्तंते गुणाक्षये ॥ तदेंद्रियाण्युपादाय बुद्धिर्मनसि वर्तते ॥ यदा मनसि सा बुद्धिर्वर्तते तरचारिणी ॥ व्यवसाय
गुणोपेता तदा संपद्यते मनः ॥ गुणवद्भिर्गुणोपेतं यदा ध्यानगुणं मनः ॥ तदा सर्वान्गुणान्हित्वा निर्गुणं प्र
तिपद्यते ॥ अव्यक्तस्येह विज्ञाने नास्ति तुल्यं निदर्शनं ॥ यत्र नास्ति पदन्यासः कस्तं विषयमाप्नुयात् ॥ तपसा चानु
मानेन गुणैर्जात्या श्रुतेन च ॥ निनीषेस रमं ब्रह्म विशुद्धेनांतरात्मना ॥ गुणहीनो पितन्मार्गं बहिः समनुवर्तते ॥ ३८

गुणाभावात्प्रकृत्या वास्तर्क्यं ज्ञेयसंमतं ॥ नैर्गुण्याद्ब्रह्म चाप्नोति सगुणत्वान्निवर्तते ॥ गुणप्रसारिणी बुद्धिर्हुता
शन इवेंधने ॥ यथा पंच विमुक्तानि इंद्रियाणि स्वकर्मभिः ॥ तथा हि परमं ब्रह्म विमुक्तं प्रकृतेः परं ॥ एवं प्रकृतितः सर्वे प्र
वर्तंते शरीरिणः ॥ निवर्तंते निवृत्तौ च सर्गं नैवोपयांति च ॥ पुरुषः प्रकृतिर्बुद्धिर्विषयाश्चेंद्रियाणि च ॥ अहंकारो
ऽभिमानश्च समूहो भूतसंज्ञकः ॥ एतस्याद्या प्रवृत्तिस्तु प्रधानात्संप्रवर्तते ॥ द्वितीया मिथुनव्यक्तिमविशेषान्निय
च्छति ॥ धर्मादुत्कृष्यते श्रेयस्तथाऽश्रेयो ह्यधर्मतः ॥ रागवान्प्रकृतिं ह्येति विरक्तो ज्ञानवान्भवेत् ॥ ॥ इति मोक्ष
धर्मे ॥ ॥ मनुरुवाच ॥ ॥ यदा ते पंचभिः पंच युक्तानि मनसा सह ॥ अथ तद्द्रक्ष्यते ब्रह्म मणौ सूत्रमिवार्पितं ॥ तदेव
च यथा सूत्रं सुवर्णे वर्तते पुनः ॥ मुक्तास्वथ प्रवालेषु मृन्मये राजते तथा ॥ तद्वद्गोश्वमनुष्येषु तद्वद्धस्तिमृगादि
षु ॥ तद्वत्कीटपतंगेषु प्रसक्तात्मा स्वकर्मभिः ॥ येन येन शरीरेण यद्यत्कर्म करोत्ययं ॥ तेन तेन शरीरेण तत्तत्फ
लमुपाश्नुते ॥ यथा ह्येकरसा भूमिरोषध्यात्मानुसारिणी ॥ तथा कर्मानुगा बुद्धिरंतरात्मानुदर्शिनी ॥ ज्ञानपूर्वा
भवेल्लिप्सा लिप्सापूर्वाभिसंधिता ॥ अभिसंधिपूर्वकं कर्म कर्ममूलं ततः फलं ॥ फलं कर्मात्मकं विंद्यात्कर्म ज्ञेयात्म
कं तथा ॥ ज्ञेयं ज्ञानात्मकं विंद्याज्ज्ञानं सदसदात्मकं ॥ ज्ञानानां च फलानां च ज्ञेयानां कर्मणां तथा ॥ क्षयांते यत्फलं
दिव्यं ज्ञानं ज्ञेयं प्रतिष्ठितं ॥ महद्धि परमं भूतं युक्ताः पश्यंति योगिनः ॥ अबुद्धास्तं न पश्यंति ह्यात्मस्थं गुण

मोक्षधर्म०

३८

बुद्धयः॥ पृथिवीरूपतो रूपमपामिह महत्तरं॥ अद्भ्यो महत्तरं तेजस्तेजसः पवनो महान्॥ पवनाच्च महद्व्योम तस्मा
त्परतरं मनः॥ मनसो महती बुद्धिर्बुद्धेः कालो महान् स्मृतः॥ कालात्स भगवान् विष्णुर्यस्य सर्वमिदं जगत्॥ नादिर्न मध्यं
नैवांतस्तस्य देवस्य विद्यते॥ अनादित्वादमध्यत्वादनंतत्वाच्च सोव्ययः॥ अत्येति सर्वदुःखानि दुःखं ह्यंतवदुच्यते॥ त
द्ब्रह्म परमं प्रोक्तं तद्धाम परमं पदं॥ तद्गत्वा कालविषयाद्विमुक्ता मोक्षमाश्रिताः॥ गुणेष्वेते प्रकाशंते निर्गुणत्वा
त्ततः परं॥ निवृत्तिलक्षणो धर्मस्तथानंत्याय कल्पते॥ ऋचो यजूंषि सामानि शरीराणि व्यपाश्रिताः॥ जिह्वाग्रेषु
प्रवर्तंते यत्नसाध्या विनाशिनः॥ न चैवमिष्यते ब्रह्म शरीराश्रयसंभवं॥ न यत्नसाध्यं तद्ब्रह्म नादिमध्यं न चांतवद्
॥ ऋचामादिस्तथा साम्नां यजुषामादिरुच्यते॥ अंतश्चादिमतां दृष्टो न चादिर्ब्रह्मणः स्मृतः॥ अनादित्वादनंतत्वा
त्तदनंतमथाव्ययं॥ अव्ययत्वाच्च निर्द्वंद्वं द्वंद्वाभावात्ततः परं॥ अदृष्टतोनुपायाच्च प्रतिसंधेश्च कर्मणः॥ न ते
न मर्त्याः पश्यंति येन गच्छंति तत्पदं॥ विषयेषु च संसर्गाच्छाश्वतस्य च संशयात्॥ मनसा चान्यदाकांक्षन्
परं न प्रतिपद्यते॥ गुणान् हि यदि पश्यंति तदिच्छंत्यपरे जनाः॥ परं नैवाभिकांक्षंति निर्गुणत्वाद्गुणार्थिनः॥
गुणैर्यस्त्ववरैर्युक्तः कथं विद्यात्परान्गुणान्॥ अनुमानाद्धि गंतव्यं गुणैरवयवैः परं॥ सूक्ष्मेणामनसा
विप्रो वाचा वक्तुं न शक्नुमः॥ मनो हि मनसा ग्राह्यं दर्शनेन च दर्शनं॥ ज्ञानेन निर्मलीकृत्य बुध्या बुध्याम ३८

नस्तथा॥ मनसा चेंद्रियग्राममक्षरं प्रतिपद्यते॥ बुद्धिप्रहीनो मनसासमृद्धो निराशिषनिर्गुणमभ्युपेति॥ परं
त्यजंतीह विलोड्यमाना हुताशनं वायुरिवेंधनस्थं॥ गुणादाने विप्रयोगे च तेषां मनः सदा बुद्धिपरावराभ्यां॥
अनेनैव विधिना संप्रवृत्तो गुणादाने ब्रह्म शरीरमेति॥ अव्यक्तात्मा पुरुषोव्यक्तकर्मा सोव्यक्तत्वं गच्छति ह्यं
तकाले॥ तैरेवायं चेंद्रियैर्वर्ध्यमानैर्ग्लायद्भिर्वा वर्तते कामरूपः॥ सर्वैरयं चेंद्रियैः संप्रयुक्तो देहंप्राप्तः पंच
भूताश्रयः स्यात्॥ नासामर्थ्याद्गच्छति कर्मणेह हीनस्तेन परमेणाव्ययेन॥ पृथ्व्या नरः पश्यति नांतमस्याः
ह्यंतश्चास्या भविता चेति विद्धि॥ परं नयंतीह विलोड्यमानो यथा प्लवं वायुरिवार्णवस्थं॥ दिवाकरोमुपल गुण
भ्य निर्गुणो यथा भवेद्व्यपगतरश्मिमंडलः॥ तथा ह्यसौ मुनिरिह निर्विशेषवान्स निर्गुणं प्रविशति ब्रह्म
चाव्ययं॥ अनागतं सुकृतवतां परां गतिं स्वयंभुवं प्रभवविधानमव्ययं॥ अनादिमध्यां मृतमव्ययं ध्रुवं
निवाय्य तच्छममृतत्वमश्नुते॥ ॥मोक्षधर्मे॥ ॥मनुबृहस्पतिसंवादः समाप्तः॥ ॥युधिष्ठिर उवाच॥
के पूर्वमासन्पतयः प्रजानां भरतर्षभ॥ के चर्षयो महाभागा दिक्षु प्रत्येकशः स्थिताः॥ ॥भीष्म उवाच॥
श्रूयतां भरतश्रेष्ठ यन्मां त्वं परिपृच्छसि॥ प्रजानां पतयो येस्मिन्दिक्षु ये च ऋषयः स्मृताः॥ एकः स्वयंभूर्भ
गवानाद्यो ब्रह्मा सनातनः॥ ब्रह्मणः सप्त वै पुत्रा महात्मानः स्वयंभुवः॥ मरीचिरत्र्यंगिरसौ पुल

स्त्यः पुलहः क्रतुः॥ वशिष्टश्च महाभागाः सदृशो वै स्वयंभुवः॥ सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः॥ अत ऊर्ध्वं प्रव
क्ष्यामि सर्वानेव प्रजापतीन्॥ अत्रिवंशसमुत्पन्नो ब्रह्मयोनिः सनातनः॥ प्राचीनबर्हिर्भगवांस्तस्मात्प्राचेतसो दश॥
दशानां तनयस्त्वेको दक्षो नाम प्रजापतिः॥ तस्य द्वे नामनी लोके दक्षः क इति चोच्यते॥ मरीचेः कश्यपः पुत्रस्तस्य द्वे नाम
नी स्मृते॥ अरिष्टनेमिरित्येके कश्यपेत्यपरे विदुः॥ अत्रेश्चैवौरसः श्रीमान् राजा सोमश्च वीर्यवान्॥ सहस्रं यश्च
दिव्यानां युगानां पर्युपासिता॥ अर्यमा चैव भगवान्ये चान्ये तनया विभो॥ एते प्रदेशाः कथिता भुवनानां प्रभावनाः॥
शशबिंदोस्तु भार्याणां सहस्राणि दशाच्युत॥ एकैकस्यां सहस्रं तु तनयानामभूत्तदा॥ एवं शतसहस्राणि शतं तस्य
महात्मनः॥ पुत्राणां न च ते किंचिदिच्छंत्यन्यं प्रजापतिं॥ प्रजामाचक्षते विप्राः पुराणाः शाशबिंदवीं॥ स वृष्णिवंशप
भवो महावंशः प्रजापतेः॥ एते प्रजानां पतयः समुद्दिष्टा यशस्विनः॥ अतः परं प्रवक्ष्यामि देवांस्त्रिभुवनेश्वरा
न्॥ भगोंशश्चार्यमा चैव मित्रोथ वरुणस्तथा॥ सविता चैव धाता च विवस्वांश्च महाबलः॥ त्वष्टा पूषा तथैवेंद्रो
द्वादशो विष्णुरुच्यते॥ इत्येते द्वादशादित्याः कश्यपस्यात्मसंभवाः॥ नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनावपि॥ मा श्चैव
र्तंडस्यात्मजावेतावष्टमस्य महात्मनः॥ ते च पूर्वासुराश्चेति विविधाः पितरः स्मृताः॥ त्वष्टुश्चैवात्मजः श्रीमान्विश्व
रूपो महायशाः॥ अजैकपादहिर्बुध्न्यो विरूपाक्षोथ रैवतः॥ हरश्च बहुरूपश्च त्र्यंबकश्च सुरेश्वरः॥ सावित्रश्च ३९

जयंतश्च पिनाकी चापराजितः॥ पूर्वमेव महाभागा वसवोष्टौ प्रकीर्तिताः॥ एत एवंविधा देवा मनोरेव प्रजापतेः॥ ते च
पूर्वे सुराश्चेति द्विविधाः पितरः स्मृताः॥ शीलयौवनतस्त्वन्ये तथान्ये सिद्धसाध्ययोः॥ ऋभवो मरुतश्चैव देवानां चोदिताग
णाः॥ एवमेते समाम्नाता विश्वेदेवास्तथाश्विनौ॥ आदित्याः क्षत्रियास्तेषां विशश्च मरुतस्तथा॥ अश्विनौ तु स्मृतौ शूद्रौ तपस्यु
ग्रे समास्थितौ॥ स्मृतास्त्वंगिरसो देवा ब्राह्मणा इति निश्चिताः॥ इत्येतत्सर्वदेवानां चातुर्वर्ण्यं प्रकीर्तितं॥ एतान्वै प्रातरु
त्थाय देवान्यस्तु प्रकीर्तयेत्॥ स्वजादन्यकृताच्चैव सर्वपापात्प्रमुच्यते॥ यवक्रीतोथ रैभ्यश्च अर्वावसुपरावसू॥ उशि
जश्चैव कक्षीवान्बलश्चांगिरसः स्मृतः॥ ऋषिर्मेधातिथेः पुत्रः कण्वो बर्हिषदस्तथा॥ त्रैलोक्यभावनास्तात प्राच्यां स
प्तर्षयस्तथा॥ उन्मुचो विमुचश्चैव स्वस्त्यात्रेयश्च वीर्यवान्॥ प्रमुचश्चेध्मवाहश्च भगवांश्च दृढव्रतः॥ मित्रावरुणयोः
पुत्रस्तथागस्त्यः प्रतापवान्॥ एते ब्रह्मर्षयो नित्यमास्थिता दक्षिणां दिशं॥ उषंगुः कवषो धौम्यः परिव्याधश्च वीर्य
वान्॥ एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः॥ अत्रेः पुत्रश्च भगवांस्तथा सारस्वतः प्रभुः॥ एते चैव महात्मानः पश्चि
मामाश्रिता दिशं॥ आत्रेयश्च वशिष्टश्च काश्यपश्च महानृषिः॥ गौतमोथ भरद्वाजो विश्वामित्रोथ कौशिकः॥ तथैव
पुत्रो भगवानृचीकस्य महात्मनः॥ जमदग्निश्च सप्तैते उदीचीमाश्रिता दिशं॥ एते प्रतिदिशं सर्वे कीर्तितास्तिग्मते
जसः॥ साक्षिभूता महात्मानो भुवनानां प्रभावनाः॥ एवमेते महात्मानः स्थिताः प्रत्येकशो दिशि॥ एतेषां कीर्तनं कृ

त्वा सर्वपापात्प्रमुच्यते ॥ यस्यां यस्यां दिशि ध्येयेते तां दिशं शाच पोगतः ॥ मुच्यते सर्वपापेभ्यः स्वस्तिमांश्चगृहान्व्रजेत् ॥ ॥
शांतो मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ पितामह महाप्राज्ञ पुंडरीकाक्षमच्युतं ॥ कर्तारमकृतं विष्णुं भूतानां प्र
भवाप्ययं ॥ नारायणं हृषीकेशं गोविंदमपराजितं ॥ तत्वेन भरतश्रेष्ठ श्रोतुमिच्छामि केशवं ॥ ॥ भीष्म उवाच ॥ ॥
श्रुतोयमर्थो रामस्य जामदग्न्यस्य जल्पतः ॥ नारदस्य च देवर्षेः कृष्णद्वैपायनस्य च ॥ असितो देवलस्तात वाल्मीकि
श्च महातपाः ॥ मार्कंडेयश्च गोविंदे कथयंत्यद्भुतं महत् ॥ केशवो भरतश्रेष्ठ भगवानीश्वरः प्रभुः ॥ पुरुषः सर्वमित्येव श्रू
यते बहुधा विभुः ॥ किंतु यानि विदुर्लोके ब्राह्मणाः शार्ङ्गधन्वनि ॥ महात्मनि महाबाहो शृणु तानि युधिष्ठिर ॥ यानि चा
हुर्मनुष्येंद्र ये पुराणविदो जनाः ॥ कर्मापि त्विह गोविंदे कीर्तयिष्यामि तोनहं ॥ महाभूतानि भूतात्मा महात्मा पु
रुषोत्तमः ॥ वायुर्ज्योतिस्तथा चापः खं च गां चान्वकल्पयत् ॥ स दृष्ट्वा पृथिवीं चैव सर्वभूतेश्वरः प्रभुः ॥ अप्स्वेव शय
नं चक्रे महात्मा पुरुषोत्तमः ॥ सर्वतेजोमयस्तस्मिन् शयानः पुरुषोत्तमः ॥ सोग्रजं सर्वभूतानां संकर्षणमकल्पयत् ॥
आश्रयं सर्वभूतानां मनसेति हि शुश्रुम ॥ स धारयति भूतानि उभे भूतभविष्यती ॥ ततस्तस्मिन्महाबाहो प्रादुर्भू
ते महात्मनि ॥ भास्करप्रतिमं दिव्यं नाभ्यां पद्ममजायत ॥ ततः स भगवान्देवः पुष्करे भासयन्दिशः ॥ ब्रह्मा समभवत्ता
त सर्वभूतहिते रतः ॥ तस्मिन्नपि महाबाहो प्रादुर्भूते महात्मनि ॥ तमसः पूर्वजो जज्ञे मधुर्नाम महासुरः ॥ तमुग्र

५०

मुग्रकर्माणमुग्रं कर्म समास्थितं ॥ ब्रह्मणोपचितिं कुर्वन्जघान पुरुषोत्तमः ॥ तस्य तात वधात्सर्वे देवदानवमा
नवाः ॥ मधुसूदनमित्याहुर्वृषभं सर्वसात्वतां ॥ ब्रह्मा तु ससृजे पुत्रान्मानसान्दक्षससमान् ॥ मरीचिम
त्र्यंगिरसं पुलस्त्यं पुलहं क्रतुं ॥ मरीचिः कश्यपं तात पुत्रमग्रजमग्रजः ॥ मानसं जनयामास तैजसं ब्रह्मवित्त
मं ॥ अंगुष्ठादसृजद्ब्रह्मा मरीचेरपि पूर्वजं ॥ सोभवद्भरतश्रेष्ठ दक्षो नाम प्रजापतिः ॥ तस्य पूर्वमजायंत द
श तिस्रश्च भारत ॥ प्रजापतेर्दुहितरस्तासां श्रेष्ठाभवद्दितिः ॥ सर्वधर्मविशेषज्ञः पुण्यकीर्तिर्महायशाः ॥ मा
रीचः काश्यपस्तात सर्वासामभवत्पतिः ॥ उत्पाद्य तु महाभागस्तासामवरजा दश ॥ ददौ धर्माय धर्मज्ञो दक्ष
३ एव प्रजापतिः ॥ धर्मस्य वसवः पुत्रा रुद्राश्चामिततेजसः ॥ विश्वेदेवाश्च साध्याश्च मरुत्वंतश्च भारत ॥ अपरास्त्व
यवीयस्यस्ताभ्योन्याः सप्तविंशतिः ॥ सोमस्तासां महाभागः सर्वासामभवत्पतिः ॥ इतरास्तु व्यजायंत गंध
र्वांस्तुरगान्द्विजान् ॥ गाश्च किंपुरुषान्मत्स्यानुद्भिजांश्च वनस्पतीन् ॥ आदित्यानदितिर्जज्ञे देवश्रेष्ठान्महाब
लान् ॥ तेषां विष्णुर्वामनोभूद्गोविंदश्चाभवत्प्रभुः ॥ तस्य विक्रमणाच्चापि देवानां श्रीर्व्यवर्द्धत ॥ दानवाश्च पराभू
ता दैतेयी चासुरी प्रजा ॥ विप्रचित्तिप्रधानांश्च दानवानसृजद्दनुः ॥ दितिश्च सर्वानसुरान्महासत्वानजीजन
त् ॥ अहोरात्रं च कालं च यथर्तु मधुसूदनः ॥ पूर्वाह्णं चापराह्णं च स्वयमेवान्वकल्पयत् ॥ प्रध्याय सोसृजन्मे

घाव्दस्तथा स्थावरजंगमाः॥ पृथिवीं सासृजद्विश्वां सहितां भूरितेजसा॥ ततः कृष्णो महाभागः पुनरेव युधिष्ठिर॥ ब्राह्मणानां शतं श्रेष्ठं मुखादेवासृजत्प्रभुः॥ बाहुभ्यां क्षत्रियशतं वैश्यानामूरुतः शतं॥ पद्भ्यां शूद्रशतं चैव केशवो भरतर्षभ॥ स एवं चतुरो वर्णान्समुत्पाद्य महातपाः॥ अध्यक्षं सर्वभूतानां धातारमकरोत्स्वयं॥ वेदविद्याविधातारं ब्रह्मणामितद्युतिं॥ भूतमातृगणाध्यक्षं विरूपाक्षं च सोऽसृजत्॥ शास्तारं सर्वपापानां पितॄणां समवर्तिनं॥ असृजत्सर्वभूतानां निधिपं च धनेश्वरं॥ यादसामसृजन्नाथं वरुणं च जलेश्वरं॥ वासवं सर्वदेवानामध्यक्षमकरोत्प्रभुः॥ यावद्यावदभूच्छ्रद्धा देहं धारयितुं नृणां॥ तावत्तावदजीवंस्ते नासीद्यमकृतं भयं॥ न चैषां मैथुनो धर्मो बभूव भरतर्षभ॥ संकल्पादेव चैतेषामपत्यमुपपद्यते॥ ततस्त्रेतायुगे काले संस्पर्शाज्जायते प्रजाः॥ न ह्यभून्मैथुनधर्मस्तेषामपि नराधिप॥ द्वापरे मैथुनो धर्मः प्रजानामभवन्नृप॥ तथा कलियुगे राजन्द्वंद्वमापेदिरे जनाः॥ एष भूतपतिस्तात स्वाध्यक्षश्च तथोच्यते॥ निरपेक्षांश्च कौंतेय कीयिष्यामि तच्छृणु॥ र्त दक्षिणापथगामिन्यः सर्वे नरवरांध्रकाः॥ गुहापुलिंदाः शबराश्चुचुकामद्रकैः सह॥ उत्तरापथजन्मानः कीर्तयिष्यामि तानपि॥ यौनकांबोजगांधाराः किराता बर्बरैः सह॥ एते पापकृतस्तात चरंति पृ

थिवीमिमां॥ श्वपाकबलगृध्राणां सधर्माणो नराधिप॥ नैते कृतयुगे तात चरंति पृथिवीमिमां॥ त्रेताप्रभृति वर्द्धंते ते जसा भरतर्षभ॥ ततस्तस्मिन्महाघोरे संध्याकाल उपस्थिते॥ राजानः समसज्जंत समासाद्येतरेतरं॥ एवमेपकुरुश्रेष्ठ प्रादुर्भूतो महात्मवान्॥ देवदेवर्षिराचष्ट नारदः सर्वलोकदृक्॥ नारदोऽप्यथ कृष्णस्य परं मेने नराधिप॥ शाश्वतत्वं महाबाहो यथावद्भरतर्षभ॥ एवमेष महाबाहुः केशवः सत्यविक्रमः॥ अचिंत्यः पुंडरीकाक्षो नैष केवलमानुषः॥ ॥ शांतौ मोक्षधर्मे॥ ॥ युधिष्ठिर उवाच॥ ॥ पितामह महाप्राज्ञ युधिसत्यपराक्रम॥ श्रोतुमिच्छामि कार्त्स्न्येन कृष्णमव्ययमीश्वरं॥ यच्चास्य कर्म सुमहद्यच्च कर्म पुरा कृतं॥ तन्मे सर्वं यथातत्वं ब्रूहि त्वं भरतर्षभ तिर्यग्योनिगतं रूपं कथं धारितवान्प्रभुः॥ केन कार्यनिसर्गेण तमाख्याहि महाव्रता॥ ॥ भीष्म उवाच॥ ॥ पुराहं मृगयां यातो मार्कंडेयाश्रमे स्थितः॥ तत्रापश्यन्मुनिगणान्समासीनान्सहस्रशः॥ ततस्ते मधुपर्केण पूजां चक्रुरथो मयि॥ प्रतिगृह्य च तां पूजां प्रत्यनंदमृषीनहं॥ कथैषा कथिता तत्र कश्यपेन महर्षिणा॥ मनःप्रल्हादिनीं दिव्यां तामिहैकमनाः शृणु॥ पुरा दानवमुख्या हि क्रोधलोभसमन्विताः॥ बलेन मत्ताः शतशो नरकाद्या महासुराः॥ तथैव चान्ये बहवो दानवा युद्धदुर्मदाः॥ न सहंते स्म देवानां समृद्धिं तामनुत्तमां॥ दानवैरर्द्यमाना तु देवा देवर्षयस्तथा॥ न शर्म लेभिरे राजन्विशमानास्ततस्ततः॥ पृथिवीं चार्त्तरूपा

ते समपश्यन्न दिवौकसः ॥ दानवेरभिसंकीर्णीं घोररूपेर्महाबलैः ॥ भारार्त्तामप्रहृष्टां च दुःखितां संनिमज्जतीं
॥ अथादितेयाः संत्रस्ता ब्रह्माणमिदमब्रुवन् ॥ कथं शक्ष्यामहे ब्रह्मन्न दानवैरभिमर्दनं ॥ स्वयंभुस्तानुवचिदं
निसृष्टोऽत्र विधिर्मया ॥ तेवरेणाभिसंपन्ना बलेन च मदेन च ॥ नावबुध्यंति संमूढा विष्णुमव्यक्तदर्शनं ॥ वराहरू
पिणं देवमधृष्यममरैरपि ॥ एष वेगेन हत्वाहि यत्रते दानवाधमाः ॥ अंतर्भूमिगता घोरा निवसंति सहस्रशः ॥
शामयिष्यत श्रुत्वा जहृषुः सुरसत्तमाः ॥ ततो विष्णुर्महातेजा वाराहं रूपमास्थितः ॥ अंतर्भूमिं संप्रविश्य जगाम
दितिजान्प्रति ॥ दृष्ट्वा च सहिताः सर्वे दैत्याः सत्वममानुषं ॥ प्रसह्य तरसा सर्वे संतस्थुः कालमोहिताः ॥ तत
स्ते समभिद्रुत्य वाराहं जगृहुः समं ॥ संक्रुद्धाश्च वराहं तं व्यकर्षत समंततः ॥ दानवेंद्रा महाकाया महावीर्यब
लोच्छ्रिताः ॥ नाशक्नुवंश्च किंचित्ते तस्य कर्तुं तदा विभो ॥ ततोऽगच्छन्विस्मयं ते दानवेंद्रा भयं तथा ॥ संशयं गतमात्मानं
मेनिरे च सहस्रशः ॥ ततो देवाधिदेवः स योगात्मा योगसारथिः ॥ योगमास्थाय भगवांस्तदा भरतसत्तम ॥ विननाद म
हानादं क्षोभयन्दैत्यदानवान् ॥ संनादिता येन लोकाः सर्वाश्चैव दिशो दश ॥ तेन संनादशब्देन लोकानां क्षोभ आगम
त् ॥ संत्रस्ताश्च भृशं लोके देवाः शक्रपुरोगमाः ॥ निर्विचेष्टं जगच्चापि बभूवातिभृशं तदा ॥ स्थावरं जंगमं चैव तेन ना
न देन मोहितं ॥ ततस्ते दानवाः सर्वे तेन नादेन भीषिताः ॥ पेतुर्गतासवश्चैव विष्णुतेजःप्रमोहिताः ॥ रसातलगतांश्चापि वारा ५२

हस्त्रिदशद्विषः ॥ खुरैर्विदारयामास मांसमेदोस्थिसंचयान् ॥ नादेन तेन महता सनातन इति स्मृतः ॥ पद्मनाभो महा
योगी योगाचार्यः स भूतराट् ॥ ततो देवगणाः सर्वे पितामहमुपाद्रवन् ॥ तत्र गत्वा महात्मानमूचुश्चैव जगत्पतिं ॥ नादो
यं कीदृशो देव नैनं विद्म वयं प्रभो ॥ कोऽसौ कस्य वा नादो येन विह्वलितं जगत् ॥ देवाश्च दानवाश्चैव मोहितास्तस्य तेजसा
॥ एतस्मिन्नंतरे विष्णुर्वाराहं रूपमास्थितः ॥ उदतिष्ठन्महाबाहो स्तूयमानो महर्षिभिः ॥ ॥ पितामहः ॥ ॥ निहत्य दानवपती ह
न्महावर्ष्मा महाबलः ॥ एष देवो महायोगी भूतात्मा भूतभावनः ॥ सर्वभूतेश्वरो योगी योनिरात्मा तथात्मनः ॥ स्थिरीभ
वतु हे क्षोयं सर्वविघ्नविनाशनः ॥ कृत्वा कर्मातिसाध्वेतदशक्यममितप्रभः ॥ समायातः स्वमात्मानं महाभागो महा
द्युतिः ॥ पद्मनाभो महायोगी महात्मा भूतभावनः ॥ न संतापो न भीः कार्या शोको वा सुरसत्तमाः ॥ विधिरेष प्रभावश्च का
लः संक्षयकारकः ॥ लोका धारयता तेन नादो मुक्तो महात्मना ॥ स एष हि महाबाहुः सर्वलोकनमस्कृतः ॥ अच्युतः
पुंडरीकाक्षः सर्वभूतादिरीश्वरः ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ योगं मे परमं तात मोक्षस्य वद भा
रत ॥ तदहं तत्वतो ज्ञातुमिच्छामि वदतां वर ॥ ॥ भीष्म उवाच ॥ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ संवादं मोक्ष
संयुक्तं शिष्यस्य गुरुणा सह ॥ कश्चिद्ब्राह्मणमासीनमाचार्यमृषिसत्तमं ॥ तेजोराशिं महात्मानं सत्यसंधं जितेंद्रियं
॥ शिष्यः परममेधावी श्रेयोर्थी सुसमाहितः ॥ चरणावुपसंगृह्य स्थितः प्रांजलिरब्रवीत् ॥ उपासनात्प्रसन्नोसि यदि

वै भगवान्मम ॥ संशयो मे महान्कश्चित्तन्मे व्याख्यातुमर्हसि ॥ कुतश्चाहं कुतश्च त्वं तत्सम्यग्ब्रूहि यत्परं ॥ कथं च सर्व
त्तेषु समेषु द्विजसत्तम ॥ सम्यग्वृत्तानि वर्त्तंते विपरीताः क्षयोदयाः ॥ वेदेषु चापि यद्वाक्यं लौकिकं व्यापकं च यत् ॥
एतद्विद्वन्यथातत्त्वं सर्वं व्याख्यातुमर्हसि ॥ ॥ गुरुरुवाच ॥ ॥ शृणु शिष्य महाप्राज्ञ ब्रह्मगुह्यमिदं परं ॥ अध्यात्मं सर्व
विद्यानामागमानां च यद्वसु ॥ वासुदेवः सर्वमिदं विश्वस्य ब्रह्मणो मुखं ॥ सत्यं दानमथो यज्ञस्तितिक्षा दम आर्जवं ॥ पु
रुषं सनातनं विष्णुं यत्तद्वेदविदो विदुः ॥ सर्गप्रलयकर्त्तारमव्यक्तं ब्रह्म शाश्वतं ॥ तदिदं ब्रह्म वार्ष्णेयमितिहासं शृणु
ष्व मे ॥ ब्राह्मणो ब्राह्मणैः श्राव्यो राजन्यैः क्षत्रियैस्तथा ॥ वैश्यो वैश्यैस्तथा श्राव्यः शूद्रः शूद्रैर्महात्मनाः ॥ माहात्म्यं दे
वस्य विष्णोरमिततेजसः ॥ अर्हस्त्वमसि कल्याण वार्ष्णेयं शृणु यत्परं ॥ कालचक्रमनाद्यंतं भावाभावस्वलक्षणं ॥ त्रै
लोक्यं सर्वभूतेश चक्रवत्परिवर्त्तते ॥ यत्तदक्षरमव्यक्तममृतं ब्रह्म शाश्वतं ॥ वदंति पुरुषव्याघ्र केशवं पुरुषर्षभं ॥ पि
तॄन्देवानृषींश्चैव तथा वै यक्षराक्षसान् ॥ नागासुरमनुष्यांश्च सृजते परमोऽव्ययः ॥ तथैव वेदशास्त्राणि लोकधर्मांश्च
शाश्वतान् ॥ प्रलये प्रकृतिं प्राप्य युगादौ सृजते पुनः ॥ यथार्त्तावृतुलिंगानि नानारूपाणि पर्यये ॥ दृश्यंते तानि रूपाणि तथा
भावा युगादिषु ॥ अथ यद्यद्यदा भाति कालयोगाद्युगादिषु ॥ तत्तदुत्पद्यते ज्ञानं लोकयात्राविधानजं ॥ युगांतेंतर्हितान्वेदा
न्सेतिहासान्महर्षयः ॥ लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा ॥ वेदविद्वेद भगवान्वेदांगानि बृहस्पतिः ॥ भार्गवो

५१

नीतिशास्त्रं तु जगाद जगतो हितं ॥ गांधर्वं नारदो वेदं भरद्वाजो धनुर्ग्रहं ॥ देवर्षिचरितं गार्ग्यः कृष्णात्रेयश्चिकित्सितं ॥ न्या
यतंत्राण्यनेकानि तैस्तैरुक्तानि वादिभिः ॥ हेत्वागमसदाचारैर्यदुक्तं तदुपास्यते ॥ अनाद्यंतं परं ब्रह्म न देवा नर्षयो वि
दुः ॥ एकस्तद्वेद भगवान्धाता नारायणः प्रभुः ॥ नारायणादृषिगणास्तथा मुख्याः सुरासुराः ॥ राजर्षयः पुराणाश्च पर
मं दुःखभेषजं ॥ पुरुषाधिष्ठितान्भावान्प्रकृतिः सूयते सदा ॥ हेतुयुक्तमतः पूर्वं जगत्संपरिवर्त्तते ॥ दीपादन्ये यथा दी
पाः प्रवर्त्तंते सहस्रशः ॥ प्रकृतिः सृजते तद्वदानंत्यान्नापचीयते ॥ अव्यक्तकर्मजा बुद्धिरहंकारं प्रसूयते ॥ आकाशं चा
हंकाराद्वायुराकाशसंभवः ॥ वायोस्तेजस्ततश्चापः अद्भ्यो हि वसुधोद्गता ॥ मूलप्रकृतयोऽष्टौ ता जगदेतास्ववस्थितं ॥
ज्ञानेंद्रियाण्यतः पंच पंच कर्मेंद्रियाण्यपि ॥ विषयाः पंच चैकं च विकारे षोडशं मनः ॥ श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं ज्ञा
नेंद्रियाण्यथ ॥ पादौ पायुरुपस्थश्च हस्तौ वाक्कर्मणामपि ॥ शब्दः स्पर्शोऽथ रूपं च रसो गंधस्तथैव च ॥ विज्ञेयं व्याप
कं चित्तं तेषु सर्वगतं मनः ॥ रसज्ञाने तु जिह्वेयं व्याहृते वाक्तथोच्यते ॥ इंद्रियैर्विविधैर्युक्तं सर्वं व्यक्तं मनस्तथा ॥ विद्या
त्तु षोडशैतानि दैवतानि विभागशः ॥ देहेषु ज्ञानकर्त्तारमुपासीनमुपासते ॥ तद्वत्सोमगुणा जिह्वा गंधस्तु पृथिवीगु
णः ॥ श्रोत्रं नभोगुणं चैव चक्षुरग्निगुणं तथा ॥ स्पर्शं वायुगुणं विद्यात्सर्वभूतेषु सर्वदा ॥ मनः सत्त्वगुणं प्राहुः सत्त्वम
व्यक्तजं तथा ॥ सर्वभूतात्मभूतस्थं तस्माद्बुध्यति बुद्धिमान् ॥ एते भावा जगत्सर्वं वहंति सचराचरं ॥ श्रिया विरजसं देवं

यमाहुः प्रकृतेः परं ॥ नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितं ॥ व्याप्यशेते महानात्मा तस्मात्पुरुष उच्यते ॥ अजरः सोमर
श्चैव व्यक्ताव्यक्तोपदेशवान् ॥ व्यापकः सगुणी सूक्ष्मः सर्वभूतगुणाश्रयः ॥ यथादीपः प्रकाशात्मा ह्रस्वो वा यदि वा म
हान् ॥ ज्ञानात्मानं तथा विद्यात्पुरुषं सर्वजंतुषु ॥ सोत्र वेदयते वेद्यं स शृणोति स पश्यति ॥ कारणं तस्य देहोयं स कर्त्ता स
र्वकर्मणां ॥ अग्निर्दारुगतो यद्वद्भिन्ने दारौ न दृश्यते ॥ तथैवात्मा शरीरस्थो भिन्ने देहे न दृश्यते ॥ अग्निर्यथा ह्युपाये
न मथित्वा दारु दृश्यते ॥ तथैवात्मा शरीरस्थो योगेनैवात्र दृश्यते ॥ नदीष्वापो यथा युक्ता यथा सूर्ये मरीचयः ॥ संततत्वा
द्यथा यांति तथा देहाः शरीरिणां ॥ स्वप्नयोगे यथैवात्मा पंचेंद्रियसमन्वितः ॥ देहमुत्सृज्य वै याति तथैवात्रोपलभ्यते ॥ कर्मणा
चोद्यते पूर्वकर्मणा चोपलभ्यते ॥ कर्मणा नीयतेन्यत्र सुकृतेन बलीयसा ॥ सतु देहाद्यथा देहं त्यक्त्वान्यं प्रतिपद्यते ॥
तथान्यं संप्रवक्ष्यामि भूतग्रामं स्वकर्मजं ॥ ॥शांतौ मोक्षधर्मे ॥ ॥भीष्म उवाच ॥ ॥चतुर्विधानि भूतानि चराणि
स्थावराणि च ॥ अव्यक्तप्रभवान्याहुरव्यक्तनिधनानि च ॥ अव्यक्तलक्षणं विद्यादव्यक्तात्मात्मकं मनः ॥ यथाश्वत्थक
णीकायामंतर्भूतो महाद्रुमः ॥ निष्पन्नो दृश्यते व्यक्तमव्यक्तात्संभवस्तथा ॥ अभिद्रवत्ययस्कांतमयो निश्चेतनं यथा ॥ स्व
भावहेतुजा भावा यद्वदन्यदपीदृशं ॥ यद्वदव्यक्तजा भावाः कर्त्तुः कारणलक्षणा ॥ अचेतनाश्चेतयितुः कारणादभिसंहता
ः ॥ न भूर्न खं द्यौर्भूतानि नर्षयो न सुरासुराः ॥ नान्यदासीदते जीवमासेदुर्न च संहितं ॥ सर्वं नित्यं सर्वगतं ॥ मनोहे

तुसलक्षणं ॥ अज्ञानकर्मनिर्दिष्टमेतत्कारणलक्षणं ॥ तत्कारणैर्हि संयुक्तं कार्यसंग्रहकारकं ॥ येनैतद्वर्तते चक्र
मनादिनिधनं महत् ॥ अव्यक्तनाभं व्यक्तारं विकारपुरिमंडलं ॥ क्षेत्रज्ञाधिष्ठितं चक्रं स्निग्धाक्षं वर्त्तते ध्रुवं ॥ स्नि
ग्धत्वात्तिलवत्सर्वं चक्रेस्मिन्पीड्यते जगत् ॥ तिलपीडैरिवाक्रम्य भोगैरज्ञानसंभवैः ॥ कर्म तत्कुरुते तर्षादहंकारपरि
ग्रहं ॥ कार्यकारणसंयोगे स हेतुरुपपादितः ॥ नात्येति कारणं कार्यं न कार्यं कारणं तथा ॥ कार्यणां रूपकरणे कालो
भवति हेतुमान् ॥ हेतुयुक्ताः प्रकृतयो विकाराश्च परस्परं ॥ अन्योन्यमभिवर्तंति पुरुषाधिष्ठिताः सदा ॥ सत्वरजस्तामसै
र्भावैश्च्युतो हेतुबलान्वितः ॥ क्षेत्रज्ञमेवानुपाति पांशुर्वातेरितो यथा ॥ न च तैः स्पृश्यते भावैर्न ते तेन महात्मना ॥ सर
जस्कोरजस्कश्च सेव वायुर्यथा सवेद् ॥ तथैवदंतरं विद्यात्क्षेत्रक्षेत्रज्ञयोर्बुधः ॥ अभ्यासात्स तथा युक्तो न गच्छेत्प्र
कृतिं पुनः ॥ संदेहमेतमुत्पन्नमच्छिनद्भगवानृषिः ॥ तथा वार्त्तां समीक्षेत कृतलक्षणसंविदं ॥ बीजान्यग्न्युपदग्धा
नि न रोहंति यथा पुनः ॥ ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनः ॥ ॥शांतौ मोक्षधर्मे ॥ ॥भीष्म उवाच ॥ ॥प्रवृ
त्तिलक्षणो धर्मो यथायमुपलभ्यते ॥ तेषां विज्ञानदिष्टानामन्यत्तत्वं न रोचते ॥ दुर्लभा वेदविद्वांसो वेदोक्तेषु व्यव
स्थिताः ॥ प्रयोजनमहत्वात्तु मार्गमिच्छंति संस्तुतं ॥ सद्भिराचरितत्वात्तु वृत्तमेतद्गर्हितं ॥ इयं सा बुद्धिरन्येयं यथा
याति परां गतिं ॥ शरीरवानुपादत्ते मोहात्सर्वान्परिग्रहात् ॥ क्रोधलोभादिभिर्भावैर्युक्तो राजसतामसैः ॥ नाशुद्धमा

चनेत्तस्मादभीक्ष्णं देहयापनं कर्मणो विवरं कुर्वन्न लोकाननुयांतु भाव्र॥ लोहयुक्तं यथा हेम विपक्कं न विराजते॥
तथापक्वकषायाख्यं विज्ञानं न प्रकाशते॥ यश्चाधर्मं चरेल्लोभात्कामक्रोधावनुप्लवन्॥ धर्म्यं पंथानमाक्रम्य सानुबं
धो विनश्यति॥ शब्दादीन्विषयांस्तस्मान्न संरागादयं व्रजेत्॥ क्रोधो हर्षो विषादश्च जायते हपरस्पनात्॥ पंचभूता
त्मके देहे सत्वराजसतामसे॥ कर्मभिस्तुवते चायं किं चाक्रोशं किं वदन्॥ स्पर्शरूपरसाद्येषु संगं गछंति बालिशाः॥
नावगछंति विज्ञानादात्मानं पार्थिवं गुणं॥ मृन्मयं शरणं यद्वन्मृदैव परिलिप्यते॥ पार्थिवोयं तथा देहो मृद्वि
काराान्न नश्यति॥ मधु तैलं पयः सर्पिर्मांसानि लवणं गुडः॥ धान्यानि फलमूलानि मृद्विकाराः सहांभ
सा॥ यद्वत्कांतारमातिष्ठन्नौत्सुक्यं समनुव्रजेत्॥ ग्राम्यमाहारमादद्यादस्वाद्वपि यापनं॥ तद्वत्संसारकांतार
मातिष्ठन्श्रमतत्परः॥ यात्रार्थमद्यादाहारं व्याधितो भेषजं यथा॥ सत्यशौचार्जवत्यागैर्वर्चसा विक्रमेण च॥ क्षां
त्या धृत्या च बुध्या च मनसा तपसैव च॥ सर्वान्भावाननुवृत्तान्समीक्ष्य विषयात्मकान्॥ शांतिमिच्छन्नदीनात्मा सं
यच्छेदिंद्रियाणि च॥ सत्वेन रजसा चैव तमसा चैव मोहिताः॥ चक्रवत्परिवर्तंते ह्यज्ञानाज्जंतवो यथा॥ तस्मात्सम्य
क्परीक्षेत दोषानज्ञानसंभवान्॥ अज्ञानप्रभवं दुःखमहंकारं परित्यजेत्॥ महाभूतानींद्रियाणि गुणाः सत्वं रज
स्तमः॥ त्रैलोक्यं सेश्वरं कर्म अहंकारे प्रतिष्ठितं॥ यथेह नियतः कालो दर्शयत्यार्तवान्गुणान्॥ तद्वद्भूतेष्वहंका

रं विद्यात्कर्मप्रवर्तकं॥ संमोहकं तदा विद्यात्कृष्णमज्ञानसंभवं॥ प्रीतिदुःखनिबंधांश्च समस्तांस्त्रीनथो गुणान्॥ स
त्वस्य रजसश्चैव तमसश्च निबोध तान्॥ प्रसादो हर्षजा प्रीतिरसंदेहो धृतिः स्मृतिः॥ एतान्सत्वगुणान्विद्यादिमा
न्राजसतामसान्॥ कामक्रोधौ प्रमादश्च लोभमोहौ भयं क्लमः॥ विषादशोकावरतिर्मानदर्पावनार्यता॥ दोषाणामे
वमादीनां परीक्ष्य गुरुलाघवं॥ विमृशेदात्मसंस्थानामेकैकमनुसंततं॥ ॥शिष्य उवाच॥ ॥के दोषा मनसा त्यक्ताः
के बुध्या शिथिलीकृताः॥ किं पुनः पुनरायांति के मोहादफला इव॥ केषां बलाबलं बुध्या हेतुभिर्विमृशेद्बुधः॥ एष
मे संशयस्तात तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥दोषैर्मूलादवच्छिन्नैर्विशुद्धात्मा विमुच्यते॥ विनाशा
यति संभूतमयस्मयमयो यथा॥ तथाऽकृतात्मा सहजैर्दोषैर्नश्यति राजसैः॥ राजसं तामसं चैव शुद्धात्मा काल
संभवं गतत्सर्वं देहिनां बीजं सत्वमात्मवतां समं॥ तस्मादात्मवता वर्ज्यं रजश्च तम एव च॥ रजस्तमोभ्यां निर्मुक्तं स
त्वं निर्मलतामियात्॥ अथवा मंत्रवद्ब्रूयुर्मांसादानेयजुष्कृतं॥ स वै हेतुरनादाने शुद्धधर्मानुपालने॥ रजसा धर्मयु
क्तानि कार्याण्यपि समासते॥ अर्थयुक्तानि चात्यर्थं कामान्सर्वांश्च सेवते॥ तमसा लोभयुक्तानि क्रोधजानि च से
वते॥ हिंसाविहारानिरतस्तंद्रीनिद्रासमन्वितः॥ सत्वस्थः सात्विकान्भावाञ्छुद्धान्पश्यति संश्रितः॥ स देही विम
लः श्रीमाञ्श्रद्धाविद्यासमन्वितः॥ ॥शांतौ म सप्तमी॥ ॥भीष्म उवाच॥ ॥रजसा साध्यते मोहस्तमसश्चैव न

तर्षभ॥ क्रोधलोभौ भयं दर्पमेतेषां शमनाच्छुचिः॥ परमं परमात्मानं देवमक्षयमव्ययं॥ विष्णुमव्यक्तसंस्थानं विशंतं
देवसत्तमं॥ तस्य मायापिनद्धांगा ज्ञानभ्रष्टा विचेतसः॥ मानवा ज्ञानसंमोहात्ततः क्रोधं प्रयांति वै॥ क्रोधात्कामम
वाप्याथ लोभमोहौ च मानवाः॥ मानदर्पादहंकारमहंकारात्ततः क्रियाः॥ क्रियाभिः स्नेहसंबंधात्स्नेहाच्छोकमनं
तरं॥ सुखदुःखक्रियारंभाज्जन्माजन्मकृतक्षणाः॥ जन्मतो गर्भवासं तु शुक्रशोणितसंभवं॥ पुरीषमूत्रविक्ले
दशोणितप्रभवाविलं॥ तृष्णाभिभूतस्तैर्बद्धस्तान्येवाभिपरिप्लवन्॥ संसारतंत्रवाहिन्यस्तत्र बुध्येत योषितः॥
प्रकृत्या क्षेत्रभूतास्ता नराः क्षेत्रज्ञलक्षणाः॥ तस्मादेता विशेषेण नचानीयुर्विपश्चितः॥ कृत्या ह्येता घोररूपा मोह
यंत्यविलक्षणं॥ रजस्यंतर्हिता मूर्तिरिंद्रियाणां सनातनी॥ तस्मात्तर्षात्मकाद्रागाद्बीजाज्जायंति जंतवः॥ स्व
देहजानस्वसंज्ञान्यद्वदंगात्कृमीस्त्यजेत्॥ स्वसंज्ञानस्वजांस्तद्वत्सुतसंज्ञान्कृमींस्त्यजेत्॥ शुक्रतो रसतः स्वे
दाद्देहाज्जायंति जंतवः॥ स्वभावात्कर्मयोगाद्वा तानुपेक्षेत बुद्धिमान्॥ रजस्तमसि पर्यस्तं सत्वं च तमसि स्थितं॥
ज्ञानाधिष्ठितमव्यक्तं बुध्यहंकारलक्षणं॥ तद्बीजं देहिनामाहुस्तद्बीजं जीवसंज्ञितं॥ कर्मणा कालयुक्तेन संसारपरि
वर्तिनं॥ रमत्ययं यथा स्वप्ने मनसा देहवानिव॥ कर्मगर्भैर्गुणैर्देही गर्भे तदुपलभ्यते॥ कर्मणा बीजभूतेन चो
द्यते यद्यदिंद्रियं॥ जायते तदहंकाराद्रागयुक्तेन चेतसा॥ शब्दरागाच्छ्रोत्रमस्य जायते भावितात्मनः॥ रूपरागा

त्तथा चक्षुर्घ्राणं गंधचिकीर्षया॥ स्पर्शनेत्वक्तथा वायुः प्राणापानव्यपाश्रयः॥ व्यानोदानौ समानश्च पंचधा देहयाप
नं॥ संजातैर्जायते गात्रैः कर्मजैर्ब्रह्मणा वृतः॥ दुःखाद्यंतैर्दुःखमध्यैर्नरः शारीरमानसैः॥ दुःखं विद्यादुपादानाद
भिमानाच्च वर्द्धते॥ त्यागात्तेभ्यो निरोधः स्यान्निरोधज्ञो विमुच्यते॥ इंद्रियाणां रजस्येव प्रलयप्रभवावुभौ॥ परीक्ष्य
संचरेद्विद्वान्यथावच्छास्त्रचक्षुषा॥ ज्ञानेंद्रियाणींद्रियार्थान्नोपसर्पत्यतर्षुलं॥ हीनैश्च करणैर्देही न देहं पुनरर्ह
ति॥ ॥शांतौ मोक्षधर्मे॥ ॥ भीष्म उवाच॥ ॥ अत्रोपायं प्रवक्ष्यामि यथावच्छास्त्रचक्षुषा॥ तद्विज्ञानाच्चरन्राजन्न
प्राप्नुयात्परमां गतिं॥ सर्वेषामेव भूतानां पुरुषः श्रेष्ठ उच्यते॥ पुरुषेभ्यो द्विजानाहुर्द्विजेभ्यो मंत्रदर्शिनः॥ सर्वभूतात्म
भूतास्ते सर्वज्ञाः सर्वदर्शिनः॥ ब्राह्मणा वेदशास्त्रज्ञास्तत्वार्थगतनिश्चयाः॥ नेत्रहीनो यथा ह्येकः कृच्छ्राणि लभतेध्वनि॥
ज्ञानहीनस्तथा लोके तस्माज्ज्ञानविदोधिकाः॥ तांस्तानुपासते धर्मान्धर्मकामोर्थागमं॥ न त्वेषामर्थसामान्यमंतरे पापगुणा य
भिमान्॥ वाग्देहमनसां शौचं क्षमा सत्यं धृतिः स्मृतिः॥ सर्वधर्मेषु धर्मज्ञाज्ञापयंति गुणान्शुभान्॥ यदिदं ब्रह्मणो रूपं
ब्रह्मचर्यमिति स्मृतं॥ परं तत्सर्वधर्मेभ्यस्तेन यांति परां गतिं॥ लिंगासंयोगहीनं यच्छब्दस्पर्शविवर्जितं॥ श्रोत्रेण श्र
वणं चैतत् चक्षुषा चैव दर्शनं॥ वाक्संभाषप्रवृत्तं यत्तन्मनःपरिवर्जितं॥ बुध्या चाध्यवसायेन ब्रह्मचर्यमकल्मषं॥ स
म्यग्वृत्तिर्ब्रह्मलोकं प्राप्नुयान्मध्यमः सुरान्॥ द्विजाग्र्यो जायते विद्वान्कन्यसीं वृत्तिमास्थितः॥ सुदुष्करं ब्रह्मचर्यमुपाय

मत्तमे शृणु॥ संप्रदीप्तमुदीर्णं च निरुद्धं ह्नीयाद्द्विजो रजः॥ योषितो न कथा श्राव्या न निरीक्ष्या निरंबरा॥ कथंचिद्दर्शनादासां दुर्बला
नाविशेद्रजः॥ रागोत्पन्नश्चरेत्कृच्छ्रं महः स्त्रिः प्रविशेद्दपः॥ मग्नः स्वप्ने च मनसा त्रिर्जपेदघमर्षणं॥ पाप्मानं निर्दहेदेव
मंतर्भूतं रजोमयं॥ ज्ञानयुक्तेन मनसा संततेन विचक्षणः॥ कुणपामेध्यसंयुक्तं यद्वदच्छिद्रबंधनं॥ तद्वद्देहगतं वि
द्यादात्मानं देहबंधनं॥ वातपित्तकफान्रक्तं त्वङ्मांसं स्नायुमस्थि च॥ मज्जां देहं शिराजालैस्तर्पयंति रसा नृणां॥ दश वि
द्याद्धमन्योऽत्र पंचेंद्रियगुणावहाः॥ याभिः सूक्ष्माः प्रतीयंते धमन्योऽन्याः सहस्रशः॥ एवमेता शिरानद्यो रसोदा देहसागरं॥
तर्पयंति यथाकालमापगा इव सागरं॥ मध्ये च हृदयस्यैका शिरा तत्र मनोवहा॥ शुक्रं संकल्पजं नॄणां सर्वगात्रैर्विमुंच
ति॥ सर्वगात्रप्रतायिन्यस्तस्या ह्यनुगताः शिराः॥ नेत्रयोः प्रतिपद्यंते वहंत्यस्तैजसं गुणं॥ पयस्यंतर्हितं सर्पिर्यद्वन्निर्म
थ्यते खजैः॥ शुक्रं निर्मथ्यते तद्वद्देहसंकल्पजैः खजैः॥ स्वप्नेऽप्येवं यथाभ्येति मनःसंकल्पजं रजः॥ शुक्रं संकल्प
जं देहात्सृजत्यस्य मनोवहा॥ महर्षिर्भगवानत्रिर्वेद तच्छुक्रसंभवं॥ त्रिबीजमिंद्रदैवत्यं तस्मादिंद्रियमुच्यते॥ ये वै
शुक्रगतिं विद्युर्भूतसंकरकारिकां॥ विरागा दग्धदोषास्ते नाप्नुयुर्देहसंभवं॥ गुणानां साम्यमागम्य मनस्येव मनो
वहं॥ देहकर्मा नुदन्प्राणानंतकाले विमुच्यते॥ भविता मनसो ज्ञानं मन एव प्रलीयते॥ ज्योतिष्मद्विरजो दिव्यं मंत्र
सिद्धं महात्मनां॥ तस्मात्तदभिघाताय कर्म कुर्यादकल्मषं॥ रजस्तमश्च हित्वेह न तिर्यग्गतिमाप्नुयात्॥ त

हा

रुणाधिगतं ज्ञानं जरादुर्बलतां गतं॥ विपक्वबुद्धिः कालेनादत्ते मानसं बलं॥ सुदुर्गमिव पंथानमतीत्य गुणबंधनं॥ य
था पश्येत्तथा दोषानतीत्यामृतमश्नुते॥ ॥ इति मोक्षधर्मे॥ ॥ भीष्म उवाच॥ ॥ दुरंतेष्विंद्रियार्थेषु प्रसक्ताः सी
दंति जंतवः॥ ये त्वसक्ता महात्मानस्ते यांति परमां गतिं॥ जन्ममृत्युजरादुःखैर्व्याधिमानसिकक्लमैः॥ दृष्ट्वेमं संततं
लोकं घटेन्मोक्षाय बुद्धिमान्॥ वाङ्मनोभ्यां शरीरेण शुचिः स्यादनहंकृतः॥ प्रशांतो ज्ञानवान्भिक्षुर्निरपेक्षश्चरेत्सुखं
॥ अथवा मनसः संगं पश्येद्भूतानुकंपया॥ तत्रापेक्षी कुर्वीत ज्ञात्वा कर्मफलं जगत्॥ यत्कृतं स्याच्छुभं कर्म पापं वा यदि
वाश्नुते॥ तस्माच्छुभानि कर्माणि कुर्याद्बुद्धिकर्मभिः॥ अहिंसा सत्यवचनं सर्वभूतेषु चार्जवं॥ क्षमा चैवाप्रमादश्च य
स्यैते स सुखी भवेत्॥ तस्मात्समाहितं बुद्ध्या मनो बुध्येषु धारयेत्॥ यश्चैनं परमं धर्मं सर्वभूतसुखावहं॥ दुःखनि
सरणं वेद स सर्वज्ञः सुखी भवेत्॥ तस्मात्समाहितं बुद्ध्या मनो भूतेषु धारयेत्॥ नापध्यायेन्न स्पृहयेन्न बुध्या चिं
तयेदसत्॥ वाचामोघप्रयोगेण मनोज्ञं तत्प्रवर्त्तते॥ विवक्षता च यद्वाक्यं धर्मं सूक्ष्ममवेक्षता॥ सत्यां वाचमहिं
स्रां च वदेदनपवादिनीं॥ कल्कापेतामपरुषामनृशंसामपैशुनां॥ ईदृगल्पं च वक्तव्यमविक्षिप्तेन चेतसा॥
वाक्प्रबद्धो हि संसारो विरागाद्व्याहरेद्यदि॥ बुद्ध्या ह्यनुगृहीतेन मनसा कर्म मानसं॥ रजोभूतैर्हि करणैः कर्मणा
प्रतिपद्यते॥ स दुःखं प्राप्य लोकेऽस्मिन्नरकायोपपद्यते॥ तस्मान्मनोवाक्शरीरैराचरेद्धैर्यमात्मनः॥ प्रकीर्णमेषभा
रं हि यद्वद्धार्येत दस्युभिः॥ प्रतिलोमां दिशं बध्वा संसारमबुधास्तथा॥ तानेव च यथा दस्यून्क्षिप्त्वा गच्छेच्छिवां दि

शं॥ तथा रजस्तमःकर्माण्युत्सृज्य प्राप्नुयाच्छुभं॥ निःसंदिग्धमनीहो वै मुक्तः सर्वपरिग्रहैः॥ विविक्तचारी लघ्वाशी
तपस्वी नियतेंद्रियः॥ ज्ञानदग्धपरिक्लेशः प्रयोगरतिरात्मवान्॥ निश्चारेण मनसा परं तदधिगच्छति॥ धृ
तिमानात्मवान्बुद्धिं निगृह्णीयादसंशयं॥ मनो बुध्या निगृह्णीयाद्विषयान्मनसात्मनः॥ निगृहीतेंद्रियस्यास्य
कुर्वाणस्य मनो वशे॥ देवतास्ताः प्रसीदंति हृष्टा यांति तमीश्वरं॥ ताभिः संसक्तमनसो ब्रह्मवत्संप्रकाशते॥ देशेश्वा
पगतैस्सर्वैर्ब्रह्मभूयाय कल्पते॥ अथवा न प्रकाशेत योगतंत्रैरुपाक्रमेत्॥ योगतंत्रमयं तंत्रं प्रवृत्तिः स्यात्तदाचरेत्॥ कण
कुल्माषपिण्याकशाकयावकसक्तवः॥ तथा मूलफलं भैक्ष्यं पर्यायेणोपयोजयेत्॥ आहारं नियमं चैव देशकाले च सात्विकं॥
तत्परीक्ष्यानुवर्तेत तत्तत्प्रवृत्त्यनुवर्तकं॥ प्रवृत्तं नोपरुंधीत शनैरग्निमिवेंधयेत्॥ ज्ञानान्वितं तथा ज्ञानमर्कवत्संप्रकाशते॥
ज्ञानाधिष्ठानमज्ञानं त्रीन्लोकानधितिष्ठति॥ विज्ञानानुगतं ज्ञानमज्ञानेनापकृष्यते॥ पृथक्त्वात्संप्रयोगाच्च नासूयुर्वेद
शाश्वतं॥ स तयोरपवर्गज्ञो वीतरागो विमुच्यते॥ वयोतीतो जरामृत्यू जित्वा ब्रह्म सनातनं॥ अमृतं तदवाप्नोति यत्तदक्षरम
व्ययं॥ ॥शांतौ मोक्षधर्मे॥ ॥भीष्म उवाच॥ ॥निःकल्मषं ब्रह्मचर्यमिच्छता चरितुं सदा॥ निद्रा सर्वात्मना त्याज्या स्वप्नदो
षमवेक्ष्यता॥ स्वप्ने हि रजसा देही तमसा चाभिभूयते॥ देहांतरमिवापन्नश्चरत्यपगतस्पृहः॥ ज्ञानाभ्यासाज्जागरि
तो जिज्ञासार्थमनंतरं॥ विज्ञानाभिनिवेशात्तु जागरत्यनिशं सदा॥ अत्राह कोन्वयं भावः स्वप्ने विषयवानिव॥ प्रलीनै
रिंद्रियैर्देही वर्तते देहवानिव॥ अत्रोच्यते यथा तद्वेद योगेश्वरो हरिः॥ तथैतदुपपन्नार्थं वर्णयंति महर्षयः॥ इंद्रिया

णां श्रमात्स्वप्नमाहुः सर्वगतं बुधाः॥ मनसस्तु प्रलीनत्वात्तत्तदाहुर्निदर्शनं॥ कार्यव्यासक्तमनसः संकल्पो जाग्रतो ह्यपि॥ त
द्वन्मनोरथैश्वर्यं स्वप्ने तद्वन्मनोगतं॥ संस्काराणामसंख्यानां कामात्तदवाप्नुयात्॥ मनस्यंतर्हितं सर्वं वेद सोत्तमपूरुषः॥
गुणानामपि यद्येतत्कर्म जानात्युपस्थितं॥ तत्तच्छंसंति भूतानि मनो यद्भावितं तथा॥ ततस्तमुपवर्तंते गुणा राजसतामसाः॥
सात्विको वा यथायोगमानंतर्यफलोदयः॥ ततः पश्यत्यसंबंधान्वातपित्तकफोत्तरान्॥ रजस्तमोगतैर्भावैस्तदप्याहुर्दुरन्वयं॥ प्रस
न्नैरिंद्रियैर्यद्यत्संकल्पयति मानसं॥ तत्तत्स्वप्नेप्युपरते मनोदृष्टिर्निरीक्षते॥ व्यापकं सर्वभूतेषु वर्तते प्रतिघं मनः॥ आ
त्मप्रभावात्तं विंद्यात्सर्वा ह्यात्मनि देवताः॥ मनस्यंतर्हितं द्वारं देहमास्थाय मानुषं॥ यद्यत्सदसदव्यक्तं स्वपित्यस्मिन्निदर्शनं॥
सर्वभूतात्मभूतस्थं तमध्यात्मगुणं विदुः॥ लिप्सेत मनसा यश्च संकल्पादैश्वरं गुणं॥ आत्मप्रसादात्तं विंद्यात्सर्वा ह्यात्मनि देवताः॥
एवं हि तपसा युक्तमर्कवत्तमसः परं॥ त्रैलोक्यप्रकृतिं देही तमसोंते महेश्वरं॥ तपो ह्यधिष्ठितं देवैस्तपोघ्नमसुरैस्ततः॥ एत
द्देवासुरैर्गुप्तं तदाहुर्ज्ञानलक्षणं॥ सत्वं रजस्तमश्चेति देवासुरगुणान्विदुः॥ सत्वं देवगुणं विद्यादितरावासुरौ गुणौ॥ ब्रह्म तत्प
रमं ज्ञानममृतं ज्योतिरक्षरं॥ ये विदुर्भावितात्मानस्ते यांति परमां गतिं॥ हेतुमच्छक्यमाख्यातुमेतावज्ज्ञानचक्षुषा॥ प्रत्याहारेण वा
शक्यमक्षरं ब्रह्म वेदितुं॥ ॥शांतौ मोक्षधर्मे॥ ॥भीष्म उवाच॥ ॥न स वेद परं ब्रह्म यो न वेद चतुष्टयं॥ व्यक्ताव्यक्ते च यत्तत्त्वं संप्रोक्तं
परमर्षिणा॥ व्यक्तं मृत्युपदं विद्यादव्यक्तममृतं पदं॥ प्रवृत्तिलक्षणं धर्ममृषिर्नारायणोऽब्रवीत्॥ तत्रैवावस्थितं सर्वं त्रैलोक्यं सचराच
रं॥ निवृत्तिलक्षणं धर्ममव्यक्तं ब्रह्म शाश्वतं॥ प्रवृत्तिलक्षणं धर्मं प्रजापतिरथाब्रवीत्॥ प्रवृत्तिः पुनरावृत्तिर्निवृत्तिः परमा गतिः॥

तां गतिं परमामेति निवृत्तिपरमो मुनिः ॥ ज्ञानतत्त्वपरो नित्यं शुभाशुभनिदर्शकः ॥ तदेतमेतौ विज्ञेयाव व्यक्तपुरुषावुभौ ॥ अव्य-
क्तपुरुषाभ्यां तु यत्स्याद्न्यन्महत्तरं ॥ तं विशेषमवेक्षेत विशेषेण विचक्षणः ॥ अनाद्यंतावुभावेतावलिंगौ चाप्युभावपि ॥ उभा नि-
त्याव विचलौ महद्भ्यश्च महत्तरौ ॥ सामान्यमेतदुभयोरेवं ह्यन्यद्धि लक्षणं ॥ प्रकृत्या सर्गधर्मिण्या तथा त्रिगुणसत्तया ॥३॥ विप-
रीतमतो विद्यात्क्षेत्रज्ञस्य स्वलक्षणं ॥ प्रकृतेश्च विकाराणां द्रष्टारमगुणान्वितं ॥ अग्राह्यौ पुरुषावेतावलिंगत्वादसंहितौ ॥
संयोगलक्षणोत्पत्तिः कर्मजा गृह्यते यथा ॥ करणैः कर्मनिर्वृत्तैः कर्त्ता यद्यद्विचेष्टते ॥ कीर्त्यते शब्दसंज्ञाभिः कोहमेषोप्यसा-
विति ॥ उष्णीषवान्यथा वस्त्रैस्त्रिभिर्भवति संवृतः ॥ संवृतोयं तथा देही सत्त्वराजसतामसैः ॥ तस्माच्चतुष्टयं वेद्यमेतैर्हेतुभि-
रावृतं ॥ यथा संज्ञो ह्ययं सम्यगंतकाले न मुह्यति ॥ श्रियं दिव्यामभिप्रेप्सुर्वर्ष्म वाङ्मनसा शुचिः ॥ शारीरैर्नियमैरुग्रैश्चरे-
न्निष्कल्मषं ततः ॥ त्रैलोक्यं तपसा व्याप्तं संमतर्भूतेन भास्वता ॥ सूर्यश्च चंद्रमाश्चैव भासतस्तपसा दिवि ॥ प्रतापस्तपसो ज्ञा-
नं लोके संशब्दितं तपः ॥ रजस्तमोघ्नं यत्कर्म तपसस्तत्स्वलक्षणं ॥ ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ वाङ्मनोनि-
यमः सम्यक् मानसं तप उच्यते ॥ विधिज्ञेभ्यो द्विजातिभ्यो ग्राह्यमन्नं विशिष्यते ॥ आहारनियमेनास्य पाप्मा शाम्यति राज-
सः ॥ वैमनस्यं च विषये यांत्यस्य करणानि च ॥ तस्मात्तन्मात्रमादद्याद्यावदत्र प्रयोजनं ॥ अंतकाले बलोत्कर्षाच्छनैः कुर्याद-
नातुरः ॥ एवं युक्तेन मनसा ज्ञानं तदुपपद्यते ॥ रजोवर्ज्योप्ययं देही देहवच्छब्दवांश्चरेत् ॥ कार्यैरव्याहतमतिर्वैराग्यात्प्रकृ-
तिस्थितः ॥ आदेहादप्रमादाच्च देहांताद्विप्रमुच्यते ॥ हेतुयुक्तः सदोत्सर्गो भूतानां प्रलयस्तथा ॥ परप्रत्ययसर्गे तु नियतिर्ना-

भिवर्त्तते ॥ भावांतप्रभवाःप्रज्ञा आसते ये विपर्ययं ॥ धृत्या देहान्धारयंतो बुद्धिसंक्षिप्तचेतसः ॥ स्थानेभ्यो ध्वंसमानाश्च सूक्ष्मत्वा-
त्तानुपासते ॥ यथागमं च गत्वा वै बुद्ध्वा तन्नैव बुध्यते ॥ देहांतं कश्चिदन्वास्ते भावितात्मा निराश्रयं ॥ युक्त्वा तु धारणां कश्चित्सततः कश्चि-
दुपासते ॥ अभ्यस्यंति परं देवं विद्यासंशब्दिताक्षरं ॥ अंतकाले ह्युपासंते तपसा दग्धकिल्बिषाः ॥ सर्व एते महात्मानो गच्छंति
परमां गतिं ॥ सूक्ष्मं विशेषणं तेषामवेक्षेच्छास्त्रचक्षुषा ॥ देहांतं परमं विद्याद्विमुक्तमपरिग्रहं ॥ अंतरिक्षादन्यतरं धारणा-
सक्तमानसं ॥ मर्त्यलोकाद्विमुच्यंते विद्यासंसक्तचेतसः ॥ ब्रह्मभूता विरजसस्ते यांति परमां गतिं ॥ एवमेकायनं धर्ममाहुर्वेद-
विदो जनाः ॥ यथाज्ञानमुपासंतः सर्वे यांति परां गतिं ॥ कषायवर्जितं ज्ञानं येषामुत्पद्यतेचलं ॥ यांति ते पि परांल्लोकान्विमुच्यंते य-
थाबलं ॥ भगवंतमजं दिव्यं विष्णुमव्यक्तसंज्ञितं ॥ भावेन यांति शुद्धा ये ज्ञानतृप्ता निराशिषः ॥ ज्ञात्वात्मस्थं हरिं चैव न निवर्त्त-
ति येव्ययाः ॥ प्राप्य तत्परमं स्थानं मोदंतेक्षरमव्ययं ॥ एतावदेतद्विज्ञानमेतदस्ति च नास्ति च ॥ तृष्णाबद्धं जगत्सर्वं चक्रवत्परिव-
र्त्तते ॥ बिसतंतुर्यथैवायमंतस्थः सर्वतो बिसे ॥ तृष्णातंतुरनाद्यंतस्तथा देहगतः सदा ॥ सूच्या सूत्रं यथा वस्त्रे संसारयति वायकः ॥
तद्वत्संसारसूत्रं हि तृष्णासूच्या निबध्यते ॥ विकारं प्रकृतिं चैव पुरुषं च सनातनं ॥ यो यथावद्विजानाति स वितृष्णो विमुच्यते ॥
प्रकाशो भगवानेतदृषिर्नारायणोमृतं ॥ भूतानामनुकंपार्थं जगाद जगतो गतिः ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥
केन वृत्तेन वृत्तज्ञ जनको मिथिलाधिपः ॥ जगाम मोक्षं मोक्षज्ञो भोगानुत्सृज्य मानुषान् ॥ ॥ भीष्म उवाच ॥ ॥ अत्राप्युदाहरं-
तीममितिहासं पुरातनं ॥ येन वृत्तेन वृत्तज्ञो जगाम सुमहत्सुखं ॥ जनको जनदेवस्तु मिथिलायां जनाधिपः ॥ और्द्ध्वदेहिकध-

र्मीणामासीद्युक्तो विचेतने ॥ तस्य स्म शतमाचार्या वसंति सततं गृहे ॥ दर्शयंतः पृथक् धर्मान्नानापाषंडवादिनः ॥ न तेषां प्रत्य
भावे च प्रत्यजातौ विनिश्चये ॥ आगमस्थः स भूयिष्टमात्मतत्वे न तुष्यति ॥ तत्र पंचशिखो नाम कापिलेयो महामुनिः ॥ परिधाव्य
मही कृत्स्नां जगाम मिथिलामथ ॥ सर्वसंन्यासधर्माणां तत्वज्ञानविनिश्चये ॥ सुपर्यवसितार्थश्च निर्द्वंद्वो नष्टसंशयः ॥ ऋषी
णामाहुरेकं यं कामादवसितं नृषु ॥ शाश्वतं सुखमत्यंतमन्विच्छंतं सुदुर्लभं ॥ यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिं ॥ स मन्ये ते
न रूपेण विस्मापयति हि स्वयं ॥ आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनं ॥ पंचस्रोतसि यः सत्रमास्ते वर्षसहस्रिकं ॥ यत्र चासी
नमागम्य कपिलं मंडलं महत् ॥ पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत् ॥ इष्टिसत्रेण संयुक्तो भूयश्च तपसा मुनिः ॥ क्षेत्र
क्षेत्रज्ञयोर्व्यक्तिं बुबुधे देहदर्शनः ॥ यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते ॥ आसुरिर्मंडले तस्मिन् प्रतिपेदे तदव्ययं ॥ तस्य पंच
शिखः शिष्यो मानुष्या पयसा भृतः ॥ ब्राह्मणी कापिली नाम कादासीत्कुटुंबिनी ॥ तस्याः पुत्रत्वमागम्य स्त्रियाः स पिबति स्तनौ
॥ ततः स कापिलेयत्वं लेभे बुद्धिं च नैष्ठिकीं ॥ एतन्मे भगवानाह कापिलेयस्य संभवं ॥ तस्य तत्कापिलेयत्वं सर्ववित्वमनुत्तमं
॥ सामान्यं जनकं ज्ञात्वा सर्वज्ञो ज्ञानमुत्तमं ॥ उपेत्य शतमाचार्यान्मोहयामास हेतुभिः ॥ जनकस्त्वभिसंरक्तः कापिलेयानु
दर्शनात् ॥ उत्सृज्य शतमाचार्यान्पृष्ठतोनुजगाम तं ॥ तस्मै परमकल्याणं प्रणताय च धर्मतः ॥ अब्रवीत्परमं मोक्षं यत्तत्सांख्ये
विधीयते ॥ पंचस्रोतसि निष्णातः पंचरात्रविशारदः ॥ पंचज्ञः पंचकृत्यं च गुणः पंचशिखः स्मृतः ॥ जातिनिर्वेदमुक्त्वा स कर्मनिर्वे
दमब्रवीत् ॥ कर्मनिर्वेदमुक्त्वा स सर्वनिर्वेदमब्रवीत् ॥ यदर्थं कर्मसंसर्गः कर्मणां च फलोदयः ॥ तमनाश्वासितं मोहं विना

सि चलमध्रुवं ॥ दृश्यमाने विनाशे च प्रत्यक्षे लोकसाक्षिके ॥ आगमात्परमस्तीति ब्रुवन्नपि पराजितः ॥ अनात्मा ह्यात्म
नो मृत्युः क्लेशो मृत्युर्जरामयः ॥ आत्मानं मन्यते मोहात्तदसम्यक्परं मतं ॥ अथ चेदेवमप्यस्ति यल्लोके नोपपद्यते ॥ अ
रो जयममृत्युश्च राजासौ मन्यते यथा ॥ अस्ति नास्तीति चाप्येतत्तस्मिन्नसति लक्षणे ॥ किमधिष्ठाय तद्ब्रूयाल्लोकयात्रावि
निश्चयं ॥ प्रत्यक्षं ह्येतयोर्मूलं कृतांतैतिह्ययोरपि ॥ अन्यो जीवः शरीरस्य नास्तिकानां मते स्थितः ॥ रेतो वटकणीकायां घृत
पाकाधिवासनं ॥ जातिस्मृति नयस्कांतः सूर्यकांतोंबुभक्षणं ॥ प्रेत्यभूतात्ययश्चैव देवताद्युपयाचनं ॥ मृते कर्मनिवृत्तिश्च प्र
माणमिति निश्चयः ॥ नन्वेते हेतवः संति यत्किंचिन्मूर्तिसंस्थिताः ॥ अमर्त्यस्य हि मर्त्येन सामान्यं नोपलभ्यते ॥ अविद्याकर्मतृ
ष्णा च केचिदाहुः पुनर्भवे ॥ कारणं लोभमोहौ तु दोषाणां च निषेवणं ॥ अविद्यां क्षेत्रमाहुर्वै कर्मबीजं तथा कृतं ॥ तृष्णा संजननं
स्नेह एष तेषां पुनर्भवः ॥ तस्मिन्व्यूढे च दग्धे च चित्ते मरणधर्मिणि ॥ अन्योन्याज्जायते देहस्तमाहुः सत्वसंक्षयं ॥ यदा स त
पतश्चान्यो जातितः श्रुतितोर्यतः ॥ कथमस्मिन्स इत्येव संबंधः स्यादसंहितः ॥ एवं सति च काप्रीतिर्दानविद्यातपोबलैः ॥ य
दस्याचरितकर्मस्तु वै सन्यस्य वर्त्तते ॥ अपि ह्ययमिहैवान्यैः प्राकृतैर्दुःखितो भवेत् ॥ सुखितो दुःखितो वापि दृश्यादृश्यविनिर्ण
यः ॥ यथा हि मुसलैर्हन्युः शरीरं तत्पुनर्भवेत् ॥ पृथक्सानं यदन्यच्च येनैतन्नोपलभ्यते ॥ ऋतुसंवत्सरौ तिथ्यः शीतोष्णेथ प्रि
याप्रिये ॥ यथातीनि नश्यंति तादृशः सत्वसंक्षयः ॥ जरयाभिपरीतस्य मृत्युना च विनाशिना ॥ दुर्बलं दुर्बलं पूर्वं गृहस्येव वि
नश्यति ॥ इंद्रियाणि मनो वायुः शोणितं मांसमस्थि च ॥ आनुपूर्व्या विनश्यंति स्वं धातुमुपयांति च ॥ लोकयात्राविधानं च दा

मोक्षधर्म॰
५१

न धर्मफलत्यागागतः। तदर्थं वेदशब्दाश्च व्यवहाराश्च लौकिकाः॥ इति सम्यङ्मनस्येते बहवः संति हेतवः॥ एतदस्तीति नास्तीति न किंचित्
प्रतिपद्यते॥ तेषां विमृशतामेव तत्तत्समभिधावतां॥ क्वचिन्निविशते बुद्धिस्तत्र जीर्यति वृक्षवत्॥ एवमर्थैरनर्थैश्च दुःखिताः स
र्वजंतवः॥ आगमैरपकृष्यंते हस्तिनो हस्तिपैर्यथा॥ अर्थांस्तथात्यंतसुखावहांश्च लिप्संत एते बहवो विशुष्काः॥ महत्तरं दुःखम
भिप्रपन्ना हित्वामिषं मृत्युवशं प्रयांति॥ विनाशिनो ह्यध्रुवजीवितस्य किं बंधुभिर्मित्रपरिग्रहैश्च॥ विहाय यो गच्छति सर्वमे
वक्षणेन गत्वा न निवर्त्तते च॥ भूव्योमतोयानलवायवोपि सदा शरीरं प्रतिपालयंति॥ इतीदमालक्ष्य रतिः कुतो भवेद्विनाशि
नो ह्यस्य न शर्म विद्यते॥ इदमनुपधि वाक्यमच्छलं परमनिरामयमात्मसाक्षिकं॥ नरपतिरभिवीक्ष्य विस्मितः पुनरनु
योक्तुमिदं प्रचक्रमे॥ ॥शांतौ मोक्षधर्मे॥ ॥भीष्म उवाच॥ ॥जनको जनदेवस्तु ज्ञापितः परमर्षिणा॥ पुनरेवानुपप्रच्छ सां
पराये भावाभावौ॥ ॥जनक उवाच॥ भगवन्यदि न प्रेत्य संज्ञा भवति कस्यचित्॥ एवं सति किमज्ञानं ज्ञानं वा किं करिष्यति॥ सर्वमु
च्छेदनिष्ठं स्यात्पश्य चैतद्द्विजोत्तम॥ अप्रमत्तः प्रमत्तो वा किं विशेषं करिष्यति॥ असंसर्गो हि मुक्तेषु संसर्गो वा विनाशिषु॥
कस्मै क्रियेत कल्प्येत निश्चयः कोत्र तत्त्वतः॥ ॥भीष्म उवाच॥ ॥तमसा हि प्रतिच्छन्नं विभ्रांतमिव चातुरं॥ पुनः प्रशमयन्वा
क्यैः कविः पंचशिखोब्रवीत्॥ उच्छेदनिष्ठा नेहास्ति भावनिष्ठा न विद्यते॥ अयं ह्यपि समाहारः शरीरेंद्रियचेतसां॥ वर्त्तते
पृथगन्योन्यमप्याश्रित्य कर्मसु॥ धातवः पंच धातोयं खं वायुर्ज्योतिषांब पया॥ ते स्वभावेन तिष्ठंति वियुज्यंते स्वभावतः॥ ५१

आकाशं वायुरूष्मा च स्नेहो यश्चापि पार्थिवः॥ एष पंचसमाहारः शरीरमपि नैकधा॥ ज्ञानमूष्मा च वायुश्च त्रिविधः कर्मसंग्र
हः॥ इंद्रियाणींद्रियार्थश्च स्वभावश्चेतना मनः॥ प्राणापानौ विकारश्च धातवश्चात्र निःसृताः॥ श्रवणं स्पर्शनं जिह्वा दृष्टिर्ना
सा तथैव च॥ इंद्रियाणीति पंचैते चित्तपूर्वंगमा गुणाः॥ तत्र विज्ञानसंयुक्ता त्रिविधा वेदना ध्रुवा॥ सुखदुःखेति यामाहुरदुः
खामसुखेति च॥ शब्दः स्पर्शश्च रूपं च रसो गंधश्च मूर्त्तयः॥ एते ह्यामरणात्पंच षड्गुणा ज्ञानसिद्धये॥ तेषु कर्मनिसर्गश्च
शब्दतत्त्वार्थनिश्चयः॥ तमाहुः परमं शुक्रं बुद्धिमित्यव्ययं महत्॥ इमं गुणसमाहारमात्मभावेन पश्यतः॥ असम्यग्द
र्शनैर्दुःखमनंतं नोपशाम्यति॥ अनात्मेति च यद्दृष्टं तेनाहं न ममेत्यपि॥ वर्त्तते किमधिष्ठाना प्रसक्ता दुःखसंततिः॥ तत्र
सम्यक्मनो नाम त्यागशास्त्रमनुत्तमं॥ शृणु यत्तव मोक्षाय भाष्यमाणं भविष्यति॥ त्याग एव हि सर्वेषां युक्तानामपि
कर्मणां॥ नित्यं मिथ्याविनीतानां क्लेशो दुःखावहो मतः॥ द्रव्यत्यागे तु कर्माणि भोगत्यागे व्रतान्यपि॥ सुखत्यागे तपोयोगः स
र्वत्यागे समापना॥ तस्य मार्गोयमद्वैधः सर्वत्यागस्य दर्शितः॥ विप्रहाणाय दुःखस्य दुर्गतिस्त्वन्यथा भवेत्॥ पंच ज्ञानेंद्रिया
ण्युक्ता मनःषष्ठानि चेतसि॥ बलषष्ठानि वक्ष्यामि पंच कर्मेंद्रियाणि तु॥ हस्तौ कर्मेंद्रियं ज्ञेयमथ पादौ गतींद्रियं॥ प्रजन
नंदयोः शेफो विसर्गे पायुरिंद्रियं॥ वाक्तु शब्दविशेषार्थमिति पंचान्वितं विदुः॥ एवमेकादशैतानि बुध्वा तु विसृजेन्मनः॥ क
र्णौ शब्दश्च चित्तं च त्रयः श्रवणसंग्रहे॥ तथा स्पर्शे तथा रूपे तथैव रसगंधयोः॥ एवं पंचत्रिका ह्येते गुणास्तदुपलब्धये॥

येनायं त्रिविधो पायः प्रत्यया त्समुपस्थितः ॥ सात्विको राजसश्चापि तामसश्चापि ते त्रयः ॥ त्रिविधा वेदना येषु प्रसृतास
र्वसाधनी ॥ प्रहर्षः प्रीतिरानंदः सुखं संशांतचिंतता ॥ अकुतश्चित् कुतश्चिद्वा वित्ततः सात्विको गुणः ॥ अतुष्टिः परितापश्च
शोको लोभस्तथाक्षमा ॥ लिंगानि रजसस्तानि दृश्यंते त्वहहेतुतः ॥ अविवेकस्तथा मोहः प्रमादः स्वप्नतंद्रिता ॥ कथंचि
दपि वर्त्तंते विविधास्तामसा गुणाः ॥ तत्र यत्प्रीतिसंयुक्तं काये मनसि वा भवेत् ॥ वर्त्तते सात्विको भाव इत्युपेक्षेत तत्तथा ॥
यत्तु संतापसंयुक्तमप्रीतिकरमात्मनः ॥ प्रवृत्तं राज इत्येवं तमस्तदपि चिंतयेत् ॥ अथ यन्मोहसंयुक्तं काये मनसि वा
प्र भवेत् ॥ अतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ बुद्धिश्रोत्राश्रितं भूतं शब्दः श्रोत्रं समाश्रितः ॥ नोभयं शब्दविज्ञाने विज्ञा
नस्येतरस्य वा ॥ एवं त्वक्चक्षुषी जिह्वा नासिका चेति पंचमी ॥ स्पर्शे रूपे रसे गंधे तानि चेतो मनश्च तत् ॥ स्वकर्मयुगप
द्भावो दशास्वेतेषु तिष्ठति ॥ चित्तमेकादशं विद्धि बुद्धिर्द्वादशानी भवेत् ॥ तेषामयुगपद्भावे उच्छेदो नास्ति तामसः ॥ आस्थि
तो युगपद्भावो व्यवहारः स लौकिकः ॥ इंद्रियाण्यपि सूक्ष्माणि दृष्टापूर्वं श्रुतागमात् ॥ चिंतयन्ननुपर्येति त्रिभिरेवान्वि
तो गुणैः ॥ यत्तमोपहतं चित्तमाशुसंचारमध्रुवं ॥ करोत्युपरतं कार्ये तदाहुस्तामसं बुधाः ॥ यत्तदागमसंयुक्तं न किंचि
दुपशाम्यति ॥ अथ तत्राप्युपादत्ते तमोव्यक्तमिहान्वतं ॥ एवमेष प्रसंख्यातः स्वकर्मप्रत्ययो गुणाः ॥ कथंचिद्वर्त्तते सम्यक्
केषांचिद्वा निवर्त्तते ॥ एतदाहुः समाहारं क्षेत्रमध्यात्मचिंतकाः ॥ स्थितो मनसि यो भावः स वै क्षेत्रज्ञ उच्यते ॥ एवं सति क

ज्ञानं ति रजोमोहपरायणाः ॥ ते कृच्छ्रं प्राप्य सीदंति बुद्धिर्येषां प्रणश्यति ॥ बुद्धिलाभात्तु पुरुषः सर्वं नुदति किल्बिषं ॥ विपाप्मा ल
भते सत्वं सत्वस्थः संप्रसीदति ॥ ततस्तु या निवर्त्तंते जायंते वा पुनः पुनः ॥ कृपणाः परितप्यंते ते रथैरभिचोदितः ॥ अर्थसिद्धिमनर्थं च जीवि
तं मरणं तथा ॥ सुखदुःखफले चैव न द्वेष्मि न च कामये ॥ हतं हंति हतो ह्येव यो नरो हंति कंचन ॥ उभौ तौ न विजानीतो यश्च हंति हतश्च
यः ॥ हत्वा जित्वा च मघवन्यः कश्चित्पुरुषायते ॥ अकर्त्ता ह्येव भवति कर्त्ता ह्येव करोति तत् ॥ को हि लोकस्य कुरुते विनाशप्रभवावुभौ ॥
कृतं हि तत्कृतेनैव कर्त्ता तस्यापि चापरः ॥ पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं ॥ एतद्योनीनि भूतानि तत्र का परिवेदना ॥ महावि
द्योऽल्पविद्यश्च बलवान्दुर्बलश्च यः ॥ दर्शनीयो विरूपश्च सुभगो दुर्भगश्च यः ॥ सर्वं कालः समादत्ते गंभीरः स्वेन तेजसा ॥ तस्मिन्काल
वशं प्राप्ते का व्यथा मे विजानतः ॥ दग्धमेवानुदहति हतमेवानुहन्यते ॥ नश्यते नष्टमेवाग्रे लब्धव्यं लभते नरः ॥ नास्य द्वीपः कुतः
पारं नापारः संप्रदृश्यते ॥ नांतमस्य प्रपश्यामि विधेर्दिव्यस्य चिंतयन् ॥ यदि मे पश्यतः कालो भूतानि न विनाशयेत् ॥ स्यान्मे हर्षश्च
दर्पश्च क्रोधश्चैव शचीपते ॥ तुषभक्षं तु मां ज्ञात्वा प्रविविक्तजने रहः ॥ बिभ्रतं गार्दभं रूपमागत्य परिगर्हसि ॥ इच्छन्नहं विकुर्यां हि रू
पाणि बहुधात्मनः ॥ बिभीषणानि यानीह पलायेथास्त्वमेव मे ॥ कालः सर्वं समादत्ते कालः सर्वं प्रयच्छति ॥ काले विविहितं सर्वं मा कृ
थाः शक्र पौरुषं ॥ पुरा सर्वं प्रव्यथितं मयि क्रुद्धे पुरंदर ॥ अवैमि त्वस्य लोकस्य धर्मं शक्र सनातनं ॥ त्वमप्येवमवेक्ष्य स्वमात्मनो वि
स्मयं गमः ॥ प्रभवश्च प्रभावश्च नात्मसंस्थः कदाचन ॥ कौमारमेचित्तं तथैवाद्य यथा पुरा ॥ समवेक्षस्व मघवन्बुद्धिं विंदस्व नै
ष्ठिकीं ॥ देवा मनुष्याः पितरो गंधर्वोरगराक्षसाः ॥ आसन्सर्वे मम वशे तत्सर्वं वेत्थ वासव ॥ नमस्तस्यै दिशेऽप्यस्तु यस्यां वैरोचनो

बलिः ॥ इतिमामभ्यपद्यंत बुद्धिमात्सर्यमोहिताः ॥ नाहं तदनुशोचामि नात्मभ्रंशं शचीपते ॥ एवं मे निश्चिता बुद्धिः शास्त्तति
ष्ठाम्यहं वशे ॥ दृश्यते हि कुले जातो दर्शनीयः प्रतापवान् ॥ दुःखं जीवामि सहामात्यो भवितव्यं हि तत्तथा ॥ दौष्कुलेयस्तथा मू
ढो दुर्जातः शक्र दृश्यते ॥ दुःखं जीवन्सहामात्यो भवितव्यं हि तत्तथा ॥ दौष्कुलेयस्तथा मूढो दुर्जातः शक्र दृश्यते ॥ सुखं जीवन्स
हामात्यो भवितव्यं हि तत्तथा ॥ कल्याणी रूपसंपन्ना दुर्भगा शक्र दृश्यते ॥ अलक्षणा विरूपा च सुभगा दृश्यते तथा ॥ नैतदस्म
त्कृतं शक्र नैतच्छक्र त्वया कृतं ॥ यदेवमेवंगतो वज्रिन्यच्चाप्येवंगता वयं ॥ न कर्म भवता प्येतत्कृतं मम शतक्रतो ॥ ऋद्धिर्वाप्य
थ वा नर्द्धिः पर्यायकृतमेव तत् ॥ पश्यामि त्वां विराजंतं देवराजमवस्थितं ॥ श्रीमंतं द्युतिमंतं च गर्जमानं ममोपरि ॥ एवं चे
त्र मे कालो ममाक्रम्य स्थितो भवेत् ॥ पातयेयमहं त्वाद्य सवज्रमपि मुष्टिना ॥ न तु विक्रमकालोऽयं क्षमाकालोऽयमाग
तः ॥ कालः स्थापयते सर्वं कालः पचति वै तथा ॥ मां चेदभ्यागतः कालो दानवेश्वरं पूजितं ॥ गर्वंतं प्रतपंतं च कमन्यं नागमि
ष्यति ॥ द्वादशानां तु भवतामादित्यानां महात्मनां ॥ तेजांस्येकेन सर्वेषां देवराज धृतानि मे ॥ अहमेवोद्वहाम्यापो विसृजा
मि च वासव ॥ तपामि चैव त्रैलोक्यं विद्योताम्यहमेव च ॥ संरक्ष्यामि विलुंपामि ददाम्यथाददे ॥ संयच्छामि नियच्छामि लो इम
केषु प्रभुरीश्वरः ॥ तदद्य विनिवृत्तं मे प्रभुत्वममराधिप ॥ कालसैन्यावगाढस्य सर्वं न प्रतिभाति मे ॥ नाहं कर्त्ता न चैव त्वं ना
न्यः कर्त्ता शचीपते ॥ पर्यायेण हि भुज्यंते लोकाः शक्र यदृच्छया ॥ मासार्द्धमासवेश्मानमहोरात्राभिसंवृतं ॥ ऋतुद्वा

रं वायुमुखं वायुर्वेदविदो जनाः ॥ आहुः सर्वमिदं चिंत्यं जनाः केचिन्मनीषया ॥ अस्याः पंचैव चिंता याः पर्येष्यामि च पंचधा ॥ गंभीरं
गहनं ब्रह्म महत्तोयार्णवं यथा ॥ अनादिनिधनं चाहुरक्षरं क्षरमेव च ॥ सत्वेषु लिंगमाविश्य निर्लिंगमपि तत्स्वयं ॥ मन्यंते
ध्रुवमेवैनं ये जनास्तत्त्वदर्शिनः ॥ भूतानां तु विपर्यासं कुरुते भगवानिति ॥ नह्येतावद्भवेद्गम्यं न यस्मात्प्रकृतेः परः ॥ गतं हि स
र्वभूतानामगत्वा क्व गमिष्यसि ॥ यो धावता न हातव्यस्तिष्ठन्नपि न हीयते ॥ तमिंद्रियाणि सर्वाणि नानुपश्यंति पंचधा ॥ आहु
श्चैनं केचिदग्निं केचिदाहुः प्रजापतिं ॥ भूतानां तु विपर्यासं कुरुते भगवानिति ॥ नह्येतावद्भवेद्गम्यं न यस्मात्प्रकृतेः परः ॥ गहि तिं
सर्वभूतानामगत्वा क्व गमिष्यसि ॥ यो धावता न हातव्यस्तिष्ठन्नपि न हीयते ॥ ऋतून्मासार्द्धमासांश्च दिवसांश्च क्षणांस्त
था ॥ पूर्वाह्णमपराह्णं च मध्याह्नमिति चापरे ॥ मुहूर्त्तमपि चैवाहुरेकं संतमनेकधा ॥ तं कालमिति जानीहि यस्य स
र्वमिदं वशे ॥ बहूनींद्र सहस्राणि समतीतानि वासव ॥ बलवीर्योपपन्नानि यथैव त्वं शचीपते ॥ त्वामप्यति बलं श
क्र देवराजं बलोत्कटं ॥ प्राप्ते काले महावीर्यः कालः संशमयिष्यति ॥ य इदं सर्वमादत्ते तस्माच्छक्र स्थिरो भव ॥ मयात्व
या च पूर्वैश्च न स शक्यो निवर्तितुं ॥ यामेतां प्राप्य जानीषे राजश्रियमनुत्तमां ॥ स्थिता मयीति तन्मिथ्या नैषा ह्येकत्र
तिष्ठति ॥ स्थिता हींद्र सहस्रेषु त्वद्विशिष्टतमेष्वियं ॥ मां च लोलां परित्यज्य त्वामगाद्विबुधाधिप ॥ मैवं शक्र पुनः कार्षीः
शांतो भवितुमर्हसि ॥ त्वामप्येवंगतं त्यक्त्वा क्षिप्रमन्यं गमिष्यति ॥ ॥ इति शांते मोक्षधर्मे बलिवासवसंवादे ॥ ॥ भीष्मः

मोक्षधर्म॰
५८

उवाच।। ।।शतक्रतुरथापश्यद्बलेर्दीप्तांमहात्मनः।।स्वरूपिणींशरीराद्धिनिष्क्रामतितदाश्रयं।।तांदृष्ट्वाप्रभयादीप्तांभ
गवान्पाकशासनः।।विस्मयोत्फुल्लनयनोबलिंपप्रच्छवासवः।। ।।शक्रउवाच।। ।।बलेकेयमपाक्रांतारोसांचमा
नाशिखंडिनी।।त्वत्तःस्थितासकेयूरादीप्यमानास्वतेजसा।। ।।बलिरुवाच।। ।।नहीमामासुरींवेद्मिनदैवींनचमा
नुषीं।।त्वमेनांपृच्छवामावायथेष्टंकुरुवासव।। ।।शक्रउवाच।। ।।कात्वंबलेपराक्रांतारोचमानाशिखंडिनी।।अजानतो
ममाचक्ष्वनामधेयंशुचिस्मिते।।कात्वंतिष्ठसिमायेवदीप्यमानास्वतेजसा।।हित्वादैत्येश्वरंसुभ्रुतन्ममाचक्ष्वतत्व
तः।। ।।श्रीरुवाच।। ।।नमांविरोचनोवेदनायंवैरोचनोबलिः।।आहुर्मांदुःसहेत्येवंविधित्सेतिचमांविदुः।।भूतिर्ल
क्ष्मीतिमामाहुःश्रीरित्येवंचवासव।।त्वंमांशक्रनजानीषेसर्वदेवानानांविदुः।। ।।शक्रउवाच।। ।।किमिदंत्वंम
मकृतेउताहोबलिनाकृते।।दुःसहेविजहास्येनंचिरंसंवासिनीसति।। ।।श्रीरुवाच।। ।।नधातानविधातामां
विदधातिकथंचन।।कालस्तुशक्रपर्यागान्मैनंशक्रावमन्यथाः।। ।।शक्रउवाच।। ।।कथंत्वयाबलिस्त्यक्तःकिमर्थंवाशि
खंडिनी।।कथंचमांनजह्यास्त्वंतन्मेब्रूहिशुचिस्मिते।। ।।श्रीरुवाच।। ।।सत्येस्थितास्मिदानेचव्रतेतपसिचैवहि।।परा
क्रमेचधर्मेचपराचीनस्ततोबलिः।।ब्रह्मण्योयंपुराभूत्वासत्यवादीजितेंद्रियः।।अभ्यसूयन्ब्राह्मणानामुच्छिष्ट
श्चास्पृशद्घृतं।।यज्ञशीलःसदाभूत्वामामेवयजतेस्वयं।।प्रोवाचलोकान्मूढात्माकालेनोपनिपीडितः।।अपाकृता

५८

उच्छेदःशाश्वतोवाकथंस्यात्।।स्वभावाद्वर्त्तमानेषुसर्वभूतेषुहेतुतः।।यथार्णवगतानद्योव्यक्तिंजहतिनामच।।तदाश्रतानि
यच्छंतितादृशःसत्वसंक्षयः।।एवंसतिकुतःसंज्ञाप्रेत्यभावेपुनर्भवेत्।।प्रतिसंमिश्रितेजीवेगृह्यमाणेचसर्वतः।।इमांच
योवेदविमोक्षबुद्धिमात्मानमन्विच्छतिचाप्रमत्तः।।नलिप्यतेकर्मफलैरनिष्टैःपत्रंविशस्येवजलेनसिक्तं।।दृढैश्चपाशैर्ब
हुभिर्विमुक्तःप्रजानिमित्तैरपिदैवतैश्च।।यदाह्यसौसुखदुःखेजहातिमुक्तस्तदाग्र्यांगतिमेत्यलिंगः।।श्रुतिप्रमाणागममंग
लैश्चशेतेजरामृत्युभयादतीतः।।क्षीणेचपुण्येविगतेचपापेततोनिमित्तेचफलेविनष्टे।।अलेपमाकाशमलिंगमेव
मास्थायपश्यंतिमहत्यसक्ताः।।यथोर्णनाभिःपरिवर्त्तमानःतंतुक्षयेतिष्ठतिपात्यमानः।।तथाविमुक्तःप्रजहातिदुःखंवि
ध्वंसतेलोष्टइवाद्रिमृच्छन्।।यथारुरुःशृंगमथोपुराणंहित्वात्वचंचाप्युरगोयथाच।।विहायगच्छत्यनवेक्ष्यमाणस्तथावि
मुक्तोविजहातिदुःखं।।द्रुमंयथावाप्युदकेपतंतमुत्सृज्यपक्षीनिपतत्यसक्तः।।तथाह्यसौसुखदुःखेविहायमुक्तःपरार्द्ध्यां
गतिमेत्यलिंगः।।अपिचभवतिमैथिलेनगीतंनगरमुपाहितमग्निनाभिवीक्ष्य।।नखलुममहिदह्यतेत्रकिंचिदित्स्वय
मिदमाहकिलस्मभूमिपालः।।इतिममतपदंनिशम्यराजास्वयमिहपंचशिखेनभाषमाणं।।नखिलमभिसमीक्ष्यनि
श्चितार्थःपरमसुखीविजहारवीतशोकः।।इममिहयःपठतिविमोक्षनिश्चयंमहीपतेःसततमवेक्ष्यतेतथा।।उपद्रवान्ना
नुभवत्यदुःखितःप्रमुच्यतेकपिलमिवेत्यमैथिलः।। ।।शांतेमोक्षधर्मे।। ।।युधिष्ठिरः।। ।।किंकुर्वन्सुखमाप्नोति

किंकुर्वन्दुःखमाप्नुयात्॥ किंकुर्वन्निर्भयो लोके सिद्धिश्चवतिभारत॥ ॥भीष्मः॥ ॥इममेव प्रशंसंति वृद्धाः श्रुतिसमाधयः
॥सर्वेषामेव वर्णानां ब्राह्मणस्य विशेषतः॥ नादांतस्य क्रियासिद्धिर्यथावदुपपद्यते॥ क्रिया तपश्च सत्यं च दमे सर्वं प्रति
ष्ठितं॥ दमस्तेजो वर्द्धयति पवित्रं दम उच्यते॥ विपाप्मा निर्भयो दांतः पुरुषो विंदते महत्॥ सुखं दांतः प्रस्वपिति सुखं च प्र
तिबुध्यते॥ सुखं लोके विपर्येति मनश्चास्य प्रसीदति॥ तेजो दमेन ध्रियते तत्र तीक्ष्णोधिगच्छति॥ अमित्रांश्च बहून्नि
त्यं पृथगात्मनि पश्यति॥ क्रव्याद्भ्य इव भूतानामदांतेभ्यः सदा भयं॥ तेषां विप्रतिषेधार्थं राजा सृष्टः स्वयंभुवा॥ आश्र
मेषु च धर्मेषु दम एव विशिष्यते॥ यच्च तेषु फलं धर्मे भूयो दांते तदुच्यते॥ तेषां लिंगानि वक्ष्यामि येषां समुदयो दमः॥
अकार्पण्यमसंरंभः संतोषः श्रद्दधानता॥ अक्रोध आर्जवं नित्यं नातिवादोभिमानिता॥ गुरुपूजानसूया च दया भूते
षु पैशुनं॥ जनवादो मृषावादः स्तुतिनिंदाविवर्जनं॥ साधुकामश्च स्पृहयन्नापति प्रत्ययान्नृषु॥ अवैरकृत्सूपचारः
समो निंदाप्रशंसयोः॥ सुवृत्तः शीलसंपन्नः प्रसन्नात्मात्मवान्प्रभुः॥ प्राप्य लोके च सत्कारं स्वर्गं वै प्रत्य गच्छति॥
दुर्गमं सर्वभूतानां प्राप्य यन्मोदते सुखी॥ सर्वभूतहिते युक्तो न स्म यो द्विषते जनं॥ महाह्रद इवाक्षोभ्यः प्रज्ञातृप्तः प्रसी
दति॥ अभयं यस्य भूतेभ्यः सर्वेषामभयं यतः॥ नमस्यः सर्वभूतानां दांतो भवति बुद्धिमान्॥ न हृष्यति महत्यर्थे व्यस
ने च न शोचति॥ स वै परिमितप्रज्ञः स दांतो द्विज उच्यते॥ कर्मभिः श्रुतसंपन्नः सद्भिराचरितैः शुचिः॥ सदैव दमसंयुक्तस्त

स्य भुंक्ते महाफलं॥ अनसूया क्षमा शांतिः संतोषः प्रियवादिता॥ सत्यं दानमनायासो नैष मार्गो दुरात्मनां॥ कामः क्रो
धश्च लोभश्च परस्येर्ष्या विकत्थना॥ कामक्रोधौ वशे कृत्वा ब्रह्मचारी जितेंद्रियः॥ विक्रम्य घोरे तपसि ब्राह्मणः संशितव्रतः
॥ कालकांक्षी चरेल्लोकान्निरपायइवात्मवान्॥ ॥शांतौ मोक्षधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥द्विजातयो व्रतोपेता यदिदं भु
ञ्जते हविः॥ अन्नं ब्राह्मणकामाय कथमेतत्पितामह॥ ॥भीष्म उवाच॥ ॥अवेदोक्तव्रतोपेता भुंजानाः कार्यकारिणः॥ वेदो
क्तेषु च भुंजाना व्रतलुब्धा युधिष्ठिर॥ यदिदं तपइत्याहुरुपवासं पृथक्जनाः॥ एतत्तपो महाप्राज्ञ उताहो किं तपो भवेत्॥ ॥
भीष्मः॥ ॥मासपक्षोपवासेन मन्यंते यत्तपो जनाः॥ आत्मतंत्रोपघातस्तु न तपस्तत्सतां मतं॥ त्यागश्च सन्नतिश्चैव शिष्य
ते तप उत्तमं॥ सदोपवासी स भवेद्ब्रह्मचारी सदा भवेत्॥ मुनिश्च स्यात्सदा विप्रो देवतं च सदा भवेत्॥ कुटुंबिको धर्मकामः स
दास्वप्नश्च भारत॥ अमांसाशी सदा च स्यात्पवित्री च सदा भवेत्॥ अमृताशी सदा च स्याद्देवतातिथिपूजकः॥ विघ
साशी सदा च स्यात्सदा चैवातिथिव्रतः॥ श्रद्दधानः सदा च स्यात्सदा चैवातिथिव्रतः॥ ॥भीष्मः॥ ॥अंतरा प्रातराशं च
सायमाशं तथैव च॥ सदोपवासी स भवेद्यो न भुंक्ते तथा पुनः॥ भार्यां गच्छन्ब्रह्मचारी ऋतौ भवति वा द्विजः॥ ऋतवा
दी भवेन्नित्यं ज्ञाननित्यश्च यो नरः॥ न भक्षयेद्वृथामांसममांसाशी भवत्यपि॥ दाननित्यः पवित्रश्च अस्वप्नश्च दिवास्व
पन्॥ भृत्यातिथिषु यो भुंक्ते भुक्तवत्सु सदा सदा॥ अमृतं केवलं भुंक्ते इति विद्धि युधिष्ठिर॥ अभुक्तवत्सु नाश्नानः

सततं यस्तु वै द्विजः ।। अभोजनेन तेनास्य जितस्वर्गो भवत्युत ।। देवताभिः पितृभिश्च भृत्येभ्योतिथिभिः सह ।। अवशिष्टं तु
यो श्नाति तमाहुर्विघसाशिनं ।। तेषां लोका ह्यपर्यंताः सदने ब्रह्मणा सह ।। उपस्थिताश्चाप्सरोभिः परियांति दिवौ
कसः ।। देवता भिश्च ये सार्द्धं पितृभिश्चोपभुंजते ।। रमंते पुत्रपौत्रैश्च तेषां गतिरनुत्तमा ।। ।। शांतौ मोक्षधर्मे ।। ।। युधि
ष्ठिर उवाच ।। ।। यदिदं कर्म लोकेस्मिन् शुभं वा यदि वाशुभं ।। पुरुषं योजयत्येव फलयोगेन भारत ।। कर्त्ता स्वित्तस्य पु
रुष उताहो नेति संशयः ।। एतदिच्छामि तत्वेन त्वत्तः श्रोतुं पितामह ।। ।। भीष्मः ।। ।। अत्राप्युदाहरंतीममितिहासं पु
रातनं ।। प्रल्हादस्य च संवादमिंद्रस्य च युधिष्ठिर ।। अनासक्तं धूतपाप्मानं कुले जातं बहुश्रुतं ।। अस्तंभमनहंकारं
सत्वस्थं समये रतं ।। तुल्यनिंदास्तुतिर्दांतं शून्यागारसमाकृतिं ।। चराचराणां भूतानां विदितप्रभवाप्ययं ।। अक्रुध्य
तमहृष्यंतमप्रियेषु प्रियेषु च ।। कांचने वाथ लोष्ठे वा उभयोः समदर्शनं ।। आत्मनिश्रेयसे ज्ञाने धीरं निश्चितनिश्चयं ।।
परावरज्ञं भूतानां सर्वज्ञं सर्वदर्शनं ।। शक्रः प्रह्लादमासीनमेकांते संयतेंद्रियं ।। बुभुत्समानस्तत्प्रज्ञामभिगम्येदम
ब्रवीत् ।। यैः कश्चित्संमतो लोके गुणैः स्यात्पुरुषो नृषु ।। भवत्यनपगान्सर्वांस्तान्गुणाँल्लक्षयामहे ।। अथ ते लक्ष्य
ते बुद्धिः समा बालजनैरिह ।। आत्मानं मन्यमानः सच्छ्रेयं किमिह मन्यसे ।। बद्धः पाशैश्च्युतः स्थानाद्द्विषतां वशमागतः
।। श्रिया विहीनः प्रह्लाद शोचितव्ये न शोचसि ।। प्रज्ञालाभात्तु दैतेय उताहो धृतिमत्तया ।। प्रह्लाद स्वस्थरूपोसि पश्य ५८

न्व्यसनमात्मनः ।। इति संचोदितस्तेन धीरो निश्चितनिश्चयः ।। उवाच श्लक्ष्णया वाचा स्वां प्रज्ञामनुवर्णयन् ।। ।। प्रह्ला
द उवाच ।। ।। प्रवृत्तिं च निवृत्तिं च भूतानां यो न बुध्यते ।। तस्य स्तंभो भवेद्बाल्यान्नास्ति स्तंभोनुपश्यतः ।। स्वभावात्संप्र
वर्त्तंते निवर्त्तंते तथैव च ।। सर्वे भावास्तथाभावाः पुरुषार्थो न विद्यते ।। पुरुषार्थस्य चाभावे नास्ति कश्चित्स कारकः ।। स्व
यं न कुर्वतस्तस्य जातु मानो भवेदिह ।। यस्तु कर्त्तारमात्मानं मन्यते साध्वसाधु वा ।। तस्य दोषवती प्रज्ञा अतत्वज्ञेति मे म
तिः ।। यदि स्यात्पुरुषः कर्त्ता शक्रात्मश्रेयसे ध्रुवं ।। आरंभास्तस्य सिद्ध्येयुर्न तु जातु पराभवेत् ।। अप्रियस्य हि निर्वृत्तिर
निर्वृत्तिः प्रियस्य च ।। लक्ष्यते यतमानानां पुरुषार्थस्ततः कुतः ।। अनिष्टस्याभिनिर्वृत्तिरिष्टसंवृत्तिरेव च ।। अप्रयते
न पश्यामः केषांचित्तत्स्वभावतः ।। प्रतिरूपतराः केचिद्दृश्यंते बुद्धिमत्तराः ।। विरूपेभ्योल्पबुद्धिभ्यो लिप्समाना धनागमं ।।
भाव स्वप्रेरिताः सर्वे निविशंते गुणा यदा ।। शुभाशुभास्तदा तत्र कस्य किं मानकारणं ।। स्वभावादेव तत्सर्वमिति मे निश्चिता
मतिः ।। आत्मप्रतिष्ठिता प्रज्ञा मम नास्ति ततोन्यथा ।। कर्मजं त्विह मन्यंते फलयोगं शुभाशुभं ।। कर्मणां विषयं कृत्स्न
महं वक्ष्यामि तच्छृणु ।। यथा वेदयते कश्चिदोदनं पाप्संह्यदन् ।। एवं सर्वाणि भूतानि स्वभावस्यैव लक्षणं ।। विकारानेव
यो वेद न वेद प्रकृतिं परां ।। तस्य स्तंभो भवेद्बाल्यान्नास्ति स्तंभोनुपश्यतः ।। स्वभावभाविनो भावान्सर्वानेवेह निश्च
यात् ।। बुध्यमानस्य दर्पो वा मानो वा किं करिष्यति ।। वेदधर्मविदं कृत्स्नं भूतानां चाप्यनित्यतां ।। तस्माच्छक्र न शोचामि सर्वं

ह्येवेदमंतवत्॥ निर्ममो निरहंकारो निराशीर्मुक्तबंधनः॥ स्वस्थो व्यपेतः पश्यामि भूतानां प्रभवाप्ययौ॥ कृतप्रज्ञस्य दांतस्य वितृष्णस्य
निराशिषः॥ नायासो विद्यते शक्र पश्यतो लोकविद्यया॥ प्रकृतौ च विकारे च न मे प्रीतिर्न च द्विषे॥ द्वेष्टारं च न पश्यामि यो मामद्य मम
मायते॥ नोर्ध्वं नावाङ् न तिर्यक् च न क्वचिच्छक्र कामये॥ न हि ज्ञेये न विज्ञाने नाज्ञाने शर्म विद्यते॥ ॥शुक्रः॥ ॥येनैषा लभ्यते प्रज्ञा ये
न शांतिरवाप्यते॥ प्रब्रूहि तमुपायं मे सम्यक् प्रह्लाद पृच्छतः॥ ॥प्रह्लादः॥ ॥आर्जवेनाप्रमादेन प्रसादेनात्मवत्तया॥ वृद्धशु
श्रूषया शक्र लभते पुरुषो महत्॥ स्वभावाल्लभते प्रज्ञां शांतिमेति स्वभावतः॥ स्वभावादेव तत्सर्वं यत्किंचिदनुपश्यसि॥ इत्युक्तो
दैत्यपतिना शक्रो विस्मयमागमत्॥ प्रीतिमांश्च तदा राजंस्तद्वाक्यं प्रत्यपूजयत्॥ स तदाभ्यर्च्य दैत्येंद्रं त्रैलोक्यपतिरीश्वरः॥ अ
सुरेंद्रमुपामंत्र्य जगाम स्वं निवेशनं॥ ॥शांतौ मोक्षधर्मे॥ ॥युधिष्ठिरः॥ ॥यया बुद्ध्या महीपालो भ्रष्टश्रीर्विचरेन्महीं॥ काल
दंडविनिष्पिष्टस्तन्मे ब्रूहि पितामह॥ ॥भीष्मः॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं॥ वासवस्य च संवादं बलेर्वैरोचनन
स्य च॥ पितामहमुपागम्य प्रणिपत्य कृतांजलिः॥ सर्वानेवासुरान्जित्वा बलिं पप्रच्छ वासवः॥ यस्य स्म ददतो वित्तं न कदाचन
हीयते॥ तं बलिं नाधिगच्छामि ब्रह्मन्नाचक्ष्व मे बलिं॥ स एव ह्यस्तमयते स स्म विद्योतते दिशः॥ स वर्षति स्म वर्षाणि यथाका
लमतंद्रितः॥ तं बलिं नाधिगच्छामि ब्रह्मन्नाचक्ष्व मे बलिं॥ स वायुर्वरुणश्चैव स रविः स च चंद्रमाः॥ सोग्निस्तपति भूतानि
जलं च स भवत्युत॥ तं बलिं नाधिगच्छामि ब्र०॥ ॥ब्रह्मोवाच॥ ॥नैतत्ते साधु मघवन्यदेनमनुपृच्छसि॥ पृष्टस्तु नानृतं ब्रूया
त्तस्माद्वक्ष्यामि ते बलिं॥ उष्ट्रेषु यदि वा गोषु खरेष्वश्वेषु वा पुनः॥ वरिष्ठो भविता जंतुः शून्यागारे शचीपते॥ ॥शक्र उवाच॥

यदि स्म बलिना ब्रह्मन्शून्यागारे समीयिवान्॥ हन्यामेनं न वा हन्यां तद्ब्रह्मन्ननुशाधि मां॥ ॥ब्रह्मोवाच॥ ॥मा स्म श
क्र बलिं हिंसीर्न बलिर्वधमर्हति॥ न्यायस्तु शक्र प्रष्टव्यस्त्वया वासव काम्यया॥ ॥भीष्म उवाच॥ ॥एवमुक्तो भगव
ता महेंद्रः पृथिवीं तदा॥ चचारैरावतस्कंधमधिरुह्य श्रिया वृतः॥ ततो ददर्श स बलिं खरवेशेन संवृतं॥ यथाख्यातं
भगवता शून्यागारकृतालयं॥ ॥शक्र उवाच॥ ॥खरयोनिमनुप्राप्तस्तुषभक्षोसि दानव॥ इयं ते योनिरधमा ऽ
शोचस्याहो न शोचसि॥ अदृष्टं बत पश्यामि द्विषतां वशमागतं॥ श्रिया विहीनं मित्रैश्च भ्रष्टवीर्यपराक्रमं॥ यत्तद्या
नसहस्रैस्त्वं ज्ञातिभिः परिवारितः॥ लोकान्प्रतापयन्सर्वान्यास्यस्मानवितर्कयन्॥ त्वन्मुखाश्चैव दैतेया व्यति
ष्ठंस्तव शासने॥ अकृष्टपच्या च मही तवैश्वर्ये बभूव ह॥ इदं च तेद्य व्यसनं शोचस्याहो न शोचसि॥ यदातिष्ठः स
मुद्रस्य पूर्वकूले विलेलिहन्॥ ज्ञातिभ्यो विभजन्वित्तं तदासीत्ते मनः कथं॥ यत्ते सहस्रसमिता ननृतुर्देवयोषि
तः॥ बहूनि वर्षपूगानि विहारे दीप्यतः श्रिया॥ सर्वाः पुष्करमालिन्यः सर्वाः कांचनसप्रभाः॥ कथमद्य तदा चैव मन
स्ते दानवेश्वर॥ छत्रं तवासीत्सुमहत्सौवर्णं रत्नभूषितं॥ नृत्यंतु यत्र गंधर्वाः षट्सहस्राणि सप्तधा॥ यूपस्तवा
सीत्सुमहान्यजतः सर्वकांचनः॥ यत्राददः सहस्राणि अयुतानां गवां दश॥ अनंतरं सहस्रेण तदासीद्दैत्य का
मतिः॥ यदा च पृथिवीं सर्वां यजमानोनुपर्यगाः॥ शम्याक्षेपेण विधिना तदासीत्किं नु ते हृदि॥ न ते पश्यामि

सा

भृंगारंनछत्रंव्यजनेनच॥ ब्रह्मदत्तांचमेमालांनत्वंद्रक्ष्यसिवासव॥ नतेपश्यामिभृंगारंनछत्रंव्यजननंनच॥ ब्रह्म
दत्तांचमेमालांनत्वंद्रक्ष्यसिवासव॥ गुहायांनिहितानित्यंममरत्नानिपद्रक्ष्यसि॥ यदामेभविताकालस्तदात्वंता
निपश्यसि॥ नत्वेतदनुरूपंतेयशसोवाकुलस्यवा॥ समृद्धार्थोसमृद्धार्थंयन्मांकथितुमिछसि॥ नहिदुःखेषुशो
चंतेनप्रहृष्यंतिचर्द्धिषु॥ कृतप्रज्ञाज्ञानतृप्ताःक्षांताःसंतोमनीषिणः॥ त्वंतुप्राकृतयाबुध्यापुरंदरविकथ्यसे॥ यदाह
मिवभावीस्यात्तदानैवंवदिष्यसि॥ ॥शांतौमोक्षधर्मे॥ ॥भीष्मः॥ ॥पुनरेवतुतंशक्रःप्रहसन्निदमब्रवीत्॥ निः
श्वसंतंयथानागमव्याहाराय भारत॥ ॥शक्रउवाच॥ ॥यद्यद्यानसहस्रेणज्ञातिभिःपरिवारितः॥ लोकान्प्रताप
यन्सर्वान्यास्यस्यस्मान्वितर्कयन्॥ दृष्ट्वासकृपणांचेमामवस्थामात्मनोबले॥ ज्ञातिमित्रपरित्यक्तःशोचस्या
होनशोचसि॥ प्रीतिंप्राप्यातुलांप्रीतिंलोकांश्चात्मवशेस्थितान्॥ विनिपातमिमंबाह्यंशोचस्याहोनशोचसि॥
॥ ॥बलिरुवाच॥ ॥अनित्यमुपलक्ष्येहकालपर्यायधर्मतः॥ तस्माछक्रनशोचामिसर्वंह्येवेदमंतवत्॥ अंत
वंतइमेदेहाभूतानांचसुराधिप॥ तेनचक्रनशोचामिनापराधादिदंमम॥ जीवितंचशरीरंचजात्यैवसहजायते॥
उभेसहविवर्द्धेतेउभेसर्वेहनिनश्यतः॥ नहीदृशमहंभावमवशःप्राप्यकेवलं॥ यदेवमभिजानामिकाव्यथामे
विजानतः॥ भूतानांनिधनंनिष्ठास्रोतसामिवसागरः॥ नैतत्सम्यक्विजानंतेनरामुह्यंतिवज्रहकृ॥ येत्वेवंनाभि

हतःशक्रत्वयिवत्स्यामिभारत॥ अप्रमत्तेनधार्यास्मितपसाविक्रमेणच॥ ॥शक्रउवाच॥ ॥नास्तिदेवमनुष्येषुसर्वभू
तेषुवापुमान्॥ यस्त्वामेकोविसहितुंशक्नुयात्कमलालये॥ ॥श्रीरुवाच॥ ॥नैवदेवोनगंधर्वोनासुरोनचराक्षसः॥
योमामेकोविसहितुंशक्तःकश्चित्पुरंदर॥ ॥शक्रउवाच॥ ॥तिष्ठेथामपित्वंनित्यंयथातत्ब्रूहिमेशुभे॥ तत्करिष्या
मितेवाक्यमृतंतद्वक्तुमर्हसि॥ ॥श्रीरुवाच॥ स्थास्यामिनित्यंदेवेंद्रयथात्वयिनिबोधतत्॥ विधिनावेददृष्टेनचतु
र्द्धाविभजस्वमां॥ ॥शक्रउवाच॥ ॥अहंवैत्वांनिधास्यामियथाशक्तियथाबलं॥ नतुमेतिक्रमोस्याद्वैसदालक्ष्मितवां
तिके॥ भूमिरेवमनुष्येषुधारिणीभूतभाविनी॥ सातेपादंतितिक्षेतसमर्थाहीतिमेमतिः॥ ॥श्रीरुवाच॥ ॥एषमेनि
हितःपादोयोयंभूमौप्रतिष्ठितः॥ द्वितीयंशक्रपादंमेतस्मात्सुनिहितंकुरु॥ ॥शक्रउवाच॥ ॥आपएवमनुष्येषुद्रवंत्यः
परिचारिणी॥ तास्तेपादंतितिक्षंतामलमापस्तितिक्षितुं॥ ॥श्रीरुवाच॥ ॥एषमेनिहितःपादोयोयमप्सुप्रतिष्ठि
तः॥ तृतीयंशक्रपादंमेतस्मात्सुनिहितंकुरु॥ ॥शक्रउवाच॥ ॥यस्मिन्वेदाश्चयज्ञाश्चयस्मिन्देवाःप्रतिष्ठिताः॥ तृ
तीयंशक्रपादंमेस्तुधृतेधारयिष्यति॥ ॥श्रीरुवाच॥ ॥एषमेनिहितःपादोयोयमग्नौप्रतिष्ठितः॥ चतुर्थंशक्रपादंमे
तस्मात्सुनिहितंकुरु॥ ॥शक्रउवाच॥ ॥येवैसंतोमनुष्येषुब्रह्मण्याःसत्यवादिनः॥ तेतेपादंतितिक्षंतामलंसंतस्तिति
क्षितुं॥ ॥श्रीरुवाच॥ ॥एषमेनिहितःपादोयोयंसत्सुप्रतिष्ठितः॥ एवंविनिहितांशक्रभूतेषुपरिधत्स्वमां॥ ॥शक्रः॥

मताना मिह यो वै त्वां मया विनिहतं सती ॥ उपहन्यां त्वं समेधष्व स्तथाप्र पवंतु मेव च ॥ ततस्त्यक्तः श्रिया राजा दैत्यानां ब
लिरब्रवीत ॥ ॥ बलिरुवाच ॥ ॥ यावत्पुरस्तात्प्रतपेत्तावद्वै दक्षिणां दिशं ॥ पश्चिमां तावदेवापि तथोदीचीं दिवाकरः ॥
तथा मध्यंदिने सूर्यो नास्तमेति यदा तदा ॥ पुनर्देवासुरं युद्धं भाविजेतास्मि वस्तदा ॥ सर्वलोकान्यदादित्य एकस्थस्ताप
यिष्यति ॥ तदा देवासुरे युद्धे जेताहं त्वां शतक्रतो ॥ ॥ शक्र उवाच ॥ ॥ ब्रह्मणास्मि समादिष्टो न हंतव्यो भवानिति ॥ तेन ते
वि हं बले वज्रं न मुंचामि मूर्द्धनि ॥ यथेष्टं गच्छ दैत्येंद्र स्वस्ति तेस्तु महासुर ॥ आदित्यो नावतप्ता कदाचिन्मध्यतः स्थि
तः ॥ स्थापितो ह्यस्य समयः पूर्वमेव स्वयंभुवा ॥ अजस्रं परियात्येष सत्येनावतपन्प्रजाः ॥ अयनं तस्य षण्मासा
नुत्तरं दक्षिणं तथा येन संयाति लोकेषु शीतोष्णे विसृजन्रविः ॥ ॥ भीष्म उवाच ॥ ॥ एवमुक्तं दैत्येंद्रो बलिरिंद्रेण भा
रत ॥ जगाम दक्षिणामाशामुदीचीं तु पुरंदरः ॥ इत्येवं बलिना गीतमनहंकारसंज्ञितं ॥ वाक्यं श्रुत्वा सहस्राक्षः स्वर्ग
मारुरुहे तदा ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ अत्रैवोदाहरंतीममितिहासं पुरातनं ॥ शतक्रतोश्च संवादं न
मुचेश्च युधिष्ठिर ॥ श्रिया विहीनमासीनमक्षोभ्यमिव सागरं ॥ भवाभवज्ञं भूतानामित्युवाच पुरंदरः ॥ बद्धः पाशैश्च्युतः स्
थानाद्द्विषतां वशमागतः ॥ श्रिया विहीनो नमुचे शोचस्याहो न मोचसि ॥ ॥ नमुचिरुवाच ॥ ॥ अनिवार्येण शोकेन
शरीरं चोपतपते ॥ अमित्राश्च प्रहृष्यंति शोके नास्ति सहायता ॥ तस्माच्छक्र न शोचामि सर्वं ह्येवेदमंतवत् ॥ संतापाद्भ्र

श्यते चायुर्द्धर्मश्चैव सुरेश्वर ॥ विनीय खलु तद्दुःखमागतं वैमनस्यजं ॥ ध्यातव्यं मनसा ह्यद्य कल्याणं संविजानता ॥
यदा यदा हि पुरुषः कल्याणे कुरुते मनः ॥ तदा तदास्य सिध्यंति सर्वार्था नात्र संशयः ॥ एकः शास्ता न द्वितीयोस्ति शा
स्ता गर्भे शयानं पुरुषं शास्ति शास्ता ॥ तेनानुयुक्तः प्रवणादिवोदकं यथा नियुक्तोस्मि तथा वहामि ॥ भावाभावौ त्व
विजानन्गरीयो ज्ञानाच्छ्रेयो न तु तद्धि करोमि ॥ आशासु धर्म्यासु परासु कुर्वन्यथा नियुक्तोस्मि तथा वहामि ॥ यथाय
थास्य प्राप्तव्यं प्राप्नोत्येव तथा तथा ॥ यत्र यत्रैव संयुक्तो धात्रा गर्भं पुनः पुनः ॥ तत्र तत्रैव वसति न यत्र स्वयमिच्छति ॥
वो भावो योयमनुप्राप्तो भवितव्यमिदं मम ॥ इति यस्य सदा भावो न स मुह्येत्कदाचन ॥ पर्यायैर्हन्यमानानामभियोक्ता न
विद्यते ॥ दुःखमेतत्तु यद्द्वेष्टा कर्ताहमिति मन्यते ॥ ऋषींश्च देवांश्च महासुरांश्च त्रैविद्यवृद्धांश्च वने मुनींश्च ॥ का
न्नापदो नोपनमंति लोके परावरज्ञास्तु न संभ्रमंति ॥ न पंडितः क्रुध्यति नाभिपद्यते न चापि संसीदति न प्रहृष्य
ति ॥ न चार्थकृच्छ्रव्यसनेषु शोचते स्थितः प्रकृत्या हिमवानिवाचलः ॥ यमर्थसिद्धिः परमा न हर्षयेत्तथैव काले
व्यसनं न मोहयेत् ॥ सुखं च दुःखं च तथैव मध्यमं निषेवते यः स धुरंधरो नरः ॥ यां यामवस्थां पुरुषोधिगच्छेत्तस्यां
रमेतापरितप्यमानः ॥ एवं प्रवृद्धं प्रणुदन्मनोजं संतापयामास करं शरीरे ॥ न तत्सदः संपरिषत्सभा च सा प्राप्य
यां न कुरुते सदा भयं ॥ धर्मतत्त्वमवगाह्य बुद्धिमान्योभ्युपैति स धुरंधरो नरः ॥ प्राज्ञस्य कर्माणि दुरन्वयानि

नवै प्राज्ञो मुह्यति मोहकाले ॥ स्थानाच्युतश्चेन्न मुमोह गौतस्तावत्तत्क्षेमपदं प्राप्य वृद्धः ॥ न मंत्रबलवीर्येण प्र
ज्ञया पौरुषेण च ॥ न शीलेन न वृत्तेन तथा नैवार्थसंपदा ॥ आलस्यं लभते मर्त्यस्तत्र का परिवेदना ॥ यदेवमनुजा
तस्य धातारो विदधुः पुरा ॥ तदेवानुचरिष्यामि किं मे मृत्युः करिष्यति ॥ लब्धव्यान्येव लभते गंतव्यान्येव गच्छति ॥ प्राप्त
व्यान्येव प्राप्नोति दुःखानि च सुखानि च ॥ एतद्विदित्वा कार्त्स्न्येन यो न मुह्यति मानवः ॥ कुशली सर्वदुःखेषु स वै सर्व
धनो नरः ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ मग्नस्य व्यसने कृच्छ्रे किं श्रेयः पुरुषस्य हि ॥ बंधुनाशे म
हीपाल राज्यनाशेपि वा पुनः ॥ त्वं हि नः परमो वक्ता लोकेस्मिन्भरतर्षभ ॥ एतद्भवंतं पृच्छामि तन्मे त्वं वक्तुमर्हसि ॥
॥ ॥ भीष्मः ॥ ॥ पुत्रदारैः सुखैश्चैव वियुक्तस्य धनेन वा ॥ मग्नस्य व्यसने कृच्छ्रे धृतिः श्रेयस्करी नृप ॥ धैर्येण यु
क्तस्य सततं शरीरं न विशीर्यते ॥ विशोकता सुखं धत्ते धत्ते चारोग्यमुत्तमं ॥ आरोग्याच्च शरीरस्य स पुनर्विंदते श्रि
यं ॥ यश्च राज्ञो नरस्तात सात्विकीं वृत्तिमास्थितः ॥ तस्यैश्वर्यं च धैर्यं च व्यवसायश्च कर्मसु ॥ अत्रैवोदाहरंती
ममितिहासं पुरातनं ॥ बलिवासवसंवादं पुनरेव युधिष्ठिर ॥ वृत्ते देवासुरे युद्धे दैत्यदानवसंक्षये ॥ विष्णुक्रां
तेषु लोकेषु देवराजे शतक्रतौ ॥ इज्यमानेषु वेदेषु चातुर्वर्ण्ये व्यवस्थिते ॥ समृध्यमाने त्रैलोक्ये प्रीतियुक्ते स्व

यंभुवि ॥ रुद्रैर्वसुभिरादित्यैरश्विभ्यां च सुरर्षिभिः ॥ गंधर्वैर्भुजगेंद्रैश्च सिद्धैश्चान्यैर्वृतः प्रभुः ॥ चतुर्दंतं सुदंतं
च वारणेंद्रं श्रिया वृतं ॥ आरुह्यैरावणं शक्रस्त्रैलोक्यमनुसंययौ ॥ स कदाचित्समुद्रांते कस्मिंश्चिद्गिरिगह्वरे ॥
बलिं वैरोचनं वज्री ददर्शोपससर्प च ॥ तमैरावतमूर्द्धस्थं प्रेक्ष्य देवगणैर्वृतं ॥ सुरेंद्रमिंद्रं दैत्येंद्रो न शुशोच न
विव्यथे ॥ दृष्ट्वा तमविकारस्थं तिष्ठंतं निर्भयं बलिं ॥ अधिरूढो द्विपश्रेष्ठमित्युवाच शतक्रतुः ॥ दैत्य न व्यथसे शौ
र्यादथ वा वृद्धसेवया ॥ तपसा भावितत्वाद्वा सर्वथैतत्सुदुष्करं ॥ शत्रुभिर्वशमानीतो हीनः स्थानादनुत्तमात् ॥ वैरो
चने किमाश्रित्य शोचितव्ये न शोचसि ॥ श्रैष्ठ्यं प्राप्य स्वजातीनां महाभोगाननुत्तमान् ॥ हृतस्वबलराज्यस्त्वं ब्रूहि
कस्मान्न शोचसि ॥ ईश्वरो हि पुरा भूत्वा पितृपैतामहे पदे ॥ तत्त्वमद्य हृतं दृष्ट्वा सपत्नैः किं न शोचसि ॥ बद्धश्च वारु
णैः पाशैर्वज्रेणैव समाहतः ॥ हृतदारो हृतधनो ब्रूहि कस्मान्न शोचसि ॥ नष्टश्रीर्विभवोभ्रष्टो यन्न शोचसि दु
ष्करं ॥ त्रैलोक्यराज्यनाशे हि कोन्यो जीवितुमुत्सहेत् ॥ एतच्चान्यच्च परुषं ब्रुवंतं परिभूय तं ॥ श्रुत्वा सुखमसंभ्रां
तो बलिर्वैरोचनोब्रवीत् ॥ ॥ बलिरुवाच ॥ ॥ निगृहीतो मयि भृशं शक्र किं कथितेन ते ॥ वज्रमुद्यम्य तिष्ठंतं
पश्यामि त्वां पुरंदर ॥ अशक्तः पूर्वमासीस्त्वं कथंचिच्छक्ततां गतः ॥ कस्त्वदन्य इमां वाचं सुक्रूरां वक्तुमर्हसि

मोक्षधर्म॰

६१

व

यस्तु शत्रोर्वशस्थस्य शक्तोपि कुरुते दयां ॥ हस्तप्राप्तस्य वीरस्य तं चैव पुरुषं विदुः ॥ अनिश्चयो हि युद्धेषु द्व
योर्विवदमानयोः ॥ एकः प्राप्नोति विजयमेकश्चैव पराजयं ॥ मा च ते भूत्स्वभावोयमिति दैवतपुंगव ॥ ईश्वरः
सर्वभूतानां विक्रमेणाजितो बलात् ॥ नैतदस्मात्कृतं शक्र नैतच्छक्र कृतं त्वया ॥ यत्त्वमेवंगतो वज्रिन् यद्वाप्येवंग
तावयं ॥ अहमासं यथाद्य त्वं भविता त्वं यथा वयं ॥ मावमंस्था मया कर्म दुष्कृतं कृतमित्युत ॥ सुखदुःखे हि पु
रुषः पर्यायेणाधिगच्छति ॥ पर्यायेणासि शक्रत्वं प्राप्तः प्राक्तनकर्मणा ॥ कालः कालेन नयति मां त्वं च कालो
नयत्ययं ॥ तेनाहं त्वं यथा नाद्य त्वं चापि न यथा वयं ॥ न मातृपितृशुश्रूषा न च दैवतपूजनं ॥ नान्यो गुणःस
माचारः पुरुषस्य सुखावहः ॥ न विद्या तपो दानं न मित्राणि न बांधवाः ॥ शक्नुवंति परित्रातुं नराः कालेन पीडि
तं ॥ नागामिनमनर्थं हि प्रतिघातशतैरपि ॥ शक्नुवंति प्रतिव्योढुमृते बुद्धिबलान्नराः ॥ पर्यायैर्हन्यमानानामभी
परित्राता न विद्यते ॥ इदं तु दुःखं यच्छक्र कर्त्ताहमिति मन्यते ॥ यदि कर्त्ता भवेत्कर्त्ता न क्रियेत कदाचन ॥ य
स्मात्तु क्रियते कर्त्ता तस्मात्कर्त्ताप्यनीश्वरः ॥ कालेन त्वाहमजयं कालेनाहं जितस्त्वया ॥ गंता गतिमतां कालः
कालः कलयति प्रजाः ॥ इंद्र प्राक्तनया बुध्या प्रलपं नावबुध्यसे ॥ कदाचित्त्वां बहु मन्यंते श्रैष्ठ्यं प्राप्तं स्वक

६१

णा ॥ कथमस्मद्विधो नाम ज्ञानन् लोकप्रवृत्तयः ॥ कालेनाभ्याहतः शौचेन्मुह्येद्वाप्यथ विभ्रमेत् ॥ नित्यं काल
कालपरीतस्य मम स वा मद्विधस्य वा ॥ बुद्धिर्व्यसनमासाद्य भिन्ना नौरिव सीदति ॥ अहं च त्वं च ये चान्ये भविष्यंति
सुराधिपाः ॥ ते सर्वे शक्र यास्यंति मार्गमिंद्र शतैर्गतं ॥ त्वामप्येवं सुदुर्द्धर्षं ज्वलंतं परया श्रिया ॥ काले परिपाते
कालः कालयिष्यति मामिव ॥ बहूनींद्रसहस्राणि देवतानां युगे युगे ॥ अभ्यतीतानि कालेन कालो हि दुरतिक्र
मः ॥ इदं तु लब्ध्वा संस्थानमात्मानं बहु मन्यसे ॥ सर्वभूतभवं देवं ब्रह्मणामिव शाश्वतं ॥ न वेदमचलं स्थान
मनंतं वापि कस्यचित् ॥ त्वं तु बालिशया बुध्या ममेदमिति मन्यसे ॥ अविश्वस्ते विश्वसिषि मन्यसे वाध्रुवे ध्रु
वं ॥ नित्यं कालपरीतात्मा भवत्येवं सुरेश्वर ॥ ममेयमिति मोहात्वं राजश्रियमभीप्ससि ॥ नेयं तव न चास्मा
कं न चान्येषां स्थिरा सदा ॥ अतिक्रम्य बहूनन्यांस्त्वयि तावदियं गता ॥ कंचित्कालमियं स्थित्वा त्वयि वासव
चंचला ॥ गौर्निवासमिवोत्सृज्य पुनरन्यं गमिष्यति ॥ राजलोका ह्यतिक्रांता यान्न संख्यातुमुत्सहे ॥ त्वत्तो ब
हुतराश्चान्ये भविष्यंति पुरंदर ॥ सवृक्षौषधिरत्नेयं ससरित्पर्वताकरा ॥ तानीदानीं न पश्यामि यैर्भुक्तेयं पु
रा मही ॥ पृथुरैलो मयो भीमो नरकः शंबरस्तथा ॥ अश्वग्रीवः पुलोमा च स्वर्भानुरमितध्वजः ॥ प्रह्लादो न
मुचिर्दक्षो विप्रचित्तिर्विरोचनः ॥ ह्रीनिषेवः सुहोत्रश्च भूरिहा पुष्पवान्वृषः ॥ सत्येषुर्ऋषभो बाहुः कपि

लाश्चैव विरूपकः ॥ बाणः कार्त्तस्वरो वह्निर्विश्वदंष्ट्रोथ नैरृतिः ॥ संकोचोथ वरीताक्षो वराहाश्वो रुचिप्रभः ॥ विश्वजित्प्रति
रूपश्च वृषांडो विष्करो मधुः ॥ हिरण्यकशिपुश्चैव कैटभश्चैव दानवः ॥ दैतेया दानवाश्चैव सर्वे ते नैरृतैः सह ॥ एते चा
न्ये च बहवः पूर्वे पूर्वतराश्च ये ॥ दैत्येंद्रा दानवेंद्राश्च यांश्चान्याननुशुश्रुम ॥ बहवः पूर्वदैत्येंद्राः संत्यज्य पृथिवीं गताः ॥ का
लेनाभ्याहताः सर्वे कालो हि बलवत्तरः ॥ सर्वैः क्रतुशतैरिष्टं न त्वमेकः शतक्रतुः ॥ सर्वे धर्मपराश्चासन् सर्वे सततस
त्रिणः ॥ अंतरिक्षचराः सर्वे सर्वेभिमुखयोधिनः ॥ सर्वे संहननोपेताः सर्वे परिघबाहवः ॥ सर्वे मायाशतधराः सर्वे ते का
मरूपिणः ॥ सर्वे समरमासाद्य न श्रूयंते पराजिताः ॥ सर्वे सत्यव्रतधराः सर्वे कामविहारिणः ॥ सर्वे वेदव्रतपराः सर्वे चैव बहुश्रु
ताः ॥ सर्वे संहतमैश्वर्यमीश्वराः प्रतिपेदिरे ॥ न चैश्वर्यमदस्तेषां भूतपूर्वो महात्मनां ॥ सर्वे यथार्हदातारः सर्वे विगतमत्स
राः ॥ सर्वे सर्वेषु भूतेषु यथावत्प्रतिपेदिरे ॥ सर्वे दाक्षायणीपुत्राः प्राजापत्या महाबलाः ॥ ज्वलंतः प्रतपंतश्च कालेन प्रतिसं
हृताः ॥ त्वं चैवेमां यथा भुक्त्वा पृथिवीं त्यक्ष्यसे पुनः ॥ न शक्ष्यसि तदा शक्र नियंतुं लोकमात्मनः ॥ मुंचेच्छां कामभोगेषु मुं
चेमं श्रीभवं मदं ॥ एवं स्वराज्यनाशे त्वं शोकं संप्रसहिष्यसि ॥ शोककाले शुचो मा त्वं हर्षकाले च मा हृषः ॥ अतीतानागतं हि
त्वा प्रत्युत्पन्नेन वर्तय ॥ मां चेदभ्यागतः कालः सदा युक्तमतंद्रितः ॥ क्षमस्व नचिरादिंद्र त्वामप्युपगमिष्यति ॥ त्रासयन्निव
देवेंद्र वाग्भिस्तक्ष्यसि मामिह ॥ संयते मयि नूनं त्वमात्मानं बहु मन्यसे ॥ कालः प्रथममायान्मां पश्चात्त्वामनुधावति ॥

तेन गर्जसि देवेंद्र पूर्वं कालहते मयि ॥ को हि स्थातुमलं लोके मम क्रुद्धस्य संयुगे ॥ कालस्तु बलवान् प्राप्तस्तेन तिष्ठसि वास
व ॥ यत्तद्वर्षसहस्रांतं पूर्णं भवितुमर्हति ॥ यथा मे सर्वगात्राणि न स्वस्थानि महौजसः ॥ अहमैंद्राच्च्युतः स्थानात्त्वमिंद्रः प्र
कृतो दिवि ॥ सुचित्रे जीवलोकेस्मिन्नुपास्यः कालपर्ययात् ॥ किं हि कृत्वा त्वमिंद्रोद्य किं वा कृत्वा वयं च्युताः ॥ कालः कर्ता
विकर्ता च सर्वमन्यदकारणं ॥ नाशं विनाशमैश्वर्यं सुखं दुःखं भवाभवौ ॥ विद्वान् प्राप्यैव मत्यर्थं न प्रहृष्येन्न च व्यथेत् ॥ त्व
मेव हींद्र वेत्थास्मान्वेदाहं त्वां च वासव ॥ किं कत्थसे मां किं च त्वं कालेन निरपत्रप ॥ त्वमेव हि पुरा वेत्थ यत्तदा पौरुषं मम ॥
समरेषु च विक्रांतं पर्याप्तं तन्निदर्शनं ॥ आदित्याश्चैव रुद्राश्च साध्याश्च वसुभिः सह ॥ मया विनिर्जिताः सर्वे मरुतश्च
शचीपते ॥ त्वमेव शक्र जानासि देवासुरसमागमे ॥ समेता विबुधा भग्नास्तरसा समरे मया ॥ पर्वताश्चासकृत्क्षि
प्ताः सवनाः सवनौकसः ॥ सटंकशिखरा भग्नाः समरे मूर्ध्नि ते मया ॥ किं नु शक्यं मया कर्तुं कालो हि दुरतिक्रमः ॥ न
हि त्वां नोत्सहे हंतुं सवज्रमपि मुष्टिना ॥ न तु विक्रमकालोयं क्षमाकालोयमागतः ॥ तेन त्वां मर्षये शक्र दुर्मर्षणा
तरस्त्वया ॥ तं मां परिणते काले परीतं कालवह्निना ॥ नियतं कालपाशेन बद्धं शक्र विकत्थसे ॥ अयं स पुरुष
श्यामो लोकस्य दुरतिक्रमः ॥ बध्वा तिष्ठति मां रौद्रः पशुं रशनया यथा ॥ लाभालाभौ सुखं दुःखं कामक्रोधौ भ
वाभवौ ॥ वधबंधप्रमोक्षाश्च सर्वं कालेन लभ्यते ॥ नाहं कर्ता न कर्ता त्वं कर्ता यस्तु सदा प्रभुः ॥ सोयं पचति

कालो मां वक्ष्ये फलमिवागतं ॥ यासेष पुरुषः कुर्वन् सुखैः कालेन युज्यते ॥ पुनस्तान्येव कुर्वाणो दुःखैः कालेन युज्य
ते ॥ न च कालेन कालज्ञ स्पृष्टः शोचितुमर्हति ॥ तेन शक्र न शोचामि नास्ति शोके सहायता ॥ यदा हि शोचतः
कालो व्यसनं नापकर्षति ॥ सामर्थ्यं च ततो नास्ती स्यतोहं नाद्य शोचिमि ॥ एवमुक्तः सहस्राक्षो भगवान् पाकशा
सनः ॥ प्रतिसंहृत्य संरंभमित्युवाच शतक्रतुः ॥ सवज्रमुद्यतं बाहुं दृष्ट्वा पाशांश्च वारुणान् ॥ कस्येह न व्यथे
बुद्धिर्मृत्योरपि जिघांसतः ॥ सा ते न व्यथते बुद्धिरचला तत्वदर्शिनी ॥ ध्रुवं न व्यथसे धृतत्वे धैर्यात्सत्य पथेना
क्रमः ॥ को हि विश्वासमर्थेषु शरीरे वा शरीरभृत् ॥ कर्तुमुत्सहते लोके दृष्ट्वा संप्रस्थितं जगत् ॥ अहमप्ये
वमेवैनं लोकं जानाम्यशाश्वतं ॥ कालाग्नावाहितं घोरे गुह्ये सततगे क्षरे ॥ न चात्र परिहारोस्ति काल
स्पृष्टस्य कस्यचित् ॥ सूक्ष्माणां महतां चैव भूतानां परिपच्यतां ॥ अनीशस्य प्रमत्तस्य भूतानि पचतः स
दा ॥ अनिवृत्तस्य कालस्य क्षयं प्राप्तो न मुच्यते ॥ अप्रमत्तः प्रमत्तेषु कालो जागर्ति देहिषु ॥ प्रयत्नेनाप्यप
क्रांतो दृष्टपूर्वो न केनचित् ॥ पुराणः शाश्वतो धर्मः सर्वप्राणभृतां समः ॥ कालो न परिहार्यश्च न चास्यास्ति
व्यतिक्रमः ॥ अहोरात्रांश्च मासांश्च क्षणान्काष्ठा लवान्कलाः ॥ संपिंडयति यः कालो वृद्धिं वार्धुषिको यथा ॥

इदमद्य करिष्यामि श्वः कर्तास्मीति वादिनं ॥ कालो हरति संप्राप्तो नदीवेग इवोडुपं ॥ इदानीं तावदेवासौ मया दृष्टः कथं
मृतः ॥ इति कालेन ह्रियतां प्रलापः श्रूयते नृणां ॥ नश्यंत्यर्थास्तथा भोगाः स्थानमैश्वर्यमेव वा ॥ जीवितं जीवलोकस्य का
लेनागम्य नीयते ॥ उच्छ्राया विनिपातांता भावोभावः स एव च ॥ अनित्यमध्रुवं सर्वं व्यवसायो हि दुष्करः ॥ सा ते न व्यथते बुद्धि
रचला तत्वदर्शिनी ॥ अहमासं पुरावेति मनसापि न बुध्यसे ॥ कालेनाक्रम्य लोकेस्मिन् पच्यमानो बलीयसा ॥ अज्येष्ठमक
निष्ठं च क्षिप्यमाणो न बुध्यसे ॥ ईर्ष्याभिमानलोभेषु कामक्रोधभयेषु च ॥ स्पृहामोहाभिमानेषु लोकः सक्तो विमुह्यति
॥ भवांस्तु भावतत्वज्ञो विद्वाज्ञानतपोचितः ॥ कालं पश्यति सुव्यक्तं पाणावामलकं यथा ॥ कालचारित्रतत्वज्ञः सर्वशास्त्र
विशारदः ॥ क्षितौ च नेकृतात्मासि स्पृहणीयो विजानतां ॥ सर्वलोकोह्ययं मन्ये बुद्ध्या परिगतस्त्वया ॥ विहरन्सर्वतो मुक्तो
न क्वचित्परिसज्जते ॥ रजश्च हि तमश्च त्वां स्पृशतो न जितेंद्रियं ॥ निष्प्रीतिं नष्टसंतापमात्मानं त्वमुपाससे ॥ सुहृदं सर्व
भूतानां निर्वैरं शांतमानसं ॥ दृष्ट्वा त्वां मम संजाता त्वय्यनुक्रोशिनी मतिः ॥ नाहमेतादृशं बुद्धं हंतुमिच्छामि बंधने ॥ आनृ
शंस्यं परो धर्मो ह्यनुक्रोशश्च मे त्वयि ॥ मोक्ष्यंते वारुणाः पाशास्तवेमे कार्यपर्ययात् ॥ प्रजानामपचारेण स्वस्ति तेस्तु
महासुर ॥ यदा श्वश्रूं स्नुषा वृद्धां परिचारेण योक्ष्यते ॥ पुत्रश्च पितरं मोहात्प्रेषयिष्यति कर्मसु ॥ ब्राह्मणैः कारयिष्यं
ति वृषलाः पादधावनं ॥ शूद्राश्च ब्राह्मणीं भार्यामुपयास्यंति निर्भयाः ॥ वियोनिषु विमोक्ष्यंति बीजानि पुरुषा यदा ॥ स

कनंकांस्यभांडैश्च वलिचैवकुपार्जितैः॥ चातुर्वर्ण्यं यदा कृत्स्नमुन्मर्यादं भविष्यति॥ एकैकस्ते तदा पाशाः क्रमशः परिमोक्ष्यते॥ अस्मत्तस्ते भयं नास्ति समयं प्रतिपालय॥ सुखी भव निराबाधः सुस्थचेता निरामयः॥ तमेवमुक्त्वा भगवाञ्छतक्रतुः प्रतीतिमान् यातो गजराजवाहनः॥ विजित्य सर्वानसुराधिपो ननंद हर्षेण बभूव चैकराट्॥ महर्षयस्तत्तुष्टुवुरंजसा च तं वृषकेपिं सचराचरेश्वरं॥ हिमापहो हव्यमुवाह चाध्वरे तथामृतं चार्पितमीश्वरोपि हि॥ द्विजोत्तमैः सर्वगतैरभिष्टुतो विदीप्ततेजा गतमन्युरीश्वरः॥ प्रशांतचेता मुदितः स्वमालयं त्रिविष्टपं प्राप्य मुमोद वासवः॥ ॥इति शांते मोक्षधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥पूर्वरूपाणि मे राजन् पुरुषस्य भविष्यतः॥ पराभविष्यतश्चैव तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥मन एव मनुष्यस्य पूर्वरूपाणि शंसति॥ भविष्यतश्च भद्रं ते तथैव न भविष्यतः॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ श्रियाशक्रस्य संवादं तन्निबोध युधिष्ठिर॥ महतस्तपसो व्युष्ट्या पश्यंल्लोकौ परावरौ॥ सामान्यमृषिभिर्गत्वा ब्रह्मलोकनिवासिभिः॥ ब्रह्मेवामितदीप्तौजाः शांतपाप्मा महातपाः॥ विचचार यथाकामं त्रिषु लोकेषु नारदः॥ कदाचित्प्रातरुत्थाय पिस्पृक्षुः सलिलं शुचिः॥ ध्रुवद्वारवहां गंगां जगामावततार च॥ सहस्रनयनश्चापि वज्री शंबरपाकहा॥ तस्या देवर्षिजुष्टायास्तीरमभ्याजगाम ह॥ तावाप्लुत्य यतात्मानौ कृतजप्यौ समासतः॥ नद्याः पुलिनमासाद्य सूक्ष्मकांचनवालुकं॥ पुण्यकर्मभिराख्याता देवर्षिकथिताः कथाः॥ चक्रतुस्तौ तथासीनौ महर्षिकथितास्तथा॥ पूर्ववृत्तव्यपेतानि कथयंतौ स

माहितौ॥ अथ भास्करमुद्यंतं रश्मिजालपुरस्कृतं॥ पूर्णमंडलमालोक्य तावुत्थायोपतस्थतुः॥ अभितस्तूदयंतं तमर्कमर्कमिवापरं॥ आकाशे ददृशे ज्योतिरुद्यतार्चिःसमप्रभं॥ तयोः समीपं संप्राप्तं प्रत्यदृश्यत भारत॥ तत्सुपर्णार्कचरितमास्थितं वैष्णवं पदं॥ भाभिरप्रतिमं भाति त्रैलोक्यमवभासयत्॥ दिव्याभिरूपशोभाभिरप्सरोभिः पुरस्कृतं॥ बृहतीमंशुमत्प्रख्यां बृहद्भानोरिवार्चिषं॥ नक्षत्रकल्पाभरणां ताराभक्तिसमस्रजं॥ श्रियं ददृशतुः पद्मां साक्षात्पद्मदलस्थितां॥ सावरुह्य विमानाग्र्यादंगनानामनुत्तमा॥ अभ्यागच्छत्त्रिलोकेशं देवर्षिं चापि नारदं॥ नारदानुगतः साक्षान्मघवानामुपागमत्॥ कृतांजलिपुटो देवीं निवेद्यात्मानमात्मना॥ चक्रे चानुत्तमां पूजां तस्याश्चापि स सर्ववित्॥ देवराजः श्रियं राजन् वाक्यं चेदमुवाच ह॥ ॥शक्र उवाच॥ ॥का त्वं केन च कार्येण संप्राप्ता चारुहासिनी॥ कुतश्चागम्य सुभ्रु तां त्वं व्रज च ते शुभे॥ ॥श्रीरुवाच॥ ॥पुण्येषु त्रिषु लोकेषु सर्वे स्थावरजंगमाः॥ ममात्मभावमिच्छंतो यतंते परमात्मना॥ साहं वै पंकजे जाता सूर्यरश्मिविबोधिते॥ भूत्यर्थं सर्वभूतानां पद्मा श्री पद्ममालिनी॥ अहं लक्ष्मीरहं भूतिः श्रीश्चाहं बलसूदन॥ अहं श्रद्धा च मेधा च संनतिर्विजितिः स्थितिः॥ अहं धृतिरहं सिद्धिरहं त्वद्भूतिरेव च॥ अहं स्वाहा स्वधा चैव संनतिर्नियतिः स्मृतिः॥ राज्ञां विजयमानानां सेनाग्रेषु ध्वजेषु च॥ निवासे धर्मशीलानां विषयेषु पुरेषु च॥ जितकाशिनि शूरे च संग्रामेष्वनिवर्तिनि॥ निवसामि मनुष्येंद्रे सदैव बलसूदन॥ धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि॥ प्रश्रिते दा

नशीलेच सदैव निवसाम्यहं॥असुरेष्ववसं पूर्वं सत्यधर्मनिबंधना॥विपरीतांस्तु तान्बुध्वा त्वयिवासमरोचयं॥ ॥
शक्रउवाच॥ ॥कथंवृत्तेषु दैत्येषु त्वमवासीर्वरानने॥दृष्ट्वाच किमिहागास्त्वं हित्वादैतेयदानवान्॥ ॥श्रीरुवाच॥ ॥
स्वधर्ममनुतिष्ठत्सु धैर्यादचलितेषु च॥स्वर्गमार्गाभिरामेषु सत्वेषु निरताह्यहं॥दानाध्ययनयज्ञेषु पितृदेवतपूज
नं॥गुरूणामतिथीनांचतेषां नित्यमवर्तत॥सुसंमृष्टगृहाश्चासन्जितस्त्रीका हुताग्नयः॥गुरुशुश्रूषका दांता ब्र
ह्मण्याः सत्यवादिनः॥श्रद्दधाना जितक्रोधा दानशीलानसूयवः॥भृतपुत्रा भृतामात्या भृतदाराह्यनीर्षवः॥अ
मर्षणा नचान्योन्यं स्पृहयंते कदाचन॥न चजातूपतप्यंते धीराः परसमृद्धिभिः॥दातारः संगृंतारः कार्यकामप ही
वेदिनः॥महाप्रसादऋजवो दृढभक्ता जितेंद्रियाः॥संतुष्टभृत्यसचिवाः कृतज्ञाः प्रियवादिनः॥यथार्हमानार्थकराह्री
निषेधा यतव्रताः॥नित्यं पर्वसु सुस्नातास्त्वनुलिप्ताः स्वलंकृताः॥उपवासतपःशीला प्रतीतब्रह्मवादिनः॥नैतानभ्युदि
यात्सूर्यो न चाप्यासन्प्रगेशयाः॥रात्रौ दधि च सक्तूंश्च नित्यमेव व्यवर्जयन्॥कल्ये घृतं चान्ववेक्ष्यन्प्रयाताः ब्रह्मवादिनः॥
मंगल्यान्यपि चापश्यद्ब्राह्मणांश्चाप्यपूजयन्॥सदाहि वदतां धर्मं सदा चाप्रतिगृह्णतां॥अर्धं च रात्र्याः स्वपतां दिवाचा
स्वपतां तथा॥कृपणानाथवृद्धानां दुर्बलातुरयोषितां॥दयां च संविभागं च नित्यमेवानुमोदतां॥त्रस्तं विषण्णमुद्विग्नं भ
यार्तं व्याधितं कृशं॥हृतस्वं व्यसनार्तं च नित्यमाश्वासयंति ते॥धर्ममेवान्ववर्त्तंत न हिंसंति परस्परं॥अनुकूलाश्च

कार्येषुगुरुवृद्धोपसेविनः॥पितृदेवातिथींश्चैव यथावत्तेभ्यपूजयन्॥अवशेषाणि चाश्नंति नित्यं सत्यतपोधृताः॥नैको
श्नंति सुसंपन्नं नागच्छंत परस्त्रियं॥सर्वभूतेषुवर्त्तंत यथात्मनि दयां प्रति॥नैवाकाशे पशुषु नायोनौ न च पर्वसु॥इंद्रि
यस्य विसर्गं ते रोचयंति कदाचन॥नित्यं दानं तथा दाक्ष्यमार्जवं चैव नित्यदा॥उत्साहोथानहंकारः परमं सौहृदं क्षमा॥
सत्यं दानं ततः शौचं कारुण्यं वागनिष्ठुरा॥मित्रेचानभिद्रोहः सर्वं तेष्वभवत्प्रभो॥निद्रा तंद्रीरसंप्रीतिरसूया चानवेक्षि
ता॥अरतिश्चो विषादश्च स्पृहा चाप्य विषण्यातां॥साहमेवंगुणेष्वेव दानवेष्ववसं पुरा॥प्रजासर्गमुपादाय नैकं यु
गविपर्ययं॥ततः कालविपर्यासे तेषां गुणविपर्ययात्॥अपश्यं निर्गतं धर्मं कामक्रोधवशात्मनां॥सभासदां च वृ
द्धानां सतां कथयतां कथाः॥प्राहसन्नभ्यसूयंश्च सर्ववृद्धान्गुणावराः॥युवानश्च समासीना वृद्धानपि गतान्सतः॥नाभ्यु
त्थानाभिवादांश्च यथापूर्वमपूजयन्॥वर्त्तयंत्येव पितरि पुत्राः प्रभवतेतथा॥अमित्रभृत्यतां प्राप्य ख्यापयंतोनपत्रपाः॥
तथा धर्मादपेतेन कर्मणा गर्हितेन ये॥महतः प्राप्नुवंत्यर्थांस्तेषां तत्राभवत्स्पृहा॥उच्चैश्चाप्यवदन्रात्रौ नीचैस्तत्राग्नि
रज्वलत्॥पुत्राः पितॄनत्यचरन्नार्यश्चात्यचरन्पतीन्॥मातरं पितरं वृद्धमाचार्यमतिथिं गुरुं॥गुरुत्वान्नाभ्यनंदंत कुमा
रान्नान्वपालयन्॥भिक्षां बलिमदत्वा च स्वयमन्नानि भुंजते॥अनिष्ट्वा संविभज्याथ पितृदेवातिथीन्गुरून्॥न शौचम
नुरुध्यंत तेषां सूदजनास्तथा॥मनसा कर्मणा वाचा भक्तमासीदनाहतं॥विप्रकीर्णानि धान्यानि काकमूषिकभोजनं॥इ

थो पकरणं सर्वं नावेक्षंते कुटुंबिनी ।।प्राकारागारविध्वंसान्न स्मते प्रतिकुर्वते ।।नाद्रियंते पशून्बद्ध्वा यवसेनोदकेन च
।।बालानां प्रेक्ष्यमाणानां स्वयं भक्ष्यमभक्षयन् ।।तथाप्र स्वजनं सर्वमसंतर्प्य च दानवाः ।।पायसं कृशरं मांसम
पूपानथ शष्कुली ।।अपाचयन्नात्मनोर्थे वृथामांसान्यभक्षयन् ।।उत्सूर्यशायिनश्चासन्सर्वे चासन्प्रगेनिशाः ।।आव
र्तंकलहाश्चात्र न दिवा रात्रंगृहे गृहे ।।अनार्याश्चार्यमासीनं पर्युपासंत तत्र ह ।।आश्रमस्थान्विधर्मस्थाः प्राद्विषंत पर
स्परं ।।संकराश्चाभ्यवर्त्तंत न च शौचमकुर्वत ।।ये च वेदविदो विप्रा विस्पष्टमनृचश्च ये ।।निरंतरविशेषास्ते बहुमानावमा
नयोः ।।भावमारणांवेषंगतं स्थितमवेक्षितं ।।आसेवंत भुजिष्यावै दुर्जनाचरितं विधिं ।।स्त्रियः पुरुषवेषेण पुंसः स्त्री
वेषधारिणः ।।क्रीडारतिविहारेषु परांमुदमवाप्नुवन् ।।प्रभवद्भिः पुरादायानर्हेभ्यः प्रतिपादिता ।।नाभ्यवर्त्तंत नास्ति
क्यात्रवर्त्तंति संभवेष्वपि ।।मित्रेणाभ्यर्थितं मित्रमर्था संश्रयते क्वचित् ।।बालकोट्यग्रमात्रेण स्वार्थेनाघ्नंत तद्वसु ।।
परस्वादानरुचयो विपण्यव्यवहारिणः ।।अहृश्यन्नार्यवर्णेषु शूद्राश्चापि तपोधनाः ।।अधीयंतेऽब्रताः केचिद्वृथा
व्रतमथाचरन् ।।अशुश्रूषुर्गुरोः शिष्यः कश्चिच्छिष्यसखो गुरुः ।।पिता चैव जनित्री च श्रांतौ वृत्तोत्सवाविव ।।अप्रभु
त्वे स्थितौ वृद्धावन्नं प्रार्थयतेः सुतान् ।।तत्र वेदविदः प्राज्ञा गांभीर्ये सागरोपमाः ।।कृष्यादिष्वभवन्सक्ता मूर्खाः श्राद्धा
न्यभुंजत ।।प्रातः प्रातश्च सुप्रश्नं कल्पनं प्रेषणक्रिया ।।शिष्यानुप्रहितास्तेषामकुर्वन्गुरवः स्वयं ।।श्वश्रूश्वशुरयो

रग्रेव धृष्टप्रेष्यानशासत ।।अन्वशासच्च भर्त्तारं समाह्वायाभिजल्पति ।।प्रयत्नादपि चारक्षच्चित्तं पुत्रस्य वै पिता ।।
व्यभजंश्चापि संरंभाद्दुःखवासांस्तथावसत् ।।अग्निदाहेन चौरैर्वा राजभिर्वा हृतं धनं ।।दृष्ट्वा द्वेषात्प्राहसंत सुहृत्सं
भाविता ह्यपिकृतघ्ना नास्तिकाः पापा गुरुदाराभिमर्षिणः ।।अभक्ष्यभक्षणरता निर्मर्यादा हतत्विषः ।।तेष्वेवमादीना
चारस्तु विपर्यये ।।नाहं देवेंद्र वत्स्यामि दानवेष्विति मे मतिः ।।तन्मां स्वयमनुप्राप्तामभिनंद शचीपते ।।त्वयार्चि
तां मां देवेश पुरो धास्यंति देवताः ।।यत्राहं तत्र मत्कांता मद्विशिष्टा मदर्पणाः ।।सप्त देव्यो जयाष्टम्यो वासमेष्यंति तेष्टधा ।।
आशा श्रद्धा धृतिः क्षांतिर्विजितिः सन्नतिः क्षमा ।।अष्टमी वृत्तिरेतासां पुरोगाः पाकशासन ।।ताश्चाहं चासुरांस्त्यक्त्वा यु
ष्मद्विषयमागताः ।।त्रिदशेषु निवत्स्यामो धर्मनिष्ठांतरात्मसु ।।इत्युक्तवचनां देवीं प्रीत्यर्थं च ननंदतुः ।।नारदश्चा
त्र देवर्षिर्वृत्रहंता च वासवः ।।ततोऽनलसखो वायुः प्रववौ देववेश्मसु ।।इष्टगंधः सुखस्पर्शः सर्वेंद्रियसुखावहः ।।
शुचौ चाभ्यर्थिते देशे त्रिदशाः प्रायशः स्थिताः ।।लक्ष्मीसहितमासीनं मघवंतं दिदृक्षवः ।।ततो दिवं प्राप्य सहस्रलो
चनः श्रियोपपन्नः सुहृदाम हर्षिणा ।।रथेन हर्यश्वयुजा सुरर्षभः सदुःसुराणामभिसत्कृतो ययौ ।।अथेंगितं वज्र
धरस्य नारदः श्रिया च देव्या मनसा विचारयन् ।।श्रियै शशंसामरहृष्टपौरुषः शिवेन तत्रागमनं महर्षिभिः ।।ततो मृतं
द्यौः प्रववर्ष भास्वती पितामहस्यायतने स्वयंभुकः ।।अनाहता दुंदुभयो थनेदिरे तथाप्रसंन्नाश्च दिशश्चकाशिरे ।।य

चा
थार्तुसस्ये पववर्ष वासवो न धर्ममार्गाद्वि चलत्कश्चन॥ अनेकरत्नाकरभूषणा च भूः सुघोषघोषा वसुवनौकसांलये॥
क्रियाभिरामा मनुजा मनस्विनो बभुः शुभे पुण्यकृतां पथि स्थिताः॥ नरामराः किंनरयक्षराक्षसाः समृद्धिमंतः सुम
नस्विनोभवन्॥ न जात्वकाले कुसुमं कुतः फलं पपात वृक्षात्पवनेरितादपि॥ रसप्रदाः कामदुहश्च धेनवो न दारुणा
वाक् विचचार कस्यचित्॥ इमां सपर्यां सह सर्वकामदैः श्रियाश्च शक्रप्रमुखैश्च दैवतैः॥ पठंति ये विप्रसभादःगताः
समृद्धकामाः श्रियमाप्नुवंति ते॥ त्वया कुरूणां वर यत्प्रचोदितं भवाभवस्येह परं निदर्शनं॥ तदद्य सर्वं परिकीर्ति
तं मया परीक्ष्य तत्त्वं परिगंतुमर्हसि॥ ॥ शांतौ मोक्षधर्मे॥ ॥ युधिष्ठिरः॥ ॥ किंशीलः किंसमाचारः किंविद्यः
किंपरायणः॥ प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवं॥ ॥ भीष्म उवाच॥ ॥ मोक्षधर्मेषु नियतो लघ्वाहारो जितें स
द्रियः॥ प्राप्नोति ब्रह्मणः स्थानं तत्परं प्रकृतेर्ध्रुवं॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ जैगीषव्यस्य संवादम
सितस्य च भारत॥ जैगीषव्यं महाप्राज्ञं धर्माणामागतागमं॥ अक्रुध्यंतमहृष्यंतमसितो देवलोब्रवीत्॥ ॥ देवल
उवाच॥ ॥ न प्रीयसे वंद्यमानो निंद्यमानो न कुप्यसे॥ का ते प्रज्ञा कुतश्चैषा किं ते तस्याः परायणं॥ ॥ भीष्म उ
वाच॥ ॥ इति तेनानुयुक्तः सन् तमुवाच महातपाः॥ महद्वाक्यमसंदिग्धं पुष्कलार्थपदं शुचि॥ ॥ जैगीषव्य उ
वाच॥ ॥ या गतिर्या परा निष्ठा या शांतिः पुण्यकर्मिणां॥ तां तेहं संप्रवक्ष्यामि महतीमृषिसत्तम॥ निंदत्सु च स

मो नित्यं प्रशंसत्सु च देवल॥ निह्नुवंति च ये स्वेषां समयं सुकृतं च यत्॥ उक्ताश्च न विवक्षंति वक्तारमहिते हितं॥ प्र
तिहंतुं न चेच्छंति हंतारं वै मनीषिणः॥ नाप्राप्तमनुशोचंति प्राप्तकालानि कुर्वते॥ न चातीतानि शोचंति न चैव प्र
तिजानते॥ संप्राप्तायां च पूजायां कामादर्थेषु देवल॥ यथोपपत्तिं कुर्वंति शक्तिमंतः कृतव्रताः॥ पक्वविद्या महा
प्राज्ञा जितक्रोधा जितेंद्रियाः॥ मनसा कर्मणा वाचा नापराध्यंति कर्हिचित्॥ अनीर्षवो न चान्योन्यं विहिंसंति कदाच
न॥ न च जातूपतप्यंते धीराः परसमृद्धिभिः॥ निंदाप्रशंसे चात्यर्थं न वदंति परस्य ये॥ न च निंदाप्रशंसाभ्यां विक्रियं
ते कदाचन॥ सर्वतश्च प्रशांता ये सर्वभूतहिते रताः॥ न क्रुध्यंति न हृष्यंति नापराध्यंति कस्यचित्॥ विमुच्य हृद
यग्रंथिं चंक्रमंति यथासुखं॥ न येषां बांधवाः संति ये चान्येषां न बांधवाः॥ अमित्राश्च न संत्येषां ये वामित्रा न कस्य
चित्॥ य एवं कुर्वते मर्त्याः सुखं जीवंति सर्वदा॥ धर्ममेवानुरुध्यंते धर्मज्ञा द्विजसत्तम॥ ये ह्यतो विच्युता मार्गात्ते हृ
ष्यंत्युद्विजंति च॥ आस्थितस्तमहं मार्गमसूयिष्यामि कं कथं॥ निंद्यमानः प्रशस्तो वा हृष्येयं केन हेतुना॥ यद्यदि
च्छंति तत्तस्मादधिगच्छंतु मानवाः॥ न मे निंदाप्रशंसाभ्यां ह्रासवृद्धी भविष्यतः॥ अमृतस्येव संतृप्येदवमानस्यत
त्वमानस्य तवित्॥ विषस्येवोद्विजेन्नित्यं संमानस्य विचक्षणः॥ अवज्ञातः सुखं शेते इह चामुत्र चोभयं॥ विमुक्तः
सर्वदोषेभ्यो योवमंता स बध्यते॥ परां गतिं च ये केचित्प्रार्थयंति मनीषिणः॥ एतद्व्रतं समाहृत्य सुखमेधंति ते जनाः॥

सर्वतश्चसमाहृत्यक्रतून्सर्वाञ्जितेंद्रियः॥ प्राप्नोतिब्रह्मणःस्थानंयत्परंप्रकृतेर्ध्रुवं॥ नास्यदेवानगंधर्वानपिशाचा
नराक्षसाः॥ पदमन्ववरोहंतिप्राप्तस्यपरमांगतिं॥ ॥शांतौमोक्षधर्मे॥ ॥युधिष्ठिरउवाच॥ ॥प्रियःसर्वस्यलोक
स्यसर्वसत्वाभिनंदितः॥ गुणैःसर्वैरुपेतश्चकोन्वस्तिभुविमानवः॥ ॥भीष्मउवाच॥ ॥अत्रतेवर्तयिष्यामिपृच्छतो
भरतर्षभ॥ उग्रसेनस्यसंवादेनारदेकेशवस्यच॥ ॥उग्रसेनउवाच॥ ॥यस्यसंकल्पतेलोकोनारदस्यप्रकीर्त
ने॥ मन्येसगुणसंपन्नोब्रूहितन्ममपृच्छत॥ ॥वासुदेवउवाच॥ ॥कुकुराधिपयान्मन्येशृणुतन्मेविचक्षणः॥ ना
रदस्यगुणान्साधून्संक्षेपेणनराधिप॥ नचारित्रनिमित्तोस्याहंकारोदेहतापनः॥ अभिन्नश्रुतिचारित्रस्त
स्मात्सर्वत्रपूजितः॥ अरतिःक्रोधचापल्येभयंनैतानिनारदे॥ अदीर्घसूत्रःशूरश्चतस्मात्सर्वत्रपूजितः॥ उपा
स्योनारदोबाढंवाचिनास्यव्यतिक्रमः॥ कामतोयदिवालोभात्तस्मात्सर्वत्रपूजितः॥ अध्यात्मविधितत्वज्ञःक्षांतः
शक्तोजितेंद्रियः॥ ऋजुश्चसत्यवादीचतस्मात्सर्वत्रपूजितः॥ तेजसायशसाबुध्याज्ञानेनविनयेनच॥ जन्मनात
पसावृद्धस्तस्मात्सर्वत्रपूजितः॥ सुशीलःसुखसंवेशःसुभोजःस्वादरःशुचिः॥ सुवाक्यश्चाप्यनीर्षश्चतस्मा०
॥ कल्याणंकुरुतेबाढंपापमस्मिन्नविद्यते॥ नप्रीयतेपरानर्थैस्तस्मा०॥ वेदश्रुतिभिराख्यानैरर्थानभिजिगीष
ति॥ तितिक्षुरनवज्ञाततस्मा०॥ समत्वाच्चप्रियोनास्तिनाप्रियश्चकथंचन॥ मनोनुकूलवादीचतस्मा०॥ बहुश्रुत

श्चित्रकथःपंडितोलालसोशठः॥ अदीनोक्रोधनोलुब्धस्तस्मा०॥ नार्थेधनेवाकामेवाभूतपूर्वोस्यविग्रहः॥ दोषाश्चा
स्यसमुच्छिन्नास्त०॥ दृढभक्तिरनिंद्यात्माश्रुतवाननृशंसवान्॥ वीतसंमोहदोषश्चत०॥ असक्तःसर्वसंगेषुसक्ता
न्येवचलभ्यते॥ अदीर्घसंशयोवाग्मीत०॥ समाधिर्नास्यकामार्थेनात्मानंस्तौतिकर्हिचित्॥ अनिर्षुर्मृदुसंवाद
स्त०॥ लोकस्यविविधंवृत्तंप्रेक्ष्यतेचाप्यकुत्सयन्॥ संसर्गविद्याकुशलस्त०॥ नासूयत्यागमंकिंचित्स्वनयेनोप
जीवति॥ अवंध्यकालोवश्यात्मात०॥ कृतश्रमःकृतप्रज्ञोनचतृप्तःसमाधितः॥ नित्ययुक्तोप्रमत्तश्चत०॥ ना
पत्रपश्चयुक्तश्चनियुक्तःश्रेयसेपरे॥ अभेत्तापरगुह्यानांतस्मा०॥ नहृष्यत्यर्थलाभेषुनालाभेषुव्यथत्यपि॥
स्थिरबुद्धिरसक्तात्मात०॥ तंसर्वगुणसंपन्नंदक्षंशुचिमनामयं॥ कालज्ञंचप्रियज्ञंचकःप्रियंनःकरिष्यति॥ ॥
शांतौमोक्षधर्मे॥ ॥युधिष्ठिरउवाच॥ ॥आद्यंतंसर्वभूतानांज्ञातुमिच्छामिकौरव॥ ध्यानंकर्मचकालंचतथैवा
युर्युगेयुगे॥ लोकतत्वंचकार्त्स्न्येनभूतानामागतिंगतिं॥ सर्गश्चनिधनंचैवकुतएतत्प्रवर्तते॥ यदितेनुग्रहेबुद्धि
रस्मास्विहसतांवर॥ एतद्भवंतंपृच्छामितद्भवान्प्रब्रवीतुमे॥ पूर्वंहिकथितंश्रुत्वाभृगुभाषितमुत्तमं॥ भरद्वा
जस्यविप्रर्षेस्ततोमेबुद्धिरुत्तमा॥ जातापरमधर्मिष्ठादिव्यसंस्थानसंस्थिता॥ ततोभूयस्तुपृच्छामितद्भवान्व
क्तुमर्हति॥ अत्रतेवर्तयिष्यामिइतिहासंपुरातनं॥ जगौयद्भगवान्व्यासःपुत्रायपरिपृच्छते॥ अधीत्यवेदानखि

लान्सांगोपनिषदस्तथा॥ अन्विछन्नैष्टिकं कर्म धर्मं नैपुणदर्शनात्॥ कृष्णद्वैपायनं व्यासं पुत्रो वैय्यासिकिः शुकः॥ पप्रच्छ संदेहमिमं छिन्नधर्मार्थसंशयं॥ ॥शुक उवाच॥ ॥भूतग्रामस्य कर्त्तारं कालज्ञानेन निश्चितं॥ ब्राह्मणस्य च यत्कृत्यं तद्भवान्वक्तुमर्हति॥ ॥भीष्म उवाच॥ ॥तस्मै प्रोवाच तत्सर्वं पिता पुत्राय पृच्छते॥ अतीतानागते विद्वान्सर्वज्ञस्सर्वधर्मवित्॥ ॥व्यास उवाच॥ ॥अनाद्यंतमजं दिव्यमजरं ध्रुवमव्ययं॥ अप्रतर्क्यमविज्ञेयं ब्रह्माग्रे समवर्त्तत॥ काष्ठा निमेषा दश पंच चैव त्रिंशत्तु काष्ठा गणयेत्कलां तां॥ त्रिंशत्कलाश्चापि भवेन्मुहूर्त्तो भागः कलाया दशमश्च यः स्यात्॥ त्रिंशन्मुहूर्त्तं तु भवेदहश्च रात्रिश्च संख्या मुनिभिः प्रतीता॥ मासः स्मृतो रात्र्यहनी च त्रिंशत्संवत्सरो द्वादशमास उक्तः॥ संवत्सरं द्वे अयने वदंति संख्याविदो दक्षिणमुत्तरं च॥ अहोरात्रे विभजते सूर्यो मानुषलौकिके॥ रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः॥ पित्रे रात्र्यहनी मासः प्रविभागस्तयोः पुनः॥ शुक्लोहः कर्मचेष्टायां कृष्णः स्वप्नाय शर्वरी॥ दैवे रात्र्यहनी वर्षप्रविभागस्तयोः पुनः॥ अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनं॥ एते रात्र्यहनी पूर्वे कीर्त्तिते जीवलौकिके॥ तयोः संख्याय वर्षाग्रं ब्राह्मे वक्ष्याम्यहःक्षये॥ पृथक्संवत्सराग्राणि प्रवक्ष्याम्यनुपूर्वशः॥ कृते त्रेतायुगे चैव द्वापरे च कलौ तथा॥ चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगं॥ तस्य तावच्छती संख्या संध्यांशश्च तथाविधिः॥ इतरेषु ससंध्येषु ससंध्यांशेषु तत त्रिषु॥ एकापायेन

हीयंते सहस्राणि शतानि च॥ एतानि शाश्वतांल्लोकान्धारयंति सनातनान्॥ एतद्ब्रह्मविदां तात विदितं ब्रह्म शाश्वतं॥ चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे॥ नाधर्मेणागमः कश्चित्परस्तत्र प्रवर्त्तते॥ इतरेष्वागमाद्धर्मः पादशस्त्ववरोप्यते॥ चौर्यकानृतमायाभिरधर्मश्चोपचीयते॥ अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः॥ कृते त्रेतायुगे त्वेवं पादशो ह्रसते वयः॥ वेदवादाश्चानुयुगं ह्रसंतीति ह नः श्रुतं॥ आयूंषि चाशिषश्चैव वेदस्यैव च यत्फलं॥ अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे॥ अन्ये कलियुगे नृणां युगह्रासानुरूपतः॥ तपः परं कृतयुगे त्रेतायां ज्ञानमुत्तमं॥ द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे॥ एतां द्वादशसाहस्रीं युगाख्यां कवयो विदुः॥ सहस्रं परिपर्त्ततं ब्राह्मं दिवसमुच्यते॥ रात्रिमेतावती चैव तदादौ विश्वमीश्वरः॥ प्रलयेऽध्यात्ममाविश्य सुप्त्वा सोंते विबुध्यते॥ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः॥ रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः॥ प्रतिबुद्धो विकुरुते ब्रह्माक्षय्यं क्षपाक्षये॥ सृजते च महद्भूतं तस्माद्व्यक्तात्मकं मनः॥ ॥इति शांतौ मोक्षधर्मे॥ ॥व्यासशुकसंवादे॥ ॥व्यास उवाच॥ ॥ब्रह्म तेजोमयं शुक्रं यस्य सर्वमिदं जगत्॥ एकस्य ब्रह्मभूतस्य द्वयं स्थावरजंगमं॥ अहर्मुखे विबुद्धः सन्सृजते विद्यया जगत्॥ अग्र एव महद्भूतमाशु व्यक्तात्मकं मनः॥ अभिभूयेह चार्चिष्माद्व्यसृजत्सप्त मानसान्॥ दूरगं बहुधागामि प्रार्थनासंशयात्मकं॥ मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया॥ आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः॥ आकाशात्तु विकुर्वाणात्

सर्वगंधवहः शुचिः ॥ बलवाञ्जायते वायुस्तस्य स्पर्शो गुणो मतः ॥ वायोरपि विकुर्वाणाज्ज्योतिर्भवति भास्वरं ॥ रोचिष्णु
जायते शुक्लं तद्रूपगुणमुच्यते ॥ ज्योतिषोपि विकुर्वाणाद्भवंत्यापो रसात्मिकाः ॥ अद्भ्यो गंधस्ततो भूमिः पूर्वेषां सृ
ष्टिरुच्यते ॥ गुणाः पूर्वस्य पूर्वस्य प्राप्नुवंत्युत्तरोत्तरं ॥ तेषां यावद्यथा यच्च तत्तत्तावद्गुणं स्मृतं ॥ उपलभ्याप्सु चेद्गं
धं केचिद्ब्रूयुरनैपुणात् ॥ पृथिव्यामेव तं विद्यादपो वायोश्च संश्रितं ॥ एते सप्तविधास्ते नो नानावीर्याः पृथक्पृथ
क् ॥ नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥ ते समेत्य महात्मानं ह्यन्योन्यमभिसंश्रिताः ॥ शरीराश्रयं प्रा
प्तास्ततः पुरुष उच्यते ॥ शरीरं श्रयणाद्भवति मूर्तिमान्षोडशात्मकं ॥ तमाविशंति भूतानि महांति सह कर्मणा
॥ सर्वभूतानि चादाय तपसश्चरणाय हि ॥ आदिकर्ता स भूतानां तमेवाहुः प्रजापतिं ॥ स वै सृजति भूतानि स
स्थावराणि चराणि च ॥ ततः सृजति ब्रह्माणं देवर्षिपितृमानवान् ॥ लोकान्नदीः समुद्रांश्च दिशः शैलांश्च वनस्पती
न् ॥ नरकिंनररक्षांसि वयःपशुमृगोरगान् ॥ अव्ययं च व्ययं चैव द्वयं स्थावरजंगमं ॥ तेषां ये यानि कर्माणि
प्राक्सृष्ट्यां प्रतिपेदिरे ॥ तान्येव प्रतिपद्यंते सृज्यमानाः पुनः पुनः ॥ हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मे ऋतानृते ॥
तद्भाविताः प्रपद्यंते तस्मात्तत्तस्य रोचते ॥ महाभूतेषु नानात्वमिंद्रियार्थेषु मूर्तिषु ॥ विनियोगं च भूतानां धातैव

विदधात्सुता ॥ केचित्पुरुषकारं तु प्राहुः कर्मसु मानवाः ॥ दैवमित्यपरे विप्राः स्वभावं भूतचिंतकाः ॥ पौरुषं कर्म दै
वं च फलवृत्तिस्वभावतः ॥ त्रय एते पृथग्भूता अविवेकस्तु किंचन ॥ एवमेतच्च नैवं च न चोभे नानुभे न च ॥ कर्मस्था
विषमं ब्रूयुः सत्वस्थाः समदर्शिनः ॥ तपो निःश्रेयसं जंतोस्तस्य मूलं शमो दमः ॥ तेन सर्वानवाप्नोति यान्कामा
न्मनसेच्छति ॥ तपसा तदवाप्नोति यद्भूतं सृजते जगत् ॥ स तद्भूतश्च सर्वेषां भूतानां भवति प्रभुः ॥ ऋषयस्तपसा
वेदानध्यैष्यंत दिवानिशं ॥ अनादिनिधना विद्या वागुत्सृष्टा स्वयंभुवा ॥ ऋषीणां नामधेयानि याश्च वेदेषु
सृष्टयः ॥ नानारूपं च भूतानां कर्मणां च प्रवर्तनं ॥ वेदशब्देभ्य एवादौ निर्मिमीते स ईश्वरः ॥ नामधेयानि चर्षी
णां वर्णा वेदेषु सृष्टयः ॥ शर्वर्यंते प्रजातानि नामान्येभ्यो विदधात्यजः ॥ नामभेदास्तपःकर्मयज्ञाख्या लोकसि
द्धये ॥ आत्मसिद्धिस्तु वेदेषु प्रोच्यते दशभिः क्रमैः ॥ यदुक्तं वेदवादेषु गहनं वेददर्शिभिः ॥ तदंतेषु यथायुक्तं क
मयोगेन लक्ष्यते ॥ कर्मजोयं पृथग्भावो द्वंद्वयुक्तोपि देहिनः ॥ आत्मसिद्धिस्तु विज्ञानाज्जहाति प्रायशो बलात् ॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ॥ शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ आलंभयज्ञाः क्षत्राश्च
हविर्यज्ञा विशः स्मृताः ॥ परिचारयज्ञाः शूद्राश्च तपोयज्ञा द्विजातयः ॥ त्रेतायुगे विधिस्त्वेष यज्ञानां न कृते युगे ॥ द्वा

परे विप्लवं यांति पादशः कलियुगे तथा ॥ अप्रवृत्ता धर्मिणो मर्त्याः ऋक्सामानि यजूंषि च ॥ काम्याइष्टीः पृथग्दृष्टास्त
पड्भिस्तप एव च ॥ त्रेतायां तु समस्तास्ते प्रादुरासन्महाबलाः ॥ संयंतारः स्थावराणां जंगमानां च सर्वशः ॥ त्रेतायां
संहता वेदा यज्ञा वर्णाश्रमास्तथा ॥ संरोधादायुषस्त्वेते व्यस्यंते द्वापरे युगे ॥ दृश्यंते न च दृश्यंते वेदाः कलियुगे
खिलाः ॥ उत्सीदंते सयज्ञाश्च केवलाधर्मसेतवः ॥ कृते युगे यस्तु धर्मो ब्राह्मणेषु प्रदृश्यते ॥ आत्मवत्सु तपोवत्सु
श्रुतवत्सु प्रतिष्ठितः ॥ स धर्मः प्रेति संयोगं यथाधर्मं युगे युगे ॥ विक्रियंते स्वधर्मस्था वेदवादा यथागमं ॥ यथा वि
श्वानि भूतानि वृष्ट्या भूयांसि प्रावृषि ॥ सृज्यंते जंगमाख्यानि यथा धर्मे युगे युगे ॥ यथर्त्तावृतुलिंगानि नानारूपा
णि पर्यये ॥ दृश्यंते तानि तान्येव तथा ब्रह्माहरादिषु ॥ विहितं कालनानात्वमनादिनिधनं तथा ॥ कीर्तितं तत्पु
रस्तात्ते तत्सूते चात्ति च प्रजाः ॥ एतद्धि प्रभवस्थानं भूतानां संयमो यमः ॥ स्वभावेनैव वर्तंते द्वंद्वयुक्तानि भूरिशः
॥ सर्वकालक्रियावेदाः कर्ता कार्यं क्रियाफलं ॥ प्रोक्तं ते पुत्र सर्वं वै यन्मां त्वं परिपृच्छसि ॥ ॥ शांतौ मोक्षधर्मे ॥
॥ व्यासः ॥ ॥ प्रत्याहारं तु वक्ष्यामि शर्वर्यादौ गतेहनि ॥ यथेदं कुरुतेध्यात्मं सुसूक्ष्मं विश्वमीश्वरः ॥ दिवि सूर्या
स्तथा सप्त दहंति शिखिनोर्चिषः ॥ सर्वमेतत्तदर्चिर्भिः पूर्णं जाज्वल्यते जगत् ॥ पृथिव्यां यानि भूतानि जंगा

मानि ध्रुवाणि च ॥ तान्येवाग्रे प्रलीयंते भूमित्वमुपयांति च ॥ ततः प्रलीने सर्वस्मिन्स्थावरे जंगमे तथा ॥ निर्वृक्षा
निस्तृणा भूमिर्दृश्यते कूर्मपृष्ठवत् ॥ भूमेरपि गुणं गंधमाप आददते यदा ॥ आत्तगंधा तदा भूमिः प्रलयत्वाय कल्प
ते ॥ आपस्तत्र प्रतिष्ठंति ऊर्मिमत्यो महास्वनाः ॥ सर्वमेवेदमापूर्य तिष्ठंति चरंति च ॥ अपामपि गुणं तात ज्योतिराद
दते यदा ॥ आपस्तदात्तगुणा ज्योतिःषूपरमंति च ॥ यदादित्यं स्थितं मध्ये गूहंति शिखिनोर्चिषः ॥ सर्वमेवेद
मर्चिर्भिः पूर्णं जाज्वल्यते नभः ॥ ज्योतिषोपि गुणं रूपं वायुराददते यदा ॥ प्रशाम्यति ततो ज्योतिर्वायुर्दोधूयते म
हान् ॥ ततस्तु मूलमासाद्य वायुः संभवमात्मनः ॥ अधश्चोर्ध्वं च तिर्यक्च दोधवीति दिशो दश ॥ वायोरपि गुणं स्प
र्शमाकाशं ग्रसते यदा ॥ प्रशाम्यति तदा वायुः खं तु तिष्ठति नादवत् ॥ अरूपमरसस्पर्शमगंधं न च मूर्तिमत् ॥
सर्वलोकप्रणुदितं खं तु तिष्ठति नादवत् ॥ आकाशस्य गुणं शब्दमभिव्यक्तात्मकं मनः ॥ मनसो व्यक्तमव्यक्तं ब्रा
ह्मः संप्रतिसंचरः ॥ तदात्मगुणमाविश्य मनो ग्रसति चंद्रमाः ॥ मनस्युपरते वात्मा चंद्रमस्युपतिष्ठते ॥ तं तु कालेन
महता संकल्पः कुरुते वशे ॥ चित्तं ग्रसति संकल्पः तच्च ज्ञानमनुत्तमं ॥ कालो गिरति विज्ञानं कालं बलमिति श्रुतिः ॥
बलं कालो ग्रसति तु तं विद्वान्कुरुते वशे ॥ आकाशस्य तदा घोषं तं विद्वान्कुरुतेत्मनि ॥ तदव्यक्तं परं ब्रह्म तच्छा

श्वतमनुत्तमं॥ एवं सर्वाणि भूतानि ब्रह्मैव प्रतिसंचरः॥ यथावत्कीर्तितं सम्यगेवमेतदसंशयः॥ बोध्यं विद्वा
नयं दृष्ट्वा योगिभिः परमात्मभिः॥ एवं विस्तारसंक्षेपौ ब्रह्माव्यक्ते पुनः पुनः॥ युगसाहस्रयोरादावहोरा
त्रस्य तथैव च॥ ॥शांतौ मोक्षधर्मे॥ ॥ ॥व्यासः॥ ॥ भूतग्रामे नियुक्तं यत्तदेतत्कीर्तितं मया॥ ब्राह्मणस्य तु
यत्कृत्यं तत्ते वक्ष्यामि तच्छृणु॥ जातकर्मप्रभृत्यस्य कर्मणां दक्षिणावतां॥ क्रियास्यादासमावृत्तेराचार्ये वेद
पारगे॥ अधीत्य वेदानखिलान्गुरुशुश्रूषणे रतः॥ गुरूणामनृणो भूत्वा समावर्त्तेत यज्ञवित्॥ आचार्येणा
भ्यनुज्ञातश्चतुर्णामेकमाश्रमं॥ आविमोक्षाच्छरीरस्य सोनुतिष्ठेद्यथाविधि॥ प्रजासर्गेण दारैश्च ब्रह्मच
र्येण वा पुनः॥ वने गुरुसकाशे वा यतिधर्मेण वा पुनः॥ गृहस्थस्त्वेव धर्माणां सर्वेषां मूलमुच्यते॥ तत्र पक्वकषा
यो हि दांतः सर्वत्र सिध्यति॥ प्रजावान्श्रोत्रियो यज्वा मुक्त एव ऋणैस्त्रिभिः॥ अथान्यानाश्रमान्पश्चात्पूता
गच्छेत कर्मभिः॥ यत्पृथिव्यां पुण्यतमं विंद्यात्स्थानं तदावसेत्॥ गते तु तस्मिन्प्रामाण्यं गंतुं यशसि चोत्त
मे॥ तपसा वा सुमहता विद्यानां पारणेन वा॥ यावदस्य भवत्यस्मिन्कीर्त्तिर्लोके यशस्करी॥ तावत्पुण्य
कृतान्लोकाननंतान्पुरुषोश्नुते॥ अध्यापयेदधीयीत याजयेत यजेत वा॥ न वृथा प्रतिगृह्णीयान्न

च दद्यात्कथंचन॥ याज्यतः शिष्यतो वापि कन्याया वा धनं महत्॥ यद्यागच्छेद्यजेद्दद्यान्नैकोश्नीयात्कथंचन॥ गृहमावसतो
ह्यस्य नान्यत्तीर्थं प्रतिग्रहात्॥ देवर्षिपितृगुर्वर्थं वृद्धातुरबुभुक्षतां॥ अंतर्हिताभितप्तानां यथाशक्ति बुभूषतां॥ द्रव्याणामति
शक्त्यापि देयमेषां कृतादपि॥ अर्हतामनुरूपाणां नादेयं ह्यस्ति किंचन॥ उच्चैःश्रवसमप्यश्वं प्रापणीयं सतां विदुः॥
अनुनीय यथाकाव्यः सत्यसंधो महाव्रतः॥ स्वैः प्राणैर्ब्राह्मणप्राणान्परित्राय दिवं गतः॥ रंतिदेवश्च सांकृत्यो वसिष्ठाय
महात्मने॥ अपः प्रदाय शीतोष्णा नाकपृष्ठे महीयते॥ आत्रेयश्चेंद्रदमनो ह्यर्हते विविधं धनं॥ दत्वा लोकान्ययौ धीमाननंता
न्स महीपतिः॥ शिबिरौशीनरोंगानि सुतं च प्रियमौरसं॥ ब्राह्मणार्थमुपाहृत्य नाकपृष्ठमितो गतः॥ प्रतर्दनः काशिप
तिः प्रदाय नयने स्वके॥ ब्राह्मणायातुलां कीर्त्तिमिह चामुत्र चाश्नुते॥ दिव्यमष्टशलाकं तु सौवर्णं परमर्द्धिमत्॥ छत्रं देवा
वृधो दत्वा सराष्ट्रोभ्यपतद्दिवं॥ सांकृतिश्च तथात्रेयः शिष्येभ्यो ब्रह्म निर्गुणं॥ उपदिश्य महातेजा गतो लोकाननुत्तमान्
॥ अंबरीषो गवां दत्वा ब्राह्मणेभ्यः प्रतापवान्॥ अर्बुदानि दशैकं च सराष्ट्रोभ्यपतद्दिवं॥ सावित्री कुंडले दिव्ये शरीरं जनमे
जय॥ ब्राह्मणार्थे परित्यज्य जग्मतुर्लोकमुत्तमं॥ सर्वरत्नं वृषादर्भिर्युवनाश्वः प्रियाः स्त्रियः॥ रम्यमावसथं चैव दत्वा स्वर्लो
कमास्थितः॥ निमी राष्ट्रं च वैदेहो जामदग्न्यो वसुंधरां॥ ब्राह्मणेभ्यो ददौ चापि गयश्चोर्वीं सपत्तनां॥ अवर्षति च पर्जन्ये सर्वभू
तानि भूतकृत्॥ वसिष्ठो जीवयामास प्रजापतिरिव प्रजाः॥ करंधमस्य पुत्रस्तु मरुत्तो नृपतिस्तथा॥ कन्यामंगिरसे दत्वा दि
वमाशु जगाम ह॥ ब्रह्मदत्तश्च पांचाल्यो राजा बुद्धिमतां वरः॥ निधिं शंखं द्विजाग्र्येभ्यो दत्वा लोकानवाप्तवान्॥ राजा मित्रसहश्चा

मोक्षधर्म.

७३

पिवसिष्टाय महात्मने ॥ दमयंतीप्रियां दत्वातयासह दिवंगतः ॥ सहस्त्रजिश्चराजर्षिः प्राणानिष्टान्महायशाः ॥ ब्राह्मणार्थेपरि
त्यज्यगतोलोकाननुत्तमान् ॥ सर्वकामैश्च संपूर्णं दत्वावेश्म हिरण्मयं ॥ मुद्गलायगतः स्वर्गं शतद्युम्नो महीपतिः ॥ नाम्ना श्व
च द्युतिमान्नाम शाल्वराजः प्रतापवान् ॥ दत्वाराज्यमृचीकाय गतोलोकाननुत्तमान् ॥ मदिराश्वश्चराजर्षिर्दत्वाकन्यांसुमध्यमां
॥ हिरण्यहस्तायगतोलोकान्देवैरभिष्टुतान् ॥ लोमपादश्चराजर्षिः शांतांदत्वासुतांप्रभुः ॥ ऋष्यशृंगाय विपुलैः सर्वकामैरयु
ज्यत ॥ दत्वाशतसहस्रंतु गवांराजा प्रसेनजित् ॥ सवत्सानांमहातेजाः गतोलोकाननुत्तमान् ॥ एतेचान्येचबहवो दानेनतप
सैवच ॥ महात्मानो गताः स्वर्गं शिष्टात्मानोजितेंद्रियाः ॥ तेषांप्रतिष्ठिताकीर्तिर्यावत्स्थास्यतिमेदिनी ॥ दानयज्ञप्रजासर्गैरे ति
तेहिदिवमाप्नुवन् ॥ ॥ शांतौमोक्षधर्मे ॥ ॥ व्यासउवाच ॥ त्रयीविद्यामवेक्षेतवेदेषूक्तमथांगतः ॥ ऋक्सामवर्णाक्षरतो
यजुषोथर्वणस्तथा ॥ निष्ठत्येतेषुभगवान्षट्कर्मसुसंस्थितः ॥ वेदवादेषुकुशलाह्यध्यात्मकुशलाश्चये ॥ सत्ववंतोमहाभा
गाः पश्यंतिप्रभवाप्ययौ ॥ एवंधर्मेणवर्तेत क्रियांशिष्टवदाचरेत् ॥ असंरोधेनभूतानां वृत्तिंलिप्सेतवैद्विजः ॥ सद्भ्यआगत
व विज्ञानः शिष्टः शास्त्रविचक्षणः ॥ स्वधर्मेणक्रियांलोके कर्मसिस्यसंकरः ॥ तिष्ठतेतेषुगृहवान्षट्कर्मसुवैद्विजः ॥ पंचभिः
सततंयज्ञैः श्रद्दधानोयजेतच ॥ धृतिमानप्रमत्तश्च दांतोधर्मविदात्मवान् ॥ वीतहर्षमदक्रोधो ब्राह्मणोनावसीदति ॥
दानमध्ययनंयज्ञस्तपोह्रीरार्जवंदमः ॥ एतैर्वर्द्धयतेतेजः पाप्मानंचापकर्षति ॥ धूतपाप्माचमेधावी लघ्वाहारोजितेंद्रि ८३

कामक्रोधौवशेकृत्वानिनीषेद्ब्रह्मणः पदं ॥ अग्नींश्चब्राह्मणांश्चार्चेद्देवताः प्रणमेतच ॥ वर्जयेद्रुशतींवाचंहिंसांचाधर्मसं
हितं ॥ एषापूर्वगतावृत्तिर्ब्राह्मणस्यविधीयते ॥ ज्ञानागमेनकर्माणिकुर्वन्कर्मसुसिध्यति ॥ पंचेंद्रियजलांघोरांलोभकूलां
सुदुस्तरां ॥ मन्युपंकामनाधृष्यांनदींतरतिबुद्धिमान् ॥ कालमभ्युद्यतंपश्येन्नित्यमत्यंतमोहितं ॥ महताविधिदृष्टेनब
लेनाप्रतिघातिना ॥ स्वभावस्रोतसावृत्तमुह्यतेसततंजगत् ॥ कालोदकेनमहतावर्षावर्तेनसंततं ॥ मासोर्मिणर्तुवेगेनप
क्षोलपतृणेनच ॥ निमेषोन्मेषफेनेन अहोरात्रजलेनच ॥ कामग्राहेणघोरेणवेदयज्ञप्लवेनच ॥ धर्मद्वीपेनभूतानामर्थ
कामजलेनच ॥ ऋतवाङ्मोक्षतीरेणविहिंसातरुवाहिना ॥ युगहृदौघमध्येनब्रह्मप्रायभवेनच ॥ धात्रासृष्टानिभूतानि
कृष्यंतेयमसादनं ॥ एतत्प्रज्ञामयैर्धीरानिस्तरंतिमनीषिणः ॥ प्लवैरप्लववंतोहिकिंकरिष्यंत्यचेतसः ॥ उपपन्नंहि
यत्प्राज्ञोनिस्तरेन्नेतरोजनः ॥ दूरतोगुणदोषौहिप्राज्ञः सर्वत्रपश्यति ॥ संशयंतुसकामात्माचलचित्तोल्पचेतनः ॥ अप्राज्ञोन
तरत्येनंयोह्यास्तेनसगच्छति ॥ अप्लवोहिमहादोषंमुह्यमानोधिगच्छति ॥ कामग्राहगृहीतस्यज्ञानमप्यस्यनप्लवः ॥
तस्मादुन्मज्जनस्यार्थेप्रयतेतविचक्षणः ॥ एतदुन्मज्जनंतस्ययदयंब्राह्मणोभवेत् ॥ अवदातेकुलेजातस्त्रिसंदेहस्त्रि
कर्मकृत् ॥ तस्मादुन्मज्जनेतिष्ठेत्प्रज्ञयानिःसरेद्यथा ॥ संस्कृतस्यहिदांतस्यनियतस्ययतात्मनः ॥ प्राज्ञस्यानंतरासिद्धि
रिहलोकेपरत्रच ॥ वर्ततेतेषुगृहवानक्रुध्यन्ननसूयकः ॥ पंचभिः सततंयज्ञैर्विघसाशीयजेतच ॥ सतांधर्मेणवर्ततेक्रि
यांशिष्टवदाचरेत् ॥ असंरोधेनलोकस्यवृत्तिंलिप्सेतगर्हितां ॥ श्रुतविज्ञानतत्वज्ञः शिष्टाचारोविचक्षणः ॥ स्वधर्मेणक्रि

यावांश्च कर्मपाशोस्यशंकरः॥ क्रियावांश्च श्रद्दधानो हि दाता प्राज्ञो नसूयकः॥ धर्माधर्मविशेषज्ञः सर्वैस्तरति दुस्तरं॥ धृतिमानप्रमत्तश्च दांतो धर्मविदात्मवान॥ वीतहर्षमदक्रोधो ब्राह्मणो नावसीदति॥ एषा पुरातनी वृत्तिर्ब्राह्मणस्य विधीयते॥ ज्ञानवित्त्वेव कर्माणि कुर्वन्सर्वत्र सिध्यति॥ अधर्मं धर्मकामो हि करोतीह विचक्षणः॥ धर्मं वा धर्मसंकाशं शोचन्निव करोति सः॥ धर्मं करोमीति करोत्यधर्ममधर्मकामश्च करोति धर्मं॥ उभे बालः कर्मणी न प्रजानन्स जायते म्रियते चापि देही॥ ॥ शांतौ मोक्षधर्मे॥ ॥ व्यास उवाच॥ ॥ अथ चेद्रोचयेदेतद्द्रुह्येन स्रोतसा यथा॥ उन्मज्जंश्च निमज्जंश्च ज्ञानवान्प्लववान्भवेत्॥ प्रज्ञया निश्चिता धीरास्तारयंत्यबुधान्प्लवैः॥ नाबुधास्तारयंत्यन्यानात्मानं वा कथंचन॥ छिन्नदोषो मुनिर्योगान्युक्तो युंजीत द्वादश॥ देशकर्मानुरागार्थानुपायापायनिश्चयः॥ चक्षुराहारसंहारैर्मनसा दर्शनेन च॥ यच्छेद्वाङ्मनसी बुध्या य इच्छेज्ज्ञान त मुत्तमं॥ ज्ञानयच्छेदात्मानं य इच्छेच्छांतिमात्मनः॥ एतेषां चेदनुद्रष्टा पुरुषोपि सुदारुणः॥ यदि वा सर्ववेदज्ञो यदि वाप्यनृचो द्विजः॥ यदि वा धार्मिको यज्वा यदि वा पापकृत्तमः॥ यदि वा पुरुषव्याघ्रो यदि वा क्लैब्यधारणः॥ तरत्येवं महादुर्गं जरामरणसागरं॥ एवं ह्येतेन योगेन युंजानो ह्येवमंततः॥ अपि जिज्ञासमानो हि शब्दब्रह्माति वर्त्तते॥ धर्मोपस्थो ह्रीवरूथ उपायापायकूबरः॥ अपानाक्षः प्राणयुगः प्रज्ञायुर्जीवबंधनः॥ चेतनाबंधुरश्चारुराचारग्रहनेमिवान्॥ दर्शनस्पर्शनवहो घ्राणश्रवणवाहनः॥ प्रज्ञानाभिः सर्वतंत्रप्रतोदो ज्ञानसारथिः॥ क्षेत्रज्ञाधिष्ठितो धीरः श्रद्धादमपुरःसरः॥ त्यागसूक्ष्मानुगः क्षेम्यः शौचगो ध्यानगोचरः॥ जीवयुक्तो रथो दिव्यो ब्रह्मलोके विराजते॥ अथ संत्वरमाणस्य रथमेतं युयुक्षतः॥ अक्षरं गंतुमन

सो विधिं वक्ष्यामि शीघ्रगं॥ सप्त यो धारणां कृत्स्नो वाग्यतः प्रतिपद्यते॥ पृष्ठतः पार्श्वतश्चान्या यावत्यस्ताः प्रधारणाः॥ क्रमशः पार्थिवं यच्च वायव्यं खं तथा पयः॥ ज्योतिषो यत्तदैश्वर्यमहंकारस्य बुद्धितः॥ अव्यक्तस्य तथैश्वर्यं क्रमशः प्रतिपद्यते॥ विक्रमाश्चापि यस्यैते यथा युक्तेषु योगतः॥ तथा योगस्य युक्तस्य सिद्धिमात्मनि पश्यतः॥ निर्मथ्यमानः सूक्ष्मत्वाद्रूपाणीमानि पश्यतः॥ शैशिरस्तु यथा धूमः सूक्ष्मः संश्रयते नभः॥ तथा देहाद्विमुक्तस्य पूर्वरूपं भवत्युत॥ अथ धूमस्य विरमे द्वितीयं रूपदर्शनं॥ जलरूपमिवाकाशे तथैवात्मनि पश्यति॥ अपां व्यतिक्रमे चास्य वह्निरूपं प्रकाशते॥ तस्मिन्नुपरते चास्य पीतवस्त्रवदव्ययः॥ ऊर्णारूपसवर्णस्य तस्य रूपं प्रकाशते॥ अथ श्वेतां गतिं गत्वा वायव्यं सूक्ष्ममप्युत॥ अंशुकं चेतसः सौम्यमप्युक्तं ब्राह्मणस्य वै॥ एतेषूपहितेषु फलजाता निबोध मे॥ जातस्य पार्थिवैश्वर्ये सृष्टिरिष्टा विधीयते॥ प्रजापतिरिवाक्षोभ्यः शरीरात्सृज्यते प्रजाः॥ अंगुल्यंगुष्ठमात्रेण हस्तपादेन वा तथा॥ पृथिवीं कंपयत्येको गुणो वायोरिति श्रुतिः॥ आकाशभूतं चाकाशे सवर्णत्वात्प्रकाशते॥ वर्णतो गृह्यते चापि कामात्पिबति चाशयान्॥ न चास्य तेजसा रूपं दृश्यते शाम्यते तथा॥ अहंकारस्य विजिते पंचैते स्युर्वशानुगाः॥ मा षण्णामात्मनि बुद्धौ च जितायां प्रभवत्यथ॥ निर्दोषप्रतिभा ह्येनं कृत्स्ना समभिवर्त्तते॥ तथैव व्यक्तमात्मानमव्यक्तं प्रतिपद्यते॥ यतो निःसरते लोको भवति व्यक्तसंज्ञकः॥ तत्राव्यक्तमयीं विद्यां शृणु त्वं विस्तरेण मे॥ तथा व्यक्तमयीं चैव सांख्ये पूर्वं निबोध मे॥ पंचविंशति तत्वानि तुल्यान्युभयतः समं॥ योगे सांख्येपि च तथा विशेषं तत्र मे शृणु॥ प्रोक्तं तद्व्यक्तमित्येव जायते वर्द्धते च यत्॥ जायते म्रियते चैव चतुर्भिर्लक्षणैर्युतं॥ विपरीतमतो यत्तु तदव्यक्तमुदाहृतं॥ द्वावात्मानौ च वेदेषु सिद्धांतेष्वप्युदाहृ

तौ ॥ चतुर्लक्षणजं त्वाद्यं चतुर्वर्गं प्रचक्षते ॥ व्यक्तमव्यक्तजं चैव तथा बुद्धमचेतनं ॥ सत्वं क्षेत्रज्ञ इत्येतद्द्वयमप्यनुदर्शितं ॥ द्वाव
त्मानौ च वेदेषु विषयेष्वनुरज्यतः ॥ विषयात्प्रतिसंहारः सांख्यानां सिद्धिलक्षणं ॥ निर्ममश्चानहंकारो निर्द्वंद्वश्छिन्नसंश
यः ॥ नैव क्रुध्यति न द्वेष्टि नानृता भाषते गिरः ॥ आक्रुष्टस्ताडितश्चैव मैत्रेण ध्याति नाशुभं ॥ वाग्दंडकर्ममनसां त्रयाणां च
निवर्त्तकः ॥ समः सर्वेषु भूतेषु ब्रह्माणमतिवर्त्तते ॥ नैवेच्छति न चानिच्छो यात्रामात्रव्यवस्थितः ॥ अलोलुपोऽव्यथो दांतो नाकृ
तिर्न निराकृतिः ॥ नास्येंद्रियमनेकाग्रं नाविक्षिप्तमनोरथः ॥ अहिंस्रः सर्वभूतानामीदृक्सांख्यो विमुच्यते ॥ यथा योगाद्विमुच्यं
ते कारणैर्यैर्निबोधत तत् ॥ योगैश्वर्यमतिक्रांतो यो निःक्रामति मुच्यते ॥ इत्येषा भवजा बुद्धिः कथिता ते न संशयः ॥ एवं भवति
निर्द्वंद्वो ब्रह्माणं चाधिगच्छति ॥ ॥ इति मोक्षधर्मे ॥ ॥ व्यासः ॥ ॥ अथ ज्ञानप्लवं धीरो गृहीत्वा शांतिमात्मनः ॥ उन्मज्जंश्च नि
मज्जंश्च ज्ञानमेवाभिसंश्रयेत् ॥ ॥ शुक उवाच ॥ ॥ किं तद्ज्ञानमथो विद्या यया निस्तरते द्वयं ॥ प्रवृत्तिलक्षणो धर्मो निवृ
त्तिरिति वा वद ॥ यस्तु पश्यन्स्वभावेन विनाभावमचेतनः ॥ पुष्यते च पुनः सर्वं प्रज्ञया मुक्तहेतुकः ॥ येषां चैकांतभावेन स्व
भावात्कारणं मतं ॥ पूत्वा तृणबुषीकां वा ते लभंते न किंचन ॥ ये चैनं पक्षमाश्रित्य निवर्तंत्यल्पचेतसः ॥ स्वभावं कारणं ज्ञा
त्वा न श्रेयः प्राप्नुवंति ते ॥ स्वभावो हि विनाशाय मोहकर्म मनोभवः ॥ निरुक्तमेतयोरेतत्स्वभावपरिभावयोः ॥ कृष्यादीनी
हि कर्माणि सस्यसंहरणानि च ॥ प्रज्ञावद्भिः प्रकॢप्तानि यानासनगृहाणि च ॥ आक्रीडानां गृहाणां च गदानामगदस्य च ॥ प्र
ज्ञावंतः प्रयोक्तारो ज्ञानवंतद्भिनुष्ठिताः ॥ प्रज्ञा संयोजयत्यर्थैः प्रज्ञा श्रेयोऽधिगच्छति ॥ राजानो भुंजते राज्यं प्रज्ञया तुल्य

लक्षणाः ॥ परावरं तु भूतानां ज्ञानेनैवोपलभ्यते ॥ विद्यया तात सृष्टानां विद्ध्येवेह परां गतिं ॥ भूतानां जन्म सर्वेषां विविधानां चतुर्वि
धं ॥ जरायुजांडजोद्भिदजं चोपलभ्यते ॥ स्थावरेभ्यो विशिष्टानां जंगमान्युपधारयेत् ॥ उपपन्नं हि यच्चेष्टा विशिष्येत विशेष्यया ॥
आहुर्वै पादानि जंगमानि द्वयानि तु ॥ बहुपाद्भ्यो विशिष्टानि द्विपादानि बहून्यपि ॥ द्विपादानि द्वयान्याहुः पार्थिवानीतराणि च ॥
पार्थिवानि विशिष्टानि जातिधर्मोपपन्नात् ॥ मध्यमानि द्वयान्याहुर्वेदज्ञानीतराणि च ॥ वेदज्ञानि विशिष्टानि वेदो ह्येषु प्रतिष्ठि
तः ॥ वेदज्ञानि द्वयान्याहुः प्रवक्तॄणीतराणि च ॥ प्रवक्तॄणि विशिष्टानि सर्वधर्मोपधारणात् ॥ विज्ञायंते हि यैर्वेदाः सधर्माः सक्रि
याः फलाः ॥ सधर्माः सखिला वेदाः प्रवक्तृभ्यो विनिस्सृताः ॥ प्रवक्तॄणि द्वयान्याहुरात्मज्ञानीतराणि च ॥ आत्मज्ञानि विशिष्टानि
जन्माजन्मोपधारणात् ॥ धर्मद्वयं हि यो वेद स सर्वज्ञः स सर्ववित् ॥ स त्यागी सत्यसंकल्पः सत्यः शुचिरथेश्वरः ॥ धर्मस्तानप्रति ष्ठंहितं
देवा ब्राह्मणं विदुः ॥ शब्दब्रह्मणि निष्णातः परे च कृतनिश्चयः ॥ अंतस्थं च बहिस्थं च साधियज्ञाधिदैवतं ॥ ज्ञानान्विता हि पश्यंति
ते देवास्तात ते द्विजाः ॥ तेषु विश्वमिदं भूतं साग्रं च जगदादिकं ॥ तेषां माहात्म्यभावस्य सदृशं नास्ति किंचन ॥ आद्यंते निधनं चैव
कर्म चाधीत्य सर्वशः ॥ चतुर्विधस्य भूतस्य सर्वस्येशाः स्वयंभुवः ॥ ॥ शांतिपर्वणि मोक्षधर्मे ॥ ॥ व्यास उवाच ॥ ॥ एषा पूर्वतरा वृ
त्तिर्ब्राह्मणस्य विधीयते ॥ ज्ञानवानेव कर्माणि कुर्वन्सर्वत्र सिध्यति ॥ तत्र चेन्न भवेदेवं संशयः कर्मनिश्चये ॥ किं तु कर्म स्वभा
वोयं ज्ञानं कर्मेति वा पुनः ॥ उपपत्त्युपलब्धिभ्यां वर्णयिष्यामि तच्छृणु ॥ पौरुषं कारणं केचिदाहुः कर्मसु मानवाः ॥ दैवमेके प्रशंसं
कर्म ति स्वभावमपरे जनाः ॥ पौरुषं दैवं तं फलवृत्तिस्वभावतः ॥ त्रयमेतत्पृथग्भूतमविवेकं तु केचन ॥ एतदेवं च नैवं च न चोभे नानुभे

तथा॥ कर्मस्था विषमं ब्रूयुः सत्वस्थाः समदर्शिनः॥ त्रेतायां द्वापरे चैव कलिजाश्च ससंशयाः॥ तपस्विनः प्रशान्तात्मा सत्वस्थाश्च कृ
ते युगे॥ अपृथक् दर्शीनोत्सर्वे ऋक्सामसु यजुस्सु च॥ कामद्वेषौ पृथक् दृष्ट्वा तपः कृतयुगे उपासते॥ तपो धर्मेण संयुक्तस्तपोनिष्ठः सु
संशितः॥ तेन सर्वानवाप्नोति कामान् यन्मनसेच्छति॥ तपसा तद्वाप्नोति यद्भूत्वा सृजते जगत्॥ तद्भूतश्च ततः सर्वे भूतानां भवति प्रभुः॥
तदुक्तं वेदवादेषु गहनं वेदवादिभिः॥ वेदांतेषु पुनर्व्यक्तं क्रमयोगेन लक्ष्यते॥ आलंभयज्ञाः क्षत्राश्च हविर्यज्ञा विशः स्मृताः॥ प
रिचारयज्ञाः शूद्राश्च तपोयज्ञा द्विजातयः॥ परिनिष्ठितकार्यो हि स्वाध्यायेन द्विजो भवेत्॥ कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्य
ते॥ त्रेतादौ केवला वेदा यज्ञा वर्णाश्रमास्तथा॥ संरोधादायुषस्त्वेते व्यस्यंते द्वापरे युगे॥ द्वापरे विप्लवं यांति वेदाः कलियुगे
तथा॥ दृश्यंते नापि दृश्यंते कलेरंते पुनः किल॥ उत्सीदंति स्वधर्माश्च तत्राधर्मेण पीडिताः॥ गवां भूमेश्च ये चापां मोषधीनां च
येन रसाः॥ अधर्मांतर्हिता वेदा वेदधर्मास्तथाश्रमाः॥ विक्रियंते स्वधर्मस्थाः स्थावराणि चराणि च॥ यथा सर्वाणि भूतानि वृष्टिर्भौ
मानि वर्षति॥ सृजते सर्वतोंगानि तथा वेदा युगे युगे॥ निश्चितं कालनानात्वमनादिनिधनं च यत्॥ कीर्तितं यत्पुरस्तान्मे सूते यच्चां
ति च प्रजाः॥ यच्चेदं प्रभवस्थानं भूतानां संयमो यमः॥ स्वभावेनैव वर्तंते द्वंद्वसृष्टानि भूरिशः॥ सर्गः कालो धृतिर्वेदाः कर्त्ता कार्यं
क्रिया फलं॥ एतत्ते कथितं तात यन्मां त्वं परिपृच्छसि॥ ॥ शांतौ मोक्षधर्मे॥ ॥ भीष्म उवाच॥ ॥ इत्युक्तोऽभिप्रशस्यैतत्परमर्षेस्तु शा
सनं॥ मोक्षधर्मार्थसंयुक्तमिदं प्रष्टुं प्रचक्रमे॥ ॥ शुक उवाच॥ ॥ प्रज्ञावाञ्छ्रोत्रियो यज्वा कृतप्रज्ञोऽनसूयकः॥ अनागतम
नैतिह्यं कथं ब्रह्माधिगच्छति॥ तपसा ब्रह्मचर्येण सर्वत्यागेन मेधया॥ सांख्ये यदि वा योगे एतत्पृष्टो वदस्व मे॥ मनसा श्चेंद्रिया
वा

णां च यथैकाग्र्यमवाप्यते॥ येनोपायेन पुरुषैस्तत्वं व्याख्यातुमर्हसि॥ ॥ व्यास उवाच॥ ॥ नान्यत्र विद्यातपसोर्नान्यत्रेंद्रियनिग्र
हात्॥ नान्यत्र सर्वसंत्यागात्सिद्धिं विंदति कश्चन॥ महाभूतानि सर्वाणि पृथक् सिद्धि स्वयंभुवा॥ भूयिष्ठं प्राणभृद्ग्रामे निवि
ष्टानि शरीरिषु॥ भूमेर्देहो जलात्स्नेहो ज्योतिषोग्निर्भेकुमिच्छति॥ कर्णयोः प्रदिशः श्रोत्रं जिह्वायां वाक् शरीरिणी॥ कर्णौ
त्वक् चक्षुषी जिह्वा नासिका चैव पंचमी॥ क्षर्शनीयेंद्रियोक्तानि द्वाराण्याहारसिद्धये॥ शब्दः स्पर्शस्तथा रूपं रसो गंधश्च पंच
मः॥ इंद्रियार्थान्पृथग्विद्यादिंद्रियेभ्यस्तु नित्यदा॥ इंद्रियाणि मनो युंक्ते वश्याभ्यंते च वाजिनः॥ मनश्चापि सदा युंक्ते भूता
त्मा हृदयाश्रितः॥ इंद्रियाणां तथैवेषां सर्वेषामीश्वरं मनः॥ नियमे च विसर्गे च भूतात्मा मनसस्तथा॥ इंद्रियाणींद्रियार्थाश्च
स्वभावश्चेतना मनः॥ प्राणापानौ च जीवश्च नित्यं देहे प्रदेहिनां॥ आश्रयो नास्ति सत्वस्य गुणाः शब्दो न चेतना॥ सत्वं हि
तेजः सृजति न गुणान्वै कदाचन॥ एवं सप्तदशं देहे वृतं षोडशभिर्गुणैः॥ मनीषी मनसा विप्रः पश्यत्यात्मानमात्मनि
॥ न ह्ययं चक्षुषा दृश्यो न च सर्वैरपींद्रियैः॥ मनसा तु प्रदीप्तेन महानात्मा प्रकाशते॥ अशब्दस्पर्शरूपं तदरसागंध
मव्ययं॥ अशरीरं शरीरेषु निरीक्षेत निरिंद्रियं॥ अव्यक्तं सर्वदेहेषु मर्त्येषु परमाश्रितं॥ योन पश्यति संप्रेत्य कल्पते ब्र
ह्मभूयसे॥ विद्याभिजनसंपन्ने ब्राह्मणे गवि हस्तिनि॥ शुनि चैव श्वपाके च पंडिताः समदर्शिनः॥ स हि सर्वेषु भूत
तेषु जंगमेषु ध्रुवेषु च॥ वसत्येको महानात्मा येन सर्वमिदं ततं॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥

यदा पश्यंति भिन्नमात्मा ब्रह्म संपद्यते तदा ॥ यावानात्मनि वेदात्मा तावानात्मा परात्मनि ॥ य एवं सततं वेद सोमृतत्वाय कल्पते ॥
सर्वभूतात्मभूतस्य सर्वभूतहितस्य च ॥ देवापि मार्गे मुह्यंति अपदस्य पदैषिणः ॥ शकुंतानामिवाकाशे मत्स्यानामि
वोदके ॥ यथागतिर्न दृश्येत तथा ज्ञानविदां गतिः ॥ कालः पचति भूतानि सर्वाण्येवात्मनात्मनि ॥ यस्मिंस्तु पच्यते कालः
तं वेदेह न कश्चन ॥ न तदूर्ध्वं न तिर्यक्च नाधो न च पुनः पुनः ॥ न मध्ये प्रतिगृह्णीते नैव किंचिन्न कश्चन ॥ सर्वे तत्स्था इ
मे लोका बाह्यमेषां न किंचन ॥ यः सहस्रं समागच्छेद्यथा बाणो गुणच्युतः ॥ नैवांतं कारणस्येयाद्यद्यपि स्यान्मनोज
वाः ॥ तस्मात्सूक्ष्मात्सूक्ष्मतरं न स्थूलतरं ततः ॥ सर्वतः पाणिपादांतं सर्वतोक्षिशिरोमुखं ॥ सर्वतः श्रुतिमल्लोके सर्वमा
वृत्य तिष्ठति ॥ तदेवाणोरणुतरं तन्महद्भ्यो महत्तरं ॥ तदंतः सर्वभूतानां ध्रुवं तिष्ठन्न दृश्यते ॥ अक्षरं च क्षरं चैव द्वै
धीभावोयमात्मनः ॥ क्षरः सर्वेषु भूतेषु दिव्यं ह्यमृतमक्षरं ॥ नवद्वारं पुरं गत्वा हंसो हि नियतो वशी ॥ ईशः सर्वस्य भू
तस्य स्थावरस्य चरस्य च ॥ हानिभंगविकल्पानां नवानां संचयेन च ॥ शरीराणामजस्याहुर्हंसत्वं पारदर्शिनः ॥ हंसो
क्तं चाक्षरं चैव कूटस्थं यत्तदक्षरं ॥ तद्विद्वानक्षरं प्राप्य जहाति प्राणजन्मनी ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ व्यासः ॥ ॥
पृष्टवांस्त्वं सत्पुत्र यथावदिह तत्त्वतः ॥ सांख्यज्ञानेन संयुक्तं यदेतत्कीर्तितं मया ॥ योगकृत्यं तु ते कृत्स्नं वर्तयि
ष्यामि तच्छृणु ॥ एकत्वं बुद्धिमनसोरिंद्रियाणां च सर्वशः ॥ आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमं ॥ यदेतदुपशां

तेन दांतेनाध्यात्मशीलिना ॥ आत्मारामेण बुद्धेन बोद्धव्यं शुचिकर्मणा ॥ योगदोषान्समुच्छिद्य पंच यान्कवयो विदुः ॥
कामं क्रोधं च लोभं च भयं स्वप्नं च पंचमं ॥ क्रोधं शमेन जयति कामं संकल्पवर्जनात् ॥ सत्त्वसंसेवनाद्धीरो निद्रामुच्छे
त्तुमर्हति ॥ धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ॥ चक्षुःश्रोत्रे च मनसा मनो वाचं च कर्मणा ॥ अप्रमादाद्भयं
जह्याद्दंभं प्राज्ञोपसेवनात् ॥ एवमेतान्योगदोषाञ्जयेन्नित्यमतंद्रितः ॥ अग्नींश्च ब्राह्मणांश्चार्चेद्देवताः प्रणमेत
च ॥ वर्जयेदुशतीं वाचं हिंसायुक्तां मनोनुगां ॥ ब्रह्म तेजोमयं शुक्रं यस्य सर्वमिदं रसः ॥ एतस्य भूतभूतस्य दृष्टं
स्थावरजंगमं ॥ ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा ॥ शौचमाचारसंशुद्धिरिंद्रियाणां च निग्रहः ॥ एतैर्वि
वर्द्धते तेजः पाप्मानं चापकर्षति ॥ सिध्यंति चास्य सर्वार्था विज्ञानं च प्रवर्तते ॥ समः सर्वेषु भूतेषु लब्धालब्धेन
वर्त्तयेत् ॥ धूतपाप्मा तु तेजस्वी लघ्वाहारो जितेंद्रियः ॥ कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदं ॥ मनसश्चेंद्रिया
णां च कृत्वैकाग्र्यं समाहितः ॥ पूर्वरात्रापरार्द्धे च धारयेन्मन आत्मनि ॥ जंतोः पंचेंद्रियस्यास्य यदेकं छिद्रमिंद्रियं ॥
ततोस्य स्रवते प्रज्ञा दृतेः पादादिवोदकं ॥ मनस्तु पूर्वमादद्यात्कुमीनमिव मत्स्यहा ॥ ततः श्रोत्रं ततश्चक्षुर्जिह्वां घ्राणं
च योगवित् ॥ तत एतानि संयम्य मनसि स्थापयेद्यतिः ॥ तथैवापोह्य संकल्पान्मनो ह्यात्मनि धारयेत् ॥ पंचें
द्रियाणि संधाय मनसि स्थापयेद्यतिः ॥ यदैतान्यवतिष्ठंति मनःषष्ठान्यथात्मनि ॥ प्रसीदंति च संस्थाय तदा

ब्रह्मप्रकाशते।। विधूमइव पावकिरादित्यइव दीप्तिमान्।। वैद्युतोग्निरिवाकाशे दृश्यतेत्मा तथात्मनि।। सर्वंतत्रससर्व
त्र्यापकत्वाच्च दृश्यते।। तं पश्यंति महात्मानो ब्राह्मणा ये मनीषिणः।। धृतिमंतो महाप्राज्ञाः सर्वभूतहिते रताः।।
एवं परिमितं कालमाचरेत्संशितव्रतः।। आसीनो हि रहस्येको गच्छेदक्षरसाम्यतां।। प्रमोहो भ्रम आवर्तो घ्राणः
श्रवणदर्शने।। अद्भुतानि रसस्पर्शे शीतोष्णमारुताकृतिः।। प्रतिभामुपसर्गांश्चाप्युपसंगृह्य योगतः।। तांस्तत्त्ववि
दनादृत्य आत्मन्येव निवर्तयेत्।। कुर्यात्परिचयं योगे त्रैकाल्ये नियतो मुनिः।। गिरिशृंगे तथा चैत्ये वृक्षाग्रेषु च यो
जयेत्।। संनियम्येंद्रियग्रामं कोष्ठे भांडमना इव।। एकाग्रे चिंतयेन्नित्यं योगान्नोद्वेजयेन्मनः।। येनोपायेन श
क्येत संनियंतुं चलं मनः।। तं च युक्तो निषेवेत न चैव विचलेत्ततः।। शून्या गिरिगुहाश्चैव देवतायतनानि च।। शू
न्यागाराणि चैकाग्रो निवासार्थमुपक्रमेत्।। नाभिष्वजेत्परं वाचा कर्मणा मनसापि वा।। उपेक्षको यताहारो ल
ब्धालब्धो समो भवेत्।। यश्चैनमभिनंदेत यश्चैनमपवादयेत्।। समस्तयोश्चाप्युभयोर्नाभिध्यायेच्छुभाशु
भं।। न प्रहृष्येत लाभेषु नालाभेषु च चिंतयेत्।। समः सर्वेषु भूतेषु सधर्मा मातरिश्वनः।। एवं स्वस्थात्मनः
साधोः सर्वत्र समदर्शिनः।। षण्मासान्नित्ययुक्तस्य शब्दब्रह्मातिवर्त्तते।। विदनार्त्ताः प्रजा दृष्ट्वा समलोष्टाश्म
कांचनः।। एतस्मिन्निरतो मार्गे विरमन्न च मोहितः।। अपि वर्णावकृष्टस्तु नारी वा धर्मकांक्षिणी।। ताव

जयेत विचक्षणः।। परित्याज्यो बुधैः पापः कृतघ्नो निरपत्रपः।। मित्रद्रोही कुलांगारः पापकर्मा नराधमः।। एष धर्मभृ
तां श्रेष्ठः प्रोक्तः पापो मया तव।। मित्रद्रोही कृतघ्नो वै किं भूयः श्रोतुमिच्छसि।। ।।वैशंपायन उवाच।। ।।एतच्छ्रुत्वा
तदा वाक्यं भीष्मेक्तं महात्मना।। युधिष्ठिरः प्रीतमना बभूव जनमेजय।। ।।इति श्रीमन्महाभारते शांतिपर्वणि
आपद्धर्मे (णी) कृतघ्नोपाख्याने आपद्धर्मः समाप्तः।। ।। ।। दशपुत्रविष्णुपंतस्य राज्ञो दत्तं।। श्री
भारतं।। छ।।

```
[OrderDescription]
,CREATED=20.07.19 12:27
,TRANSFERRED=2019/07/20 at 12:50:45
,PAGES=81
,TYPE=STD
,NAME=S0001046
,Book Name=M-1993-AAPTDHARM SHNTIPURVVI MOKSHADHARM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
```

```
FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
```

```
FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,
```